श्री

# शुक्लयजुर्वेद माध्यंदिनीय-
# संहिता प्रारंभः ।

---

लोकनाथ आचार्य-श्रीपशुपतिदेवपत्तन,
काठमाडौं, नेपाल /

दीर्घ दाँखे पर मा — [ देवाँ॥ ]

~~ह्र~~ स्वदाँखेपर मा· [ प्रजाभिँ॥ ]

(१) जुन अक्षरमा कतै रेखा छैन र 'स्वरित वा अनुदात्त पर छ भने त्यसलाई उदात्त' भनिन्छ)

---

१ उदात्त दाँखेपर तर्जनी (चोर औंलो) र अनुदात्त दाँखेपर कनिष्ठिका (कान्छी औंलो) को प्रक्षेप हुन्छ।

२ दीर्घ स्वर दाँखेपर — 'कनिष्ठिका' र ह्रस्व स्वरित दाँखे पर — 'कनिष्ठिका र तर्जनी' दुवै प्रक्षेप हुन्छन्

३ स्वरित वक्रा दीर्घ होस् वा ह्रस्व ~~[illegible]~~ दाँखेमा ^दुवै औंला छोड्नुपर्छ। यकार संयुक्त वकारमा
पनि — अङ्गुलिद्वय छोड्नुपर्छ [कुनै दाक्षिणी एक औंला छोड्छन्] सदस्ये इत्यादि ठाउँमा —
र उहै औंला छोडिन्छ [मैथिलहरु दुइ औंला छोड्छन्]

वि० लोकनाथ आचार्य-श्रीपशुपति-देवपत्तन।

अथाष्टविकृति-याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-अनुवाकसूत्र-पारस्करगृह्यसूत्र·
वेदपारायणविध्यादिसमलङ्कृत—

# शुक्लयजुर्वेदमाध्यंदिनीयसंहिताप्रारंभः॥

मूल्यं २॥ सार्धं रूप्यकद्वयम्।


याज्ञवल्क्य ऋषि
यजुर्वेद

## उत्तरविंशतिः

| अध्याय | पृष्ठ | मंत्र | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| २३ | २१ | ८ | ६ | वु॒ःस्वर्ला | वु॒ःस्वु॒र्ला |
| २३ | २५ | ३३ | ३ | गाय॒त्री | गा॒य॒त्री |
| २४ | ३० | ४ | ७ | स्वु॒त्त्यः | स्वु॒त्त्यु॒ |
| २४ | ३४ | ३० | ५ | मु॒र्क॑ट÷ | मु॒र्क॑ट÷ |
| २६ | ४६ | ६ | ७ | स्रङ्घ | स्रङ्घु |
| २७ | ५० | ११ | १–२ | अं॑स्यं॑ | अं॑स्य । |

| अध्याय | पृष्ठ | मंत्र | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| २८ | ५४ | ४५ | १ | ञ्चप्र॑च | ञ्चप्रच॑ |
| २८ | ५७ | १४ | २ | देदैवी॒ | दैवी॒ |
| २९ | ७१ | ५३ | २ | रथ | रथ॑ |
| विकृतिः | १२५ | ९ | ७ | सप्त | सत्य |
| विकृतिः | १२६ | २ | ५ | स्त्वात्वा | स्त्वा॑त्वा |
| सूत्र | ४० |  | १३ | मन्यते. | मन्थयते |

# शुद्धिपत्रम्

## पूर्वविंशतिः

| अध्याय | पृष्ठ | मंत्र | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|
| १ | ३ | १४ | १ | शुं॑द्ध्वाꣳ | श्रुं॑द्धाꣳ |
| १ | ४ | १६ | १ | वृं॑द्धं | वृं॑द्धं |
| २ | ९ | ८ | ७ | व्री॒र्स्य॑म | व्री॒र्स्य॒म |
| २ | १० | १३ | ६ | मों॥३॒ँप्र | मौँ३॥प्र |
| ४ | २७ | ३३ | २ | यजं॑ | सजं॑ |
| ५ | २९ | ८ | २ | चो॒अ | चो॒ऽअ |
| ५ | ३५ | ३९ | ४ | ए॒तंत्व | ए॒तत्व |
| ६ | ३८ | १५ | ५ | तां॒ꣳश्रो | ता॒ꣳश्रो |
| ६ | ३८ | १६ | ७ | म्भा॒गोसि॒ | म्भा॒गो॒सि॒ |
| ६ | ४२ | ३४ | ६ | गूर्ता | गूर्त्ता |
| ७ | ४६ | २० | ३ | यणꣳपा॒हि | यणꣳ॥ पा॒हि |
| ९ | ६९ | ३२ | ३ | ज्रैषु॒ढः | ज्रैषु॒ढु॒ः |
| १० | ७६ | १६ | १ | गर्तु॒ | गर्त्तु॒ |
| ११ | ८० | १० | ३ | रसि | रसि॒ |
| ११ | ९० | ७९ | २ | सु॒स्तरकं | सु॒स्तर्कं |
| १५ | १३३ | ४६ | १ | वाँड्क्स्वर्ण्ण | वा॒ड्क्स्वु॒र्ण्ण |
| १८ | १६८ | ४० | १ | वाट्टाभ्युꣳ | वाट्टा॒भ्युꣳ |
| २० | १९६ | ७६ | ५ | पु॒ना÷ | पु॒नाः |

# अथ शुक्लयजुर्वेदसंहितानुक्रमणिका.

| विषयाः | पृष्ठाङ्काः |
|---|---|
| १ संहितायाः पूर्वविंशतिः | १–१९७ |
| २ संहिताया उत्तरविंशतिः | १–१२२ |
| ३ अष्टविकृतिमन्त्राः | १२४–१४८ |
| ४ याज्ञवल्क्यशिक्षा | १–११ |
| ५ प्रतिज्ञासूत्रम् | ११ |
| ६ सर्वानुक्रमसूत्रम् | ११–३२ |
| ७ अनुवाकसूत्राध्यायः | ३२–३४ |
| ८ पारस्करगृह्यसूत्रम् | ३४–६० |
| ९ पारस्करगृह्यसूत्रपरिशिष्टं (श्राद्धसूत्रम्) | ६०–६२ |
| १० ,, ,, (भोजनसूत्रम्) | ६२–६३ |
| ११ वेदपारायणविधिः | १–३ |
| १२ संहितामंत्राणामनुक्रमणी | १–२५ |

## हेमाद्रिकृतचतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनानुसारेण शिक्षासहितवेदस्वरूपाणि.



ऋग्वेदः श्वेतवर्णः स्यात्
द्विभुजो रासभाननः॥
अक्षमालायुतः सौम्यः
प्रीतश्चाध्ययनोद्यतः॥१॥

अजास्यः पीतवर्णः स्यात्
यजुर्वेदोऽक्षसूत्रधृक्॥
वामे कुलिशपाणिस्तु
भूतिदो मंगलप्रदः॥२॥

नीलोत्पलदलाभासः
सामवेदो हयाननः॥
अक्षमालान्वितो दक्षे
वामे कंबुधरः स्मृतः॥३॥

अथर्वणाभिधो वेदो
धवलो मर्कटाननः॥
अक्षसूत्रं च खट्वाङ्गं
बिभ्राणो यजनप्रियः॥४॥

शिक्षा शुभ्राभयकरा
ज्ञानमुद्रान्विता शुभा॥
अक्षसूत्रा सकुंडीका
द्विभुजा दंडपंकजा॥५॥

वि० लोकनाथ आचार्य- श्रीपशुपति-देवपत्तनम्/

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः ॥
गणनाथसरस्वतीरविशुक्रबृहस्पतीन् ॥ पंचैतान् संस्मरन्नित्यं वेद
वाणीं प्रवर्तयेत् ॥ अथानुवाकसूत्रम् ॥ इषेत्वैका, वसोःपवित्रंतिस्रो,
ग्नेव्रतपतेसप्त, पवित्रेस्थोद्वे, शर्म्मासितिस्रो, धृष्टिरसिशर्म्मासि
द्विकौ, देवस्यत्वातिस्रो, देवस्यत्वापंच, प्रत्युष्टꣳरक्षास्तिस्रो, दशैकत्रिꣳशत् ॥ हरिःॐ ॥ इ॒षेत्त्वा॑ ॥ इ॒षेत्त्वो॒र्ज्जेत्त्वा॑व्वा॒यव॑स्त्थदे॒वोवः॑
सं. १ स॒वि॒ताप्प्रार्प्प॑यतु॒श्रेष्ठ॑तमा॒यकर्म्म॑ण॒ऽआप्प्या॑यद्ध्वमघ्न्या॒ऽइन्द्रा॑य

ारायणे विनि
योग:

[ॐ इषेत्वा, इत्यारभ्य तेजोसीत्यन्तं बृहद्देवा ऋषयः, बृहती छन्दो ऽग्नि र्दैवता समस्त यज्ञ फल कामः पाठे विनियोगः ॥१॥ { कौडिण्य वासिष्ठ मैत्रावरुणीति त्रिप्रवरः कौडिण्यगोत्रोत्पन्नः लोकनाथ शर्माऽहम् }]

भागम्प्रजावंतीरनमीवाऽअंयक्ष्मामावंस्तेनऽईंशतमाघशंꣳसोंध्रुवा
ऽअस्मिन्गोपंतौस्यातबह्वीर्यजंमानस्यपशून्पांहि ॥ १ ॥ [ १ ]
वसोंःपवित्रंम् ॥ वसोंःपवित्रंमसिद्यौरंसिपृथिव्यसिमातरिश्वंनो
घर्म्मोंसिविश्वधांऽअसि ॥ परमेणधाम्नादृꣳहंस्वमाह्वार्म्मातेंय
ज्ञपंतिर्ह्वार्षीत् ॥ २ ॥ वसोंःपवित्रंम् ॥ वसोंःपवित्रंमसिशतधांरं
वसोंःपवित्रंमसिसहस्रंधारम् ॥ देवस्त्वांसवितापुंनातुवसोंःपवित्रें
णशतधांरेणसुप्वाकामंधुक्षꣳ ॥ ३ ॥ साविश्वायुंः ॥ साविश्वा

यु॒ःसा॒वि॒श्वक॑र्म्मा॒सा॒वि॒श्वधा॑याः ॥ इन्द्र॑स्य॒त्वाभा॒गꣳसोमे॒ना
त॑नच्मि॒वि॒ष्णो॑ह॒व्यꣳर॑क्ष ॥ ४ ॥ [ ३ ] अग्ने॑व्व्रतपते । व्व्र॒तञ्च॑रि
ष्ष्या॒मि॒तच्छ॑केय॒न्तन्मे॑राध्यताम् ॥ इ॒दम॒हमनृ॑तात्स॒त्यमु॒पै॑मि
॥ ५ ॥ कस्त्वा॑ । युनक्ति॒सत्त्वा॑युनक्ति॒कस्म्मै॑त्वायुनक्ति॒तस्म्मै॑त्वा
युनक्ति ॥ कर्म्म॑णेवा॒व्वेषा॑यवाम् ॥ ६ ॥ प्रत्यु॑ष्टꣳरक्षः॑ ॥ प्रत्यु॑ष्टꣳर
क्ष॒ःप्रत्यु॑ष्टा॒ऽअरा॑तयो॒निष्ट॑प्त॒ꣳरक्षो॒निष्ट॑प्ता॒ऽअरा॑तयः ॥ उ॒र्व्वन्तरि॑
क्ष॒मन्वे॑मि ॥ ७ ॥ धूर॑सि ॥ धूर॑सि॒धूर्व्व॒धूर्व्व॑न्त॒न्धूर्व्व॒तंय्यो॒स्म्मान्धूर्व्व॑ति॒तंधू॑

र्व्वयंव्वयन्धूर्व्वामः ॥ देवानामसिव्वह्नितमꣳसस्नितमम्पप्रितमञ्जुष्ट
तमन्देवहूतमम् ॥ ८ ॥ अह्रुतमसि । हविर्द्धानन्दृꣳहस्वमाह्वार्म्मा
तेयज्ञपतिर्ह्वार्षीत् ॥ व्विष्णुस्त्वाक्क्रमतामुरुव्वातायापहतꣳरक्षो
यच्छन्ताम्पञ्च ॥ ९ ॥ देवस्यत्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्यां
म्पूष्णोहस्ताब्भ्याम् ॥ अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाब्भ्याञ्जुष्टङ्गृ
ह्णामि ॥ १० ॥ भूतायत्वा ॥ भूतायत्वानारातयेस्वरभिविख्येष ॥२॥
न्दृꣳहन्तान्दुर्य्याꣳपृथिव्यामुर्व्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौ

सादया॒म्म्यदि॑त्याऽउ॒पस्त्थेग्ग्ने॑ह॒व्यꣳर॑क्ष ॥ ११ ॥ [ ७ ] प॒वित्रे॑
स्त्थङ ॥ प॒वित्रे॑स्त्थोवैष्ष्ण॒व्यौसावि॒तु॒र्व्वः॑प्प्र॒स॒वऽउत्पु॑ना॒म्म्यच्छि॑द्द्रेण
प॒वित्रे॑ण॒सूर्य्य॑स्यर॒श्म्मिभिः॑ ॥ देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोऽग्ग्र॑
ऽइ॒मम॒द्यय॒ज्ञन्न॑य॒ताग्ग्रे॑य॒ज्ञप॑तिꣳसु॒धातुं॑य॒ज्ञप॑तिन्दे॒व॒युव॑म् ॥ १२ ॥
यु॒ष्म्माऽइन्द्रः॑ ॥ यु॒ष्म्माऽइन्द्रो॑वृणीतवृ॒त्र॒तू॑र्य्ये॑यू॒यमि॒न्द्र॑मवृणीध्वं
वृत्र॒तू॒र्य्ये॑प्प्रोक्षि॑तास्त्थ ॥ अ॒ग्ग्नये॑त्त्वा॒जुष्ट॒म्म्प्रोक्षा॑म्म्य॒ग्ग्नीषोमा॑
ब्भ्यान्त्वा॒जुष्ट॒म्प्रोक्षा॑मि ॥ दैव्या॑य॒कर्म्म॑णेशुंधद्ध्वन्देवय॒ज्ज्यायै॒य

द्वो॒शु॑द्धाꣳपरा॑ज॒ग्मुरि॒दं॑व्व॒स्तच्छु॑न्धामि ॥ १३ ॥ [ २ ] शर्म्मा॑
सि ॥ शर्म्मा॒स्यवं॑धूत॒ꣳरक्षोवं॑धूता॒ऽअरा॑त॒योदि॑त्या॒स्त्वगा॑सि॒प्प्रति॒त्त्वा
दि॑ति॒र्व्वे॑त्तु ॥ अद्रि॑रसि॒व्वान॒स्प॒त्यो॒ग्ग्रावा॑सिपृ॒थुबु॑ध्न॒ꣳप्प्रति॒त्वादि॑त्या॒
स्त्वग्ग्वे॑त्तु ॥ १४ ॥ अ॒ग्नेस्त॒नूः ॥ अ॒ग्नेस्त॒नूर॑सि॒व्वा॒चोव्वि॒सर्ज्ज॑न
न्दे॒ववी॑तये॒त्वागृह्णामि॒बृ॒हद्ग्रा॑वासि॒व्वान॒स्प॒त्त्यः॒सऽइ॒दन्दे॒वेभ्यो॑ह॒
वि॒ःशा॑मीष्व॒सु॒शमि॑शमी॑ष्व ॥ ह॒वि॑ष्कृ॒दे॒हि॒ह॒वि॑ष्कृ॒दे॒हि ॥ १५ ॥
कुक्कु॒टोसि ॥ कुक्कु॒टो॑सि॒मधु॑जिह्व॒ऽइष॒मूर्ज्ज॒मावं॑द॒त्वया॑व्व॒यꣳसंङ्घा॒तꣳ

सञ्ज्ञातञ्ञेष्म्मवर्षवृद्धमसिप्प्रतित्वावर्षवृद्धंवेत्तुपरापूतꣳरक्षꣳपरापू
ताऽअरातयोपहतꣳरक्षोवायुर्वोविविनक्तुदेवोवः÷सविताहिरण्यपा
णिꣳप्प्रतिगृभ्भ्णात्वाच्छिद्द्रेणपाणिना ॥ १६ ॥ [ ३ ] धृष्टिरसि ॥
धृष्टिरस्यपाग्ग्नेऽअग्निमामादञ्ञ्जहिनिष्क्रव्यादꣳसेधादेवयजंवह ॥
ध्रुवमसिपृथिवीन्दृꣳहब्रह्मवनित्वाक्षत्रवनिसजातवन्न्युपदधामि
भ्भ्रातृव्व्यस्यवधाय ॥ १७॥ अग्ग्नेब्रह्म । गृभ्भ्णीष्ष्वधरुणमस्यन्त
रिक्षन्दृꣳहब्रह्मवनित्त्वाक्षत्रवनिसजातवन्न्युपदधामिभ्भ्रातृव्व्यस्य

व्वधाय ॥ धर्त्रमसिदिवन्दृꣳहब्रह्मवनित्त्वाक्षत्रवनिसजातवन्युपद
धामिभ्रातृव्यस्यव्वधाय ॥ व्विश्वाभ्यस्त्वाशाभ्यऽउपदधामिचि
तस्त्थोर्द्ध्वश्चितोभृगूणामाङ्गिरसान्तपसातप्प्यद्ध्वम् ॥ १८ ॥ [२] शर्मा
सि ॥ शर्म्मास्यवधूतꣳरक्षोवधूताऽअरातयोदित्यास्त्वगसिप्प्रतित्वा
दितिर्व्वेत्तु ॥ धिषणासिपर्व्वतीप्प्रतित्वादित्यास्त्वग्ग्वेत्तुदिवस्कम्भ
नीरसिधिषणासिपार्व्वतेयीप्प्रतित्वापर्व्वतीव्वेत्तुधान्यमसि ॥ १९ ॥
धान्यमसि । धिनुहिदेवान्प्राणायत्त्वोदानायत्वाव्यानायत्वा ॥

दी॒र्ग्घाम॒नुप्प्रसि॑ति॒मायु॑षे॒धान्दे॒वोव॑ःसवि॒ताहिर॑ण्यपाणि॒ःप्प्रति॑
गृब्भ्णा॒त्वच्छि॑द्द्रेणपा॒णिना॒चक्षु॑षेत्वाम॒हीना॒म्पयो॑सि ॥ २० ॥ [ ३ ]
दे॒वस्य॑त्वा ॥ सवि॒तुःप्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्ष्णोहस्ता॑ब्भ्याम् ॥
संव्व॑पामि॒समाप॒ऽओष॑धीभि॒ःसमो॑ष॑धयो॒रसे॑न ॥ सꣳरे॒वती॒र्ज्जग॑ती
भिःपृच्च्यन्ता॒ꣳसम्मधु॑मती॒र्म्मधु॑मतीभिःपृच्च्यन्ताम् ॥ २१ ॥
जन॑यत्त्यैत्त्वा ॥ जन॑यत्त्यैत्त्वा॒सय्यौ॑मी॒दम॒ग्ग्नेरि॒दम॒ग्ग्नीषोम॑यो
रि॒षेत्वा॑घ॒र्म्मो॑सिवि॒श्वायु॑रु॒रुप्प्र॑थाऽउ॒रुप्प्र॑थस्वो॒रुते॑य॒ज्ञप॑तिःप्प्रथ

ताम॒ग्निष्टे॒त्त्वच॒म्माहि॑ꣳसीद्दे॒वस्त्वा॑सवि॒ताश्श्र॑पयतु॒व्वर्षि॑ष्ठे॒धि॒नाके॑
॥ २२ ॥ माभेः ॥ माभे॒र्म्मा॑संवि॑क्था॒ऽअत॑मेरु॒र्य॒ज्ञोत॑मेरु॒र्य॒ज॑
मानस्यप्प्र॒जाभू॑यात्त्रि॒ताय॑त्वाद्द्वि॒ताय॑त्वैक॒ताय॑त्वा ॥ २३ ॥ [ ३ ]
दे॒वस्य॑त्वा । सवि॒तुःप्प्र॑स॒वे॒श्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्णोहस्ता॑ब्भ्याम् ॥
आद॑दे॒द्ध्व॒रकृत॑न्दे॒वेब्भ्य॒ऽइन्द्र॑स्यबा॒हुर॑सि॒दक्षि॑णꣳस॒हस्र॑भृष्टिꣳश॒तते॑
जाव्वा॒युर॑सिति॒ग्मते॑जाद्द्वि॒ष॒तोव्व॒धः ॥ २४ ॥ पृथि॑विदेवयजनि ॥ ॥ ५ ॥
पृथि॑विदेवयज॒न्न्योष॑ध्यास्ते॒मूल॒म्माहि॑ꣳसिष॒व्व्र॒जङ्ग॑च्छगो॒ष्ठान॒व्वर्ष॑

तुतेद्यौर्बधानदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योऽस्मा
न्द्वेष्टियञ्चव्वयन्द्विष्म्मस्तमतोमामौक् ॥ २५ ॥ अपाररुम् ॥
अपाररुम्पृथिव्यैदेवयजनाद्बध्यासंव्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्बधा
नदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योऽस्मान्द्वेष्टियञ्चव्व
यन्द्विष्म्मस्तमतोमामौक् ॥ अररोदिवम्मापप्तोद्रप्सस्तेद्याम्मा
स्कन्व्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्बधानदेवसवितःपरमस्याम्पृथि
व्याꣳशतेनपाशैर्य्योऽस्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मस्तमतोमामौक्

॥ २६ ॥ गा॒य॒त्रेण॑त्वा ॥ गा॒य॒त्रेण॑त्वा॒च्छन्द॑सा॒परि॑गृह्णामि॒त्रैष्टु॑भेनत्वा॒च्छन्द॑सा॒परि॑गृह्णामि॒जाग॑तेनत्वा॒च्छन्द॑सा॒परि॑गृह्णामि ॥ सु॒क्ष्मा॒चासि॑शि॒वाचा॑सि॒स्यो॒नाचासि॑सु॒षदा॑चा॒स्यू॒र्ज्जँस्वती॒चासि॒पय॑स्वतीच ॥ २७ ॥ पु॒राक्रू॒रस्य॑ । व्वि॒सृपो॑व्वि॒राप्शि॑न्नु॒दा॒दाय॑पृथि॒वीञ्जी॒वदा॑नुम् ॥ यामैर॑यँश्च॒न्द्रम॑सि॒स्व॒धाभि॒स्तामु॒धीरा॑सोऽअनु॒दिश्य॑यजन्ते ॥ प्रोक्ष॑णी॒रासा॑दय॒द्द्वि॒ष॒तोव्व॒धो॒सि ॥ २८ ॥ [ ५ ]

प्रत्यु॑ष्ट॒ꣳरक्ष॑ः ॥ प्रत्यु॑ष्ट॒ꣳरक्ष॒ꣳप्रत्यु॑ष्टाऽअरा॑तयो॒निष्ट॑प्त॒ꣳरक्षो॒निष्ट॑

ष्प्ता॒ऽअरा॑तयः ॥ अनि॑शितोसिसपत्न॒क्षिद्वा॒जिनं॑न्त्वाव्वा॒जेध्या॒यै॑स
म्मा॑र्ज्मि ॥ प्रत्त्यु॑ष्टꣳरक्ष॒ःप्प्रत्त्यु॑ष्टाऽअरा॑तयो॒निष्ट॑प्त॒ꣳरक्षो॒निष्ट॑प्ता॒
ऽअरा॑तयः ॥ अनि॑शितासिसपत्न॒क्षिद्वा॒जिनी॑न्त्वाव्वा॒जेध्या॒यै॑सम्मा॑
र्ज्मि ॥ २९ ॥ अदि॑त्यै॒रास्ना॑ । सि॒व्विष्णो॑र्वे॒[1]ष्पो॑स्यू॒र्ज्जे॑ त्वाद॑ब्धेनत्वा॒
चक्षु॒षाव॑पश्यामि ॥ अ॒ग्नेर्ज्जि॒ह्वासि॑सु॒हूर्दे॒वेब्भ्यो॒धाम्म्ने॑धाम्म्नेमेभव॒
यजु॑षेयजुषे ॥ ३० ॥ स॒वि॒तुस्त्वा॑ । प्प्रस॒वऽउत्पु॑ना॒म्म्यच्छि॑द्द्रेणप॒वित्रे॑

---

[1] वेष्पोसि इति काण्वानां पाठः । तत्संहिताभाष्ये छांदसः पकारादेश इति सायणाचार्योक्तिः । माध्यंदिनीयानां तु वेष्योसि इति पाठः । अत्र उवटमहीधरादिभाष्यकारैः पकारादेशस्यानुक्तेः ।

णसूर्य्यस्यरश्मिभिः ॥ सवितुर्वःप्प्रसवऽउत्पुनाम्म्यच्छिद्रेणपवि
त्रेणसूर्य्यस्यरश्मिभिः ॥ तेजोसिशुक्रमस्यमृतमसिधामनामासि
प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ३१ ॥ [ ३ ] इतिश्रीवाजस
नेयसंहितायांप्रथमोध्यायः ॥ १ ॥ श्रीवेदपुरुषाय नमः । अनुवाकसू
त्रम् ॥ कृष्णोसिषड, ग्नेवाजजित्तिस्रो, मयीद, मग्नीषोमयोः पंचका,
वग्नेदब्धायोचतस्रः, संवर्चसापंचा, ग्नयेकव्यवाहनायषट् सप्तचतु ॥७॥
स्त्रिꣳशत् ॥ हरिःॐ ॥ कृष्णोसि ॥ कृष्णोस्याखरेष्ठोग्नयेत्वाजुष्टम्प्रो

[ॐ कृष्णोसीत्यारभ्य ऊर्ज्जम्वहन्तीत्यन्तस्य कुत्स ऋषि पङ्क्तिः छन्दः, विष्णुर्देवता सुबुद्धि फलप्रा-
प्ति कामः, वेद पारायणे विनियोगः/ (पाठे विनियोगः)॥२॥]

क्षा॑मि॒व्वेदि॑रसि बु॒र्हि॑षे॑त्वा॒जुष्टा॒म्प्रोक्षा॑मिब॒र्हि॑र॑सिस्रु॒ग्भ्यस्त्वा॒जुष्ट
म्प्रोक्षा॒म्म्यदि॑त्यै॒व्व्युन्द॑नम् ॥ १ ॥ अदि॑त्यै॒व्व्युन्द॑नमसि॒व्विष्णो॑स्तु॒पो॒
स्यू॒र्ण॑म्म्रदस॑न्त्वास्तृणामिस्वास॒स्थान्दे॒वेभ्यो॒भु॒व॑पतये॒स्वाहा॒भुव॑न
पतये॒स्वाहा॑ भू॒ताना॒म्पत॑ये॒स्वाहा॑ ॥ २ ॥ ग॒न्ध॒र्व्वस्त्वा॑ । व्वि॒श्वाव॑सुꣳ
परि॑दधातु॒व्विश्व॒स्यारि॑ष्ट्यै॒यज॑मानस्यपरि॒धिर॑स्य॒ग्निरि॒डऽई॑डि॒तः ॥
इन्द्र॑स्यबा॒हुर॑सि॒दक्षि॑णो॒व्विश्व॒स्यारि॑ष्ट्यै॒यज॑मानस्यपरि॒धिर॑स्य॒ग्निरि॒
डऽई॑डि॒तः ॥ मि॒त्रावरु॑णौत्वोत्त॒रतःपरि॑धत्तान्ध्रु॒वेण॒धर्म्म॑णा॒व्वि

श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडईऽडितः ॥ ३ ॥ वीतिहोत्र
न्त्वा । कवेद्युमन्तꣳसमिधीमहि ॥ अग्नेबृहन्तमद्ध्वरे ॥ ४ ॥ समि
दसि ॥ समिदसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै ॥ सवि
तुर्बाहूस्त्थऽऊर्ण्णम्म्रदसन्त्वास्तृणामिस्वासस्थन्देवेब्भ्यऽआत्वाव
सवोरुद्द्राऽआदित्याःसदन्तु ॥ ५ ॥ घृताच्च्यसि । जुहूर्न्नाम्नासेद
म्प्रियेणधाम्नाप्प्रियꣳसदऽआसीदघृताच्च्यस्युपभृन्नाम्नासेदम्प्रिये
णधाम्नाप्प्रियꣳसदऽआसीदघृताच्च्यसिध्ध्रुवानाम्नासेदम्प्रियेण

धाम्न्नांप्प्रि॒यꣳसद॒ऽआसींद॒प्प्रि॒येण॒धाम्न्नांप्प्रि॒यꣳसद॒ऽआसींद ॥ ध्रु॒
वाऽअंसदन्नृ॒तस्य॒योनौ॒ताव्विंष्णोपाहि॒पाहि॒य॒ज्ञम्पा॒हि॒य॒ज्ञपंतिंपा॒
हिमांय्यंज्ञ॒न्न्यम् ॥ ६ ॥ [ ६ ] अग्नेंव्वाजजित् ॥ अग्ग्नेंव्वाजजि॒द्वा
जंन्त्वासरि॒ष्यन्तंव्वाज॒जित॒ꣳसम्मांर्ज्मि ॥ नमोंदे॒वेब्भ्यं÷स्व॒धापि॒
तृब्भ्यं÷सु॒यमेंमेभूयास्त॒मस्कंन्नम॒द्य ॥ ७ ॥ अस्कंन्नम॒द्य । दे॒वेब्भ्य॒
ऽआज्ज्य॒ꣳसम्भ्रिंयासु॒मङ्घ्रिंणाव्विष्ष्ण॒ोमात्वावंक्क्रमिषं॒व्वसुंमतीम
ग्ग्नेतेच्छा॒यामुपंस्त्थेषं॒व्विष्ष्णो॒स्त्थानंमसी॒तऽइन्द्रोंव्वी॒र्य्यंमकृणोद्

द्धौद्ध्रुरऽआस्त्थात् ॥ ८ ॥ अग्नेव्वेः ॥ अग्नेव्वेर्होत्रंव्वेर्दूत्यमवतान्त्वा
न्द्यावापृथिवीऽअवत्वन्द्यावापृथिवीस्विष्टकृद्देवेब्भ्यऽइन्द्रऽआज्ज्ये
नहविषाभूत्स्वाहासञ्ज्योतिषाज्योतिः ॥ ९ ॥ [ ३ ] मयीदम् ॥
मयीदमिन्द्रऽइन्द्रियन्दधात्वस्मान्रायोमघवानꣳसचन्ताम् ॥ अ
स्माकꣳसन्त्वाशिषःसत्यानःसन्त्वाशिषऽउपहूतापृथिवीमातो
पमाम्पृथिवीमाताह्वयतामग्निराग्नीद्ध्रात्स्वाहा ॥ १० ॥ उपहूतो
द्यौः ॥ उपहूतोद्यौष्पितोपमान्द्यौष्पिताह्वयतामग्निराग्नीद्ध्रा

त्स्वाहा॑ ॥ दे॒वस्य॑त्वासवि॒तुः॑ष्प्र॑स॒वे॒श्श्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्णोहस्ता॑
ब्भ्याम् ॥ प्रति॑गृह्णा॒म्म्य॒ग्ग्ने॒ष्ट्वास्ये॒न॒प्प्राश्श्ना॑मि ॥ ११ ॥ ए॒तन्ते॑ । दे॒व
सवित॒र्य्य॒ज्ञम्प्रा॒हु॒र्बृह॒स्प्पत॑ये॒ब्र॒ह्मणे॑ ॥ तेन॑य॒ज्ञम॑व॒तेन॑य॒ज्ञप॑ति॒न्ते
न॒माम॑व ॥ १२ ॥ मनो॑जू॒तिः ॥ मनो॑जू॒तिर्ज्जु॑षता॒माज्ज्य॑स्य॒बृह॒स्प्प
ति॑र्य्य॒ज्ञमि॒मन्त॑नो॒त्वरि॑ष्टं॒य्य॒ज्ञꣳसमि॒मन्द॑धातु ॥ व्विश्वे॑दे॒वास॑ऽइ॒ह
मा॑दय॒न्ता॒मो ॥ ॐ म्प्रति॑ष्ठ ॥ १३ ॥ ए॒षाते॑ ॥ ए॒षाते॑ऽअग्ने॒स॒मित्तया॒व्वर्द्ध॑
स्व॒चाचं॒प्प्याय॑स्व ॥ व्व॒र्द्धि॑षी॒महि॑च॒व्व॒यमा॒चं॒प्प्यासिषी॑महि ॥ अग्ने॑व्वाज

जि॒ह्वाजं॑न्त्वाससृ॒वाꣳसंव्वाज॒जित॒ꣳसम्मा॑र्ज्जिम ॥ १४ ॥ [ ५ ] अ॒ग्नी
षोमं॑यो॒रुज्जि॑तिम् ॥ अ॒ग्नीषोमं॑यो॒रुज्जि॑ति॒मनूज्जें॑षं॒व्वाजं॑स्यमाप्प्रस॒वे
न॒प्प्रोहा॑मि ॥ अ॒ग्नीषोमौ॒तमपं॑नुद॒तांय्यो॒स्मान्द्वेष्टि॒यञ्चं॑व्व॒यन्द्वि॒
ष्मो॑व्वाजं॑स्यैनम्प्र॒सवे॑नापो॑हामि ॥ इ॒न्द्रा॒ग्न्योरुज्जि॑ति॒मनूज्जें॑षं॒व्वाजं
स्यमाप्प्रस॒वे॑न॒प्प्रोहा॑मि ॥ इ॒न्द्रा॒ग्नीतमपं॑नुद॒तांय्यो॒स्म्मान्द्वेष्टि॒यञ्चं
व्व॒यन्द्वि॒ष्मो॑व्वाजं॑स्यैनम्प्र॒सवे॑नापो॑हामि ॥ १५ ॥ व्व॒सुं॑भ्यस्त्वा । ॥१०॥
रु॒द्रे॑भ्यं॑स्त्वादि॒त्ये॑भ्यं॑स्त्वा॒सञ्ज्ञा॑नाथान्द्यावापृथिवीमि॒त्रावरुं॑णौ

त्वा॒व्वृष्ट्या॑वताम् ॥ व्यन्तु॒व्वयो॒क्तꣳरिहा॑णाम॒रुता॒म्पृष॑तीर्गच्छ॒व्वशा
पृश्नि॑र्ब्भू॒त्वादि॒वं॑ङ्गच्छ॒ततो॑नो॒व्वृष्टि॒माव॑ह ॥ च॒क्षु॒ष्पाऽअ॑ग्ग्नेसि॒चक्षु॑
र्म्मे॑पाहि ॥ १६ ॥ यम्प॑रि॒धिम् ॥ यम्प॑रि॒धिम्प॒र्य्यध॑त्था॒ऽअग्ग्ने॑देव॒प
णिभि॑र्गु॒ह्यमा॑नः ॥ तन्त॑ऽए॒तमनु॒जोष॑म्भराम्म्ये॒षनेत्वद॑पचे॒तया॑
ताऽअ॒ग्ग्नेःप्प्रि॒यम्पाथोपी॑तम् ॥ १७ ॥ स॒ꣳ॒स्र॒वभा॑गास्थे॒षाबृ॒हन्त॑ः
प्प्रस्त॒रे॒ष्ठाःप॑रि॒धेया॑श्चदे॒वाः ॥ इ॒मांव्वाच॑म॒भिविश्वे॑गृ॒णन्त॑ऽआ॒स
द्या॒स्म्मिन्ब॒र्हिषि॑मादयद्ध्व॒ꣳ॒स्वाहा॒व्वाट् ॥ १८ ॥ घृ॒ताची॑स्थः ॥ घृ॒

ताचीँस्त्थो॒धुर्य्यौँपातꣳसु॒म्नेस्त्थ॑ःसु॒म्नेमा॑धत्तम् ॥ य॒ज्ञनम॑श्च॒त॒ऽ
उप॑च॒य॒ज्ञस्य॑शि॒वेसन्ति॑ष्ठस्व॒स्वि॒ष्टेमे॒सन्ति॑ष्ठस्व ॥ १९ ॥ [ ५ ] अग्ने॑
द॒ब्धायो । शीत॑मपा॒हिमा॑दि॒द्योःपा॒हिप्प्रसि॑त्यैपा॒हिदु॒रि॑ष्ट्यैपा॒हिदु॑
रद्म॒न्या॒ऽअ॑वि॒षन्न॑ःपि॒तुङ्कृ॑णुसु॒षदा॒योनौ॒स्वाहा॒व्वाड॒ग्नये॑संव्वे॒शप॑तये॒
स्वाहा॒सर॑स्वत्यैयशो॒भ॒गिन्यै॒स्वाहा॑ ॥ २० ॥ व्वे॒दो॑सि ॥ व्वे॒दो॑सि॒येन॒त्व
न्दे॑वव्वे॒दद॒दे॒वेब्भ्यो॒व्वे॒दो॒भ॑व॒स्तेन॒मह्यं॒व्वे॒दो॒भू॑याः ॥ दे॒वा॑गातु॒विदो॒गा॒तुं॑
व्वि॒त्वागा॒तुमि॑त ॥ मन॑सस्पत॒ऽइ॒मन्दे॒व॒य॒ज्ञꣳस्वाहा॒व्वाते॑धाः ॥ २१ ॥

सम्बर्हिः ॥ सम्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्यैर्व्वसुभिःसम्मरु
द्भिः ॥ समिन्द्रोव्विश्वदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा ॥२२॥
कस्त्वा ॥ कस्त्वाव्विमुञ्चतिसत्वाव्विमुञ्चतिकस्मैत्वाव्विमुञ्चतित
स्मैत्वाव्विमुञ्चति ॥ पोषायरक्षसाम्भागोसि ॥ २३ ॥ [ ४ ] संवर्च्च
सा ॥ संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासु
दत्रोव्विदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ २४ ॥ दिविव्विष्णुः ॥
दिविव्विष्णुर्व्यक्रꣳस्तजागतेनच्छन्दसाततोनिर्भक्तोयोस्मा

ज्यो

न्द्वेष्टियञ्चव्वयन्द्विष्म्मोन्तरिक्षेव्विष्ष्णुर्व्यक्रꣳस्तत्रैष्टुभेनच्छन्दसा
ततोनिर्भक्तोयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः पृथिव्यांव्विष्ष्णुर्व्य
क्रꣳस्तगायत्रेणच्छन्दसाततोनिर्भक्तोयोस्म्मान्द्वेष्टियञ्चव्वयन्द्वि
ष्म्मोस्म्मादन्नादस्यैप्प्रतिष्ठायाऽअगन्मस्वःसञ्ज्योतिषाभूम ॥ २५ ॥
स्वयम्भूरसि ॥ स्वयम्भूरसिश्श्रेष्ठोरश्म्मिर्व्वर्च्चोदाऽअसिव्वर्च्चोमेदेहि ॥
सूर्य्यस्यावृतमन्वावर्त्ते ॥ २६ ॥ अग्ग्नेगृहपते । सुगृहपतिस्त्वयाग्ग्ने
हङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्ग्नेगृहपतिनाभूयाः ॥

ज्यो

अस्त्थूरिणौगार्हपत्त्यानिसन्तुशतꣳहिमाःसूर्य्यस्यावृतमन्वावर्त्ते
॥ २७ ॥ अग्नेव्व्रतपते । व्व्रतमचारिषन्तदशकन्तन्मेराधीदमहंय
ऽएवास्म्मिसोस्म्मि ॥ २८ ॥ [ ५ ] अग्नयेकव्व्यवाहनाय । स्वाहासो
मायपितृमतेस्वाहा ॥ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ॥ २९ ॥
येरूपाणि । प्प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति ॥ परा
पुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्म्मात् ॥ ३० ॥ अत्र
पितरः ॥ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम् ॥ अमीमद

न्तपितरौंयथाभागमावृंषायिषत ॥ ३१ ॥ नमोंवꣳपितरोरसांयुन
मोंवꣳपितरꣳशोषांयुनमोंवꣳपितरोजीवायुनमोंवꣳपितरꣳस्वधायै
नमोंवꣳपितरोघोरायुनमोंवꣳपितरोमन्न्यवेनमोंवꣳपितरꣳपितंरोन
मोंवोगृहान्नं÷पितरोदत्तसतोवं÷पितरोदेष्म्मैतद्वं÷पितरोव्वासऽआ
धंत्त ॥ ३२ ॥ आधंत्त । पितरोगर्ब्भँङ्कुमारम्पुष्क्करस्स्रजम् ॥ यथेह
पुरुषोसंत् ॥ ३३ ॥ ऊर्ज्जम्वहन्तीꣳ ॥ ऊर्ज्जम्वहन्तीरमृतंङ्घृतम्पयं÷
कीलालंपरिस्रुतम् ॥ स्वधास्त्थंतर्प्पयंतमेपितॄन् ॥ ३४ ॥ [६] इतिश्री

वाजसनेयसंहितायांद्वितीयोऽध्यायः ॥ २ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाक्सूत्रम्। समिधाग्निं, भूर्भुवःस्वश्चतुष्का, वग्निर्ज्योतिर्द्वे, उपप्र
यन्तोऽअध्वरꣳषड्विꣳशतिः, भूर्भुवःस्वश्चतस्रो, गृहामातिस्रः, प्रघा
सिनोहवामहे पंच, पूर्णादर्विद्वे, ऽअक्षन्नमीमदन्तषडे, षते सप्त, दश
॥ १० ॥ त्रिषष्टिः ॥ हरिः ॐ ॥ समिधाग्निम् ॥ समिधाग्निन्दुवस्य
तघृतैर्बोधयतातिथिम् ॥ आस्मिन्हव्याजुहोतन ॥ १ ॥ सुसमिद्धा
यशोचिषे । घृतन्तीव्रञ्जुहोतन ॥ अग्नयेजातवेदसे ॥ २ ॥ तन्त्वा ।

[ ॐ समिधाग्निमित्यस्य त्रिषष्टि कण्डिकाऽनुवाकस्य हिरण्यगर्भ ऋषिः, वयꣳ सोमेत्यस्य प्रजापति ऋ-
षिः, रुद्रो देवता, अवभृथ फल प्राप्तिकाम: पाठे विनियोगः॥ ] ॥ ३ ॥

समिद्भिरङ्गिरोघृतेनंवर्द्धयामसि ॥ बृहच्छोचायविष्ठ्य ॥ ३ ॥ उ
पंत्वा । ग्नेहविष्मंतीर्घृताचींऽर्यन्तुहऽर्यत ॥ जुषस्वंसमिधोममं
॥४॥[४]भूर्भुवं÷ ॥ भूर्भुवःस्वर्द्यौरिंवभूम्नापृंथिवीवंवरिम्णा ॥
तस्यांस्तेपृथिविदेवयजनिपृष्ठेग्निमंन्नादमन्नाद्यायादंधे ॥५॥ आयम् ॥
आयङ्गौःपृश्निंरक्रमीदसंदन्मातरंम्पुरः ॥ पितरंञ्चप्प्रयन्त्स्वं÷ ॥ ६ ॥
अन्तश्चंरति । रोचनास्यप्प्राणादंपानती ॥ व्यंक्ख्यन्महिषोदिवंम्
॥ ७ ॥ त्रिꣳशद्धामं ॥ त्रिꣳशद्धामविराजतिवाक्पंतङ्गायंधीयते ॥ प्र

तिवस्तोरहद्युभिः ॥ ८ ॥ [४] अग्निर्ज्ज्योतिः ॥ अग्निर्ज्ज्योतिर्ज्ज्यो
तिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिꣳसूर्य्यꣳस्वाहा ॥ अग्निर्व्वर्च्चोज्ज्यो
तिर्व्वर्च्चꣳस्वाहासूर्य्योव्वर्चोज्ज्योतिर्व्वर्च्चꣳस्वाहा ॥ ज्योतिꣳसूर्य्यꣳसू
र्य्योज्ज्योतिꣳस्वाहा ॥ ९ ॥ सजूर्द्देवेन । सवित्रासजूरात्र्येन्द्रवत्या ॥
जुषाणोऽअग्निर्व्वेतुस्वाहा ॥ सजूर्द्देवेनंसवित्रासजूरुषसेन्द्रवत्या ॥
जुषाणःसूर्य्योव्वेतुस्वाहा ॥ १० ॥ [२] उपप्प्रयन्तोऽअद्ध्वरम् ॥ उप
प्प्रयन्तोऽअद्ध्वरम्मन्त्रंव्वोचेमाग्नये ॥ आरेऽअस्मेचशृण्वते ॥ ११ ॥

अग्ग्निर्म्मूर्द्धा । दिवश्ककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसि
जिन्वति ॥ १२ ॥ उभावाम् ॥ उभावामिन्द्राग्नीऽआहुवध्याऽउभा
राधसꣳसहमादयध्यै ॥ उभादातारांविषाꣳरयीणामुभाव्वाजस्यसा
तयेहुवेवाम् ॥ १३ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्वियोयतोजातोऽअ
रोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् ॥ १४ ॥ अय
मिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ यमप्न
वानोभृगवोविरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेविशे ।१५। अस्यप्प्रत्नाम् ॥

अस्यप्रत्नामनुद्युतꣳशुक्रन्दुदुह्रेऽअह्रयः ॥ पयंःसहस्रसामृषिंम् ॥ १६ ॥ तनूपाऽअंग्ने।सितन्वम्मेपाह्यायुर्द्दाऽअंग्नेस्यायुर्म्मेदेहिवर्च्चोदाऽअंग्नेसिवर्च्चोमेदेहि ॥ अग्नेयन्मेतन्वाऽऊनन्तन्मऽआपृंण ॥ १७ ॥ इन्धांनास्त्वा।शतꣳहिमांद्युमन्तꣳसमिंधीमहि ॥ वयंस्वन्तोवयस्कृतꣳसहंस्वन्तꣳसहस्कृतंम् ॥ अग्नेंसपत्नदम्भंनमदब्धासोऽअदांब्भ्यम् ॥ चित्रांवसोस्वस्तितेंपारमंशीय ॥ १८ ॥ सन्त्वम् ॥ सन्त्वमंग्नेसूर्य्यंस्यवर्च्चंसागथाःसमृषींणाꣳस्तुतेनं ॥ सम्प्रियेणधा

म्न्ना॒सम॒हमायुं॑षा॒सं॑व्वर्च्च॑सा॒सम्प्र॒जया॒सꣳरा॒यस्पोषे॑णग्मिषीय ॥ १९ ॥
अन्धं॑स्त्थ ॥ अन्ध॒स्त्थान्धों॑वो॑भक्षीय॒मह॑स्त्थ॒महों॑वो॑भक्षी॒योर्ज्जं॑स्त्थो
र्ज्जं॑वो॑भक्षीयरा॒यस्प्पोषं॑स्त्थरा॒यस्पोषं॑व्वो॑भक्षीय॥२०॥रेवं॑ती॒रमं॑ध्वम्॥
रेवं॑ती॒रमं॑ध्वम॒स्मिन्न्योनां॑व॒स्मिन्न्गो॒ष्ठे॒स्मिन्ल्लो॒के॒स्मिन्न्क्षयें॑॥इ॒हैव
स्त॒मापं॑गात् ॥२१॥ स॒ꣳहि॒तासिं॑ । वि॒श्वरू॒प्प्यू॒र्ज्जामा॑विंश॒गौप॒त्त्येन॑॥
उपं॑त्त्वाग्ने॒दि॒वेदि॑वे॒दोषां॑वस्त॒र्द्धि॒या॒व्व॒यम्॥ नमो॒भर॑न्त॒ऽएमं॑सि ॥२२॥
राजं॑न्तमध्व॒राणां॑म्॥ राजं॑तमध्व॒राणाङ्गो॒पामृ॒तस्य॒दीदि॑विम् ॥ व्वर्द्धं॑मा

न॒ꣳस्वेद॑मे॥२३॥सन॑ः॥ सन॑ःपि॒तेव॑सू॒नवेग्ने॑सूपा॒यनोभ॑व॥ सच॑स्वा
नꣳस्व॒स्तये॑॥२४॥अग्ने॒त्त्वम्॥ अग्ने॒त्त्वन्नो॒ऽअन्त॑मऽउ॒तत्रा॒ताशि॒वोभ॑
वाव्व॒रू॒त्थ्य॑ः॥ व॒सु॑र॒ग्निर्व्व॑सु॑श्श्रवा॒ऽअच्छा॑नाक्षि॒द्यु॒मत्त॑मꣳर॒यिन्दा॑ꣳ
॥ २५ ॥ तन्त्वा॑ ॥ तन्त्वा॑शोचिष्ठदीदि॒वꣳसु॒म्म्नाय॑नू॒नमी॑महे॒सखि॑
भ्यꣳ ॥ सनो॑बोधिश्श्रु॒धीहव॑मुरु॒ष्ष्याणो॑ऽअघा॒यतश्श॑मस्म्मात्
॥२६॥ इड॒ऽएहि॑॥ इड॒ऽएह्यदि॑त॒ऽएहि॒काम्म्या॒ऽएत॑॥ मयि॑वꣳकाम॒
धर॑णम्भूयात्॥२७॥सो॒मा॒नꣳस्वर॑णं। कृणु॒हिब्ब्र॑ह्म्मणस्प्पते॥ क॒क्षीवं॑

न्तंस्यऽऔशिजः ॥२८॥ योरेवान् ॥ योरेवान्योऽअमीवहाव्वसुवित्पु
ष्टिवर्द्धनꣳ ॥ सनः सिषक्तुयस्तुरः ॥२९॥ मानः ॥ मानꣳशꣳसोऽअर
रुषोधूर्तिः प्प्रणङ्मर्त्यस्य ॥ रक्षाणोब्रह्मणस्प्पते ॥३०॥ महित्रीणा
म् ॥ महित्रीणामवोस्तुद्युक्षम्मित्रस्यार्य्यम्णः ॥ दुराधर्षंव्वरुणस्य
॥ ३१ ॥ नहितेषाम् ॥ नहितेषाममाचननाद्ध्वसुव्वारणेषु ॥ ईशेरिपुर
घशꣳसꣳ ॥ ३२ ॥ तेहि । पुत्रासोऽअदितेꣳप्प्रजीवसेमर्त्त्याय ॥ ज्योति
र्य्यच्छन्त्यजस्रम् ॥ ३३ ॥ कदाचन । स्तरीरसिनेन्द्रसश्चसिदाशुषे ॥

उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यते ॥ ३४ ॥ तत्सवितुः ॥
तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि॥धियोयोन÷प्प्रचोदयात् ३५॥
शतम्॥१००॥परिते। दूडभोरथोस्म्माँ२॥अश्नोतुव्विश्वत÷ ॥ येनर
क्षसिदाशुष÷ ॥३६॥ [२६] भूर्ब्भुव÷ ॥ भूर्ब्भुवꣳस्व÷सुप्रजाःप्प्रजा
भि÷स्याꣳसुवीरोव्वीरैःसुपोषꣳपोषैः ॥ नर्यप्प्रजाम्मेपाहिशꣳस्यप
शून्मेपाह्यथर्यपितुम्मेपाहि॥३७॥आगन्म । व्विश्ववेदसमस्म्मब्भ्यं
वसुवित्तमम् ॥ अग्ग्नेसम्म्राडभिद्युम्म्नमभिसहऽआयच्छस्व ॥ ३८ ॥

अयमग्निः ॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्प्रजायांव्वसुवित्तमः ॥
अग्ग्नेगृहपतेभिद्द्युम्म्नमभिसहऽआयंच्छस्व ॥ ३९ ॥ अयमग्निः ॥ अ
यमग्निःपुरीष्ष्योरयिमान्पुष्टिवर्द्धनः ॥ अग्ग्नेपुरीष्ष्याभिद्द्युम्म्नम
भिसहऽआयंच्छस्व ॥४०॥ [४]गृहामा । बिभीतमावेपद्ध्वमूर्ज्जम्बि
ब्भ्रंतऽएमंसि ॥ ऊर्ज्जम्बिब्भ्रंद्वःसुमनाः सुमेधागृहानैमिमनंसामो
दंमानः ॥ ४१ ॥ येषामद्ध्येति । प्प्रवसन्न्येषुसौमनसोबहुः ॥ गृहानुपंह्व
यामहेतेनोंजानन्तुजानतः ॥ ४२ ॥ उपंहूताऽइह । गावऽउपंहूताऽ

अ॒जाव॑य÷॥अथो॒ऽअन्न॑स्यकी॒ला॒ल॒ऽउप॑हूतोगृ॒हेषु॑नꣳ॥क्षेमा॑यव॒ꣳशा
न्त्यै॒प्रप॑द्येशि॒वꣳश॒ग्मꣳशं॒ऽयोःशं॒ऽयोः॥४३॥[३]प्र॒घा॒सिनो॑हवाम
हे।म॒रुत॑श्चरि॒शाद॑सꣳ॥क॒र॒म्भेण॑स॒जोष॑सꣳ॥४४॥यद्ग्रामे॑॥यद्ग्रामे॒य
दर॑ण्ये॒यत्स॒भाया॒ꣳयदि॑न्द्रि॒ये॥यदेन॑श्चकृ॒माव॒यमि॒दन्तद॑वयजा
म॒हेस्वाहा॑॥४५॥मोषूण॑÷॥मोषूण॑ऽइ॒न्द्रात्र॑पृ॒त्सुदे॒वैरस्ति॒हिष्मा॑
तेशु॒ष्मिन्नव॒याः॥म॒हश्चि॒द्यस्य॑मी॒ढुषो॑य॒व्याह॒विष्म॑तोम॒रुतो॒व
न्द॑ते॒गीः॥४६॥अ॒क्रन्कर्म्म॑।क॒र्म्म॒कृत॑÷स॒हवा॒चाम॑यो॒भुवा॑॥दे॒वे

ब्भ्युक्थंकर्म्मंकृत्त्वास्तुम्प्रेतंसचाभुवं ॥४७॥ अवंभृथनिचुम्पुण । नि
चेरुरंसिनिचुम्पुणः ॥ अवंदेवैर्द्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्त्यंकृ
तम्पुरुराव्णोदेवरिषस्पाहि ॥ ४८ ॥ [ ५ ] पूर्ण्णादर्व्वि ॥ पूर्ण्णादर्व्विपरां
पतसुपूर्ण्णापुनरापत । वस्नेवविक्रीणावहाऽइषमूर्ज्जंशतक्रतो ४९
देहिमे ॥ देहिमेददामितेनिमेधेहिनितेदधे ॥ निहारंञ्चहरासिमेनि
हारन्निहराणितेस्वाहा ॥५०॥ अक्षन्नमीमदन्त ॥ अक्षन्नमीमदन्तह्य
वप्प्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजा

न्विन्द्रतेहरी॥५१॥सुसन्दृशन्त्वा ॥ सुसन्दृशन्त्वाव्वयम्मघवन्वन्दि
षीमहि ॥ प्रनूनम्पूर्णवन्धुरस्तुतोयासिव्वशाँ २॥ ऽअनुयोजान्विन्द्रते
हरी ॥ ५२ ॥ मनोनु ॥ मनोन्वाह्वामहेनाराशꣳसेनस्तोमेन ॥ पि
तॄणाञ्चमन्मभिः॥ ५३ ॥ आनं÷ ॥ आनऽएतुमनःपुनःक्रत्वेदक्षा
यजीवसे॥ ज्योक्चसूर्य्यन्दृशे॥५४॥ पुनर्न्न ऽं। पितरोमनोददातुदैव्यो
जनं÷ ॥ जीवंव्व्रातꣳसचेमहि ॥ ५५ ॥ व्वयꣳसोम। व्व्रतेतवमनस्तनूषु
बिभ्रतः ॥ प्रजावन्तꣳसचेमहि ॥ ५६ ॥ एषते। रुद्रभागःसहस्व

स्वाम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ ५७ ॥ अवरुद्रम् ॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोव्वस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यवसाययात् ॥ ५८ ॥ भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ५९ ॥ त्र्यम्बकंय्यजामहे । सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ६० ॥ एतत्ते । रुद्राव

सन्तेनंपरोमूजंवतोतीँहि ॥ अवंततधन्वापिनाकावसꣳकृत्तिंवासाऽअहिꣳसन्नःशिवोतीँहि ॥ ६१ ॥ त्र्यायुषंजमदंग्नेꣳकश्यपंस्यत्र्यायुषम् ॥ यद्देवेषुंत्र्यायुषन्तन्नोंऽअस्तुत्र्यायुषम् ॥६२॥ शिवोनामं ॥ शिवोनामांसिस्वधिंतिस्तेपितानमंस्तेऽअस्तुमामांहिꣳसीः ॥ निवंर्त्तयाम्म्यायुंषेन्नाद्यांयप्प्रजननांयरायस्प्पोषांयसुप्प्रजास्त्वायंसुवीर्य्यांय ॥ ६३ ॥ १० ॥ [ ७ ] इतिश्रीवाजसनेयसंहितायांतृतीयोऽध्यायः ॥ ३ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ एदंद्दे, मही

पा· विनियोगः।→

[ॐ एदमगन्मदेवयजनम्पृथिव्येति वासुदेव ऋषि: सोमो देवता, अतिच्छन्द श्री-फल-प्राप्तिकाम: पाठे विनियोग:॥४॥]

नाम्पयश्चतस्र, आकूत्या, ऋक्सामयो, र्द्विकौ, व्रतंकृणुतषडे, षते चतस्रो, वस्व्यसितिस्र, एषतेद्वे, शुक्रंत्वाचतस्रोदित्यास्त्वगष्टौ, दशसप्तत्रिꣳशत् ॥ १० ॥ हरिः ॐ॥ एदम् ॥ एदमंगन्मदेवयजंनम्पृथिव्यायत्रंदेवासोऽअजुंषन्तविश्वें ॥ ऋक्सामाभ्यांꣳसन्तरंन्तोयजुंर्भीरायस्पोषेंणसमिषामंदेम ॥ इमाऽआपःꣳशमुंमेसन्तुदेवीरोषंधेत्रायंस्वस्वधितेमैनंꣳहिꣳसीः ॥ १ ॥ आपोंऽअस्मान् ॥ आपोंऽअस्म्मान्न्मातरंः शुन्धयन्तुघृतेनंनोघृतप्वंः पुनन्तु ॥ विश्वꣳहि

रिप्प्रम्प्प्रवहन्तिदेवीरुदिदाब्भ्यःशुचिरापूतऽएमि ॥ दीक्षातपसोस्त
नूरसितान्त्वाशिवाꣳशग्ग्मामपरिदधेभद्द्रंव्वर्णम्पुष्ष्यन् ॥ २ ॥ [२]
महीनाम्पय÷ ॥ महीनाम्पयोसिव्वर्च्चोदाऽअसिव्वर्च्चोमेदेहि ॥ वृत्र
स्यासिकनीनकश्चक्षुर्द्दाऽअसिचक्षुर्म्मेदेहि ॥ ३ ॥ चित्पतिर्म्मा ॥ चि
त्पतिर्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुनात्वच्छिद्द्रेण
पवित्त्रेणसूर्य्यस्यरश्मिभि÷ ॥ तस्यतेपवित्त्रपतेपवित्त्रपूतस्ययत्त्का
मःपुनेतच्छकेयम् ॥ ४ ॥ आव÷ ॥ आवोदेवासऽईमहेव्वामम्प्रय

त्यध्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥ ५ ॥ स्वाहा
यज्ञम् ॥ स्वाहायज्ञंमनसःस्वाहोरोरन्तरिक्षात्स्वाहाद्यावापृथिवी
ब्भ्याꣳस्वाहाव्वातादारभेस्वाहा ॥ ६ ॥ [ ४ ] आकूत्यैप्प्रयुजे ॥ आकू
त्यैप्प्रयुजेग्नयेस्वाहामेधायैमनसेग्नयेस्वाहादीक्षायैतपसेग्नयेस्वा
हासरस्वत्यैपूष्णेग्नयेस्वाहा ॥ आपोदेवीर्बृहतीर्व्विश्वशम्भुवोद्या
वापृथिवीऽउरोऽअन्तरिक्ष ॥ बृहस्प्पतयेहविषाव्विधेमस्वाहा ॥ ७ ॥
व्विश्वोदेवस्य ॥ व्विश्वोदेवस्यनेतुर्म्मर्तोव्वुरीतसख्यम् ॥ व्विश्वोरायऽइषु

द्युतिद्युम्नंवृणीतपुष्ष्यसेस्वाहा॥८॥[२]ऋक्ख्सामयोःशिल्पे॥ऋ
क्ख्सामयोःशिल्पेस्त्थस्तेव्वामारंभेतेमांपातमास्ययज्ञस्योद्दचः ॥
शर्म्मासिशर्म्ममेयच्छनमस्तेऽअस्तुमामाहिꣳसीः ॥ ९ ॥ ऊर्ग्ग
सि ॥ ऊर्ग्गस्याङ्गिरस्यूर्णम्म्रदाऽऊर्ज्जंमयिधेहि ॥ सोमस्यनीविरसि
व्विष्ष्णोःशर्म्मासिशर्म्मयजमानस्येन्द्रस्ययोनिरसिसुसस्याःकृषी
स्कृधि ॥ उच्छ्रयस्ववनस्पतऽऊर्ध्वोमापाह्यꣳहसऽआस्ययज्ञस्यो
द्दचः ॥ १० ॥ [२] व्व्रतङ्कृणुत । व्व्रतङ्कृणुताग्निर्ब्ब्रह्माग्निर्य्यज्ञोव्वन

स्प्पति॑र्य॒ज्ञियः॑ ॥ दैवी॒न्धियं॑म्मनामहेसुमृडी॒काम॒भिष्ट॑येवर्च्चो॒धां
य॒ज्ञवा॑हसꣳसुती॒र्थानो॑ऽअस॒द्वशे॑ ॥ येदे॒वामनो॑जातामनो॒युजो॒द
क्ष॑क्क्रतव॒स्तेनो॑वन्तु॒तेनः॑पान्तु॒तेभ्य॒ꣳस्वाहा॑ ॥ ११ ॥ श्वा॒त्त्राःपी॒ताः ॥
श्वा॒त्त्राःपी॒ताभ॑वतयू॒यमा॑पोऽअ॒स्माक॑म॒न्तरु॒दरे॑सु॒शेवा॑ꣳ ॥ ताऽअ॒
स्म्मभ्यं॑मय॒क्ष्म्माऽअ॑नमी॒वाऽअना॑गस॒ꣳस्वद॑न्तुदे॒वीर॒मृता॑ऽऋता॒
वृधः॑ ॥ १२ ॥ इ॒यन्ते॑ । य॒ज्ञिया॑न्त॒नूर॒पोमु॑ञ्चामि॒नप्र॒जाम् ॥ अ॒ꣳ
हो॒मुच॒ꣳस्वाहा॑क्कृताꣳपृथि॒वीमावि॑शतपृथि॒व्यासम्भ॑व ॥ १३ ॥ अग्ने॒

त्वम् ॥ अग्नेत्वꣳसुजांगृहिव्वयꣳसुमंन्दिषीमहि ॥ रक्षांणोऽअप्प्रंयु
च्छन्प्रबुधेनꣳपुनंस्कृधि ॥ १४ ॥ पुनर्म्मनंः ॥ पुनर्म्मनꣳपुनरायुंर्म्म
ऽआगन्पुनंः प्प्राणश्पुनंरात्त्मामऽआगन्पुनश्चक्षुꣳपुनꣳश्रोत्रंम्मऽ
आगंन् ॥ वैश्वानरोऽअदंब्धस्तनूपाऽअग्निर्न्नंः पातुदुरितादंवद्यात्
॥ १५ ॥ त्वमंग्ने । व्व्रतपाऽअंसिदेवऽआमर्त्त्येंष्ष्वा ॥ त्वंयज्ञेष्ष्वीड्यंः
॥ रास्वेयंत्सोमाभूयोंभरदेवोनंः सविताव्वसोंर्द्दाताव्वस्वंदात् ॥ १६ ॥
[ ६ ] एषातें । शुक्रतनूरेतद्वर्च्चस्तयासम्भंवभ्राजंङ्गच्छ ॥ जूरंसिधृता

मन॑सा॒जुष्टा॒व्विष्ष्ण॑वे ॥१७॥ तस्या॑स्ते । स॒त्त्यस॑वसᳲप्प्रस॒वेत॒न्न्वो॑य॒न्त्र
म॑शीय॒स्वाहा॑ ॥ शु॒क्रम॑सिच॒न्द्रम॑स्य॒मृत॑मासिव्वैश्श्वदे॒वम॑सि ॥ १८ ॥
चिद॑सि । म॒ना॒सि॒धीर॑सि॒दक्षि॑णासिक्ष॒त्त्रिया॑सिय॒ज्ञिया॒स्यदि॑तिरस्यु
भयतᳲशी॒र्ष्ण्णी ॥ सान॒ᳲसुप्प्रा॑ची॒सुप्प्र॑तीच्च्येधिमि॒त्त्रस्त्वा॑प॒दिब॑ध्ध्नी
ताम्पू॒षाद्ध्व॑नस्प्पा॒त्त्विन्द्रा॒याद्ध्य॑क्षाय ॥ १९ ॥ अनु॑त्वा । मा॒ताम॑न्न्यता॒
मनु॑पि॒तानु॒ब्भ्राता॒सग॒ब्भ्यो॑नु॒सखा॒सयू॑त्थ्यᳲ ॥ सादे॑विदे॒वमच्छे॒ही
न्द्रा॑य॒सोम॑ꣳरु॒द्रस्त्वाव॑र्त्तयतुस्व॒स्तिसोम॑सखा॒पुन॒रेहि॑ ॥ २० ॥ [ ४ ॥

व्वस्व्यसि ॥ व्वस्व्यस्यदितिरस्यादित्त्यासिरुद्द्रासिचन्द्द्रासि ॥ बृहस्प
तिष्ट्वासुम्म्नेरम्म्णातुरुद्द्रोव्वसुभिराचके ॥ २१ ॥ अदित्त्यास्त्वा । मू
र्द्धन्नाजिघर्म्मिदेवयजनेपृथिव्व्याऽइडायास्प्पदमसिघृतवत्स्वाहा ॥
अस्म्मेरमस्वास्म्मेतेबन्धुस्त्वेरायोमेरायोमाव्वयꣳरायस्प्पोषेणव्वियौ
ष्म्मतोतोरायः ॥ २२ ॥ समख्ख्ये । देव्व्याधियासन्दक्षिणयोरु
चक्षसा ॥ मामऽआयुꣳप्प्रमोषीर्म्मोऽअहन्तवव्वीरंव्विदेयतवदेविसन्दृ
शि ॥ २३ ॥ [ ३ ] एषते । गायत्त्रोभागऽइतिमेसोमायब्रूतादेषतेत्त्रै

ष्टु॑भोभा॒गऽइति॑मे॒सोमा॑यब्रूतादु॒षते॒जाग॑तोभा॒गऽइति॑मे॒सोमा॑यब्रूता
च्छन्दोना॒माना॒ꣳसाम्म्रा॑ज्ज्यङ्ग॒च्छेति॑मे॒सोमा॑यब्रूतादा॒स्म्मा॒कोसि
शुक्क्रस्ते॒ग्ग्रह॒यो॑र्व्वि॒चित॑स्त्वा॒व्विचि॑न्वन्तु ॥ २४ ॥ अ॒भित्त्यम् ॥ अ॒
भित्त्यन्दे॒वꣳस॑वि॒तार॑म्मो॒ण्यो॑÷क॒विक्क्र॑तु॒मर्च्चा॑मिस॒त्त्यस॑वꣳरत्न॒धाम॒
भि॒प्प्रि॒यम्म॒तिङ्क॒विम् ॥ ऊ॒र्द्ध्वाय॒स्या॒मति॒र्भाऽअदि॑द्द्युत॒त्त्सवी॑मानि॒
हि॑रण्ण्यपाणिरमिमीतसु॒क्क्रतु॒÷कृ॒पास्व॑÷ ॥ प्र॒जाब्भ्य॑स्त्वाप्प्र॒जास्त्वा॑

नु॒प्प्राण॑न्तु॒प्प्र॒जास्त्वम॑नु॒प्प्राणि॑हि ॥ २५ ॥ [२] शु॒क्रन्त्वा॑ । शु॒क्रे

ण॑क्रीणामिच॒न्द्रञ्च॒न्द्रेणा॒मृत॑म॒मृते॑न ॥ स॒ग्ग्मेते॒गोर॒स्म्मेते॑च॒न्द्राणि॒तप॑सस्त॒नूर॑सिप्र॒जाप॑ते॒र्व्वर्ण्ण॑÷प॒रमेण॑प॒शुना॑क्रीयसेसहस्र॒पो॑षम्पु॑षेयम् ॥ २६ ॥ मि॒त्रोन॑÷ ॥ मि॒त्रोन॒ऽएहि॒सुमि॑त्रध॒ऽइन्द्र॑स्यो॒रुमावि॑श॒दक्षि॑णमु॒शन्नु॒शन्त॑ꣳस्यो॒नःस्यो॒नम् ॥ स्वान॒भ्राजाङ्घा॑रे॒बम्भा॑रे॒हस्त॒सुह॑स्त॒कृशा॑नवे॒तेव॑÷सोम॒क्रय॑णा॒स्तान्र॑क्षद्ध्व॒म्मावो॑दभन् ॥ ॥ २७ ॥ परि॑मा । ग्ने॒दुश्च॑रिताद्बा॒धस्वा॒मा॒सुच॑रितेभज ॥ उदा॒यु॑षास्वा॒युषोद॑स्थाम॒मृता॒ँ२॥ऽअनु॑ ॥ २८ ॥ प्रति॒पन्था॑म् ॥ प्रति॒पन्था॑मप

झहिस्वस्तिगामनेहसम् ॥ येनविश्वाःपरिद्विषोवृणक्तिविन्दतेवसु
॥२९॥ [ ४ ] अदित्यास्त्वक् ॥ अदित्यास्त्वगस्यादित्त्यैसदऽआसी
द ॥ अस्तभ्नाद्यांवृषभोऽअन्तरिक्षममिमीतवरिमाणम्पृथिव्याः ॥
आसीदद्विश्वाभुवनानिसम्म्राड्विश्वेत्तानिवरुणस्यव्रतानि ॥ ३० ॥
वनेषुवि ॥ वनेषुव्यन्तरिक्षन्ततानवाजमर्वत्सुपयऽउस्रियासु ॥
हृत्सुक्रतुंवरुणोविक्ष्वग्निन्दिविसूर्य्यमदधात्सोममद्रौ ॥ ३१ ॥
सूर्य्यस्यचक्षुः ॥ सूर्य्यस्यचक्षुरारोहाग्नेरक्ष्णःकनीनकम् ॥ यत्रैतंशे

भि॒रीय॑से॒भ्राज॑मानोव्वि॒पश्चि॑ता ॥ ३२ ॥ उस्रा॒वेत॑म् ॥ उस्रा॒वेत॑न्धू
र्षाहौ॒युज्ज्येथा॑मन॒श्रूऽअवी॑रहणौब्ब्रह्म॒चोद॑नौ ॥ स्व॒स्तियज॑मानस्य
गृ॒हान्ग॑च्छतम् ॥ ३३ ॥ भ॒द्रोमे॑ । सि॒प्प्रक्ष्य॑वस्वभुवस्प्पते॒व्विश्वा॑न्य॒
भि॒धामा॑नि ॥ मात्त्वा॑परिप॒रिणो॑व्विद॒न्मात्वा॑परिप॒न्थिनो॑व्विद॒न्मा
त्वा॒वृका॑ऽअघा॒यवो॑व्विदन् ॥ श्ये॒नोभूत्वापरा॑पत॒यज॑मानस्यगृहान्ग॑
च्छ॒तन्नौ॑सँस्कृतम् ॥ ३४ ॥ नमो॑मि॒त्त्रस्य॑ ॥ नमो॑मि॒त्त्रस्य॒व्वरु॑णस्य॒च
क्ष॑सेम॒हो दे॒वाय॒तद्दृ॒तꣳस॑पर्य्यत ॥ दू॒रेद्दृशे॑दे॒वजा॑ताय के॒तवो॑दि॒वस्पु

त्रायसूर्य्याँयशꣳसत ॥ ३५ ॥ व्वरुंणस्योत्तम्भंनम् ॥ व्वरुंणस्योत्तम्भंन
मसिव्वरुंणस्यस्कंम्भसर्ज्जँनीस्त्थोव्वरुंणस्यऽऋतसदंन्यसिव्वरुंणस्यऽ
ऋतसदंनमसिव्वरुंणस्यऽऋतसदंनमासींद ॥ ३६ ॥ यातें ॥ यातेधामांनि
हविषायजंन्तितातेव्विश्श्वांपरिभूरंस्तुयज्ञम् ॥ गयस्स्फानंः प्प्रतरंणꣳ
सुवीरोवींरहाप्प्रचंरासोमदुर्य्याँन् ॥ ३७ ॥ [८] इतिश्रीवाजसनेयसं
हितायांचतुर्थोऽध्यायः ॥ ४ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम्
अग्नेस्तनू, रापतयेत्वा, चतुष्कौ, तप्तायनीमेद्धे, इन्द्रघोषस्त्वास्तिस्रो,

[ॐ अग्नेस्तनूरसीति ब्रह्मदेव ऋषि र्विश्वेदेवा दैंवता: विराट् छन्दो बृहज्जन्म-फल प्राप्तिकाम: -
पाठे विनियोग:॥ ५॥]

युंजतेमनाष्टौ, देवस्यत्वाचतस्रो, देवस्यत्वापंच, विभूरसिचतस्रो, ज्योतिरसि, षडुरुव्विष्णोतिस्रो, दश, त्रिचत्वारिꣳशत्॥हरिःॐ॥ अ॒ग्नेस्त॒नूः॥अ॒ग्नेस्त॒नूर॑सि॒व्विष्ण॑वेत्त्वा॒सोम॑स्यत॒नूर॑सि॒व्विष्ण॑वे॒त्त्वाति॑थेराति॒त्थ्यम॑सि॒व्विष्ण॑वेत्त्वाऽश्ये॒नाय॑त्त्वासोम॒भृते॒व्विष्ण॑वेत्त्वा॒ग्नये॑त्त्वाराय॒स्प्पोष॒देव्विष्ण॑वेत्त्वा॥१॥अ॒ग्नेर्ज॒नित्र॑म्॥ अ॒ग्नेर्ज॒नित्र॑मसि॒वृष॑णौस्त्थऽउ॒र्व्वश्य॑स्या॒युर॑सिपुरू॒रवा॑ऽअसि॥ गा॒य॒त्रेण॑त्त्वा॒च्छन्द॑सामन्थामि॒त्रैष्टु॑भेनत्त्वा॒च्छन्द॑सामन्थामि॒जाग॑तेनत्त्वा॒च्छन्द॑सामन्था

मि॥२॥भव॑तन्नः ॥ भव॑तन्न॒ः सम॑नसौ॒ सचे॑तसावरे॒पसौ॑ ॥ माय॒ज्ञꣳहि॑ꣳ
सिष्टम्माय॒ज्ञप॑तिञ्जातवेदसौ शि॒वौ भ॑वतम॒द्य नः॥३॥अ॒ग्नाव॒ग्निः ॥
अ॒ग्नाव॒ग्निश्च॑रति॒प्प्रवि॑ष्टऽऋषी॑णाम्पु॒त्रोऽअ॑भिशस्ति॒पावा॑ ॥ सन॑ः
स्यो॒नः सु॒यजा॑यजे॒ह दे॒वेभ्यो॑ ह॒व्यꣳसद॒मप्प्र॑युच्छ॒न्त्स्वाहा॑ ॥ ४ ॥[४]
आप॑तयेत्त्वा ॥ आप॑तयेत्त्वा॒परि॑पतयेगृह्णामि॒तनू॒नप्त्रे॑शाक्व॒राय॒श
क्व॑न॒ऽओजि॑ष्ठाय ॥ अना॑धृष्टमस्यनाधृ॒ष्यन्दे॒वाना॒मोजो॒न॑भिश
स्त्यभिशस्ति॒पाऽअ॑नभिशस्ते॒न्यमञ्ज॑सास॒त्त्यमु॒प॑गेषꣳस्वि॒तेमा॑

धाꣳ ॥ ५ ॥ अग्ग्ने॑व्व्रतपाꣳ ॥ अग्ग्ने॑व्व्रतपा॒स्त्वेव्व्र॑तपा॒यातव॑तनू॒रि॒यꣳसाम
यि॒योमम॑त॒नूरे॒षासात्वयि॑ ॥ स॒हनौ॑व्व्रतपतेव्व्र॒तान्न्यनु॑मेदी॒क्षान्दी॒
क्षाप॑ति॒र्म्मन्न्ये॑ता॒मनुतप॒स्तप॑स्प्पतिꣳ ॥ ६ ॥ अ॒ꣳ॒शुरꣳ॑शु॒ष्टे । देवसो॒मा
प्प्या॑यता॒मिन्द्रा॑यैकध॒नाविदे॑ ॥ आतु॒भ्भ्यमि॒न्द्र॒ꣳप्प्याय॑न्ता॒मात्त्वमि
न्द्रा॑यप्प्यायस्व ॥ आप्प्या॑यया॒स्म्मान्त्सखी॑न्त्स॒न्न्यामे॒धया॑स्व॒स्ति
ते॑देवसोमसु॒त्त्याम॑शीय ॥ एष्टा॒राय॒ꣳप्प्रेषेभगा॑यऽऋ॒तमृ॑तवा॒दिभ्भ्यो॒
नमो॒द्यावा॑पृथि॒वीभ्या॑म् ॥ ७ ॥ याते॑ ॥ याते॑ऽअग्ग्नेयꣳ॒शयात॒नूर्व्व

संहि. षिँष्ठागह्वरे॒ष्ठा ॥ उ॒ग्रंव्व॑चो॒ऽअपा॑वधीत्त्वे॒षंव्व॑चो॒ऽअपा॑वधी॒त्स्वाहा॑ ॥ पू. अ.
॥२९॥ यातेँऽअग्नेरजःश॒यात॒नूर्व्वर्षिँष्ठागह्वरे॒ष्ठा ॥ उ॒ग्रंव्व॑चो॒ऽअपा॑वधीत्त्वे॒षं ॥५॥
व्व॒चो॒ऽअपा॑वधी॒त्स्वाहा॑ ॥ यातेँऽअग्नेहरिश॒यात॒नूर्व्वर्षिँष्ठागह्वरे॒ष्ठा ॥
उ॒ग्रंव्व॑चो॒ऽअपा॑वधीत्त्वे॒षंव्व॑चो॒ऽअपा॑वधी॒त्स्वाहा॑ ॥ ८ ॥ [४] त॒प्ताय॑
नीमे ॥ त॒प्तायंनीमेसिव्वि॒त्ता!यंनीमे॒स्यवंतान्मानाथि॒ताद्वंतान्मा
व्यथि॒तात् ॥ व्वि॒देद॒ग्निर्न्नभो॒नामाग्नेँऽअङ्गिर॒ऽआयुं॒नानाम्नेहि॒यो ॥२९॥
स्याम्पृथि॒व्यामसि॒यत्तेनाधृष्टन्नामं॑य॒ज्ञियन्तेन॒त्त्वादंधेव्वि॒देद॒ग्निर्न्न

भो॒नामाग्ने॑ऽअङ्गिर॒ऽआयु॑ना॒नाम्नेहि॒योद्वि॒तीय॑स्याम्पृथि॒व्यामसि॒यत्तेना॑धृष्टन्नाम॑य॒ज्ञिय॒न्तेन॒त्त्वाद॑धे॒व्वि॒देद॒ग्निर्न्नभो॒नामाग्ने॑ऽअङ्गिर॒ऽआयु॑ना॒नाम्नेहि॒यस्तृ॒तीय॑स्याम्पृथि॒व्यामसि॒यत्तेना॑धृष्टन्नाम॑य॒ज्ञिय॒न्तेन॒त्त्वाद॑धे ॥ अनु॑त्वादे॒ववी॑तये ॥ ९ ॥ सि॒ꣳ॒ह्यसि । सपत्नसा॒हीदे॒वेभ्य॑ःकल्पस्वसि॒ꣳ॒ह्यसिसपत्नसा॒हीदे॒वेभ्य॑ःशुन्धस्वसि॒ꣳ॒ह्यसिसपत्नसा॒हीदे॒वेभ्य॑ःशुम्भस्व ॥ १० ॥ [२] इ॒न्द्र॒घो॒षस्त्वा॑ ॥ इ॒न्द्र॒घो॒षस्त्वा॒व्वसु॑भिःपु॒रस्ता॑त्पातुप्रचे॑तास्त्वारु॒द्रैःप॒श्चा

त्पा॑तु॒मनो॑जवास्त्वापि॒तृभि॑र्दक्षिण॒तः पा॑तु॒वि॒श्वक॑र्म्मा॑त्त्वादि॒त्त्यैरु॑त्त
र॒तःपा॑त्वि॒दम॒हन्त॒प्तं॑वार्ब॑हि॒र्द्धा॑य॒ज्ञान्निःसृ॑जामि ॥ ११ ॥ सि॒ꣳ
ह्य॒सि ॥ सि॒ꣳह्य॒सिस्वाहा॑सि॒ꣳह्य॒स्यादित्य॒वनि॒ꣳस्वाहा॑सि॒ꣳह्य॒सिब्र
ह्म॒वनि॑÷क्षत्र॒वनि॒ꣳस्वाहा॑सि॒ꣳह्य॒सिसुप्रजा॒वनी॑रायस्पोष॒वनि॒ꣳ
स्वाहा॑सि॒ꣳह्य॒स्याव॑हदे॒वान्यज॑माना॒यस्वाहा॑भू॒तेभ्य॑स्त्वा ॥ १२ ॥
ध्रु॒वो॑सि । पृ॒थि॒वीन्दृ॑ꣳहद्ध्रु॒वक्षि॒द॑स्य॒न्तरि॑क्षन्दृꣳहाच्यु॒तक्षि॒द॑सि॒दिव॑
न्दृꣳहा॒ग्नेः पुरी॑षमासि ॥ १३ ॥ [ ३ ] यु॒ञ्जते॒मन॑÷ ॥ यु॒ञ्जते॒मन॑ऽउ॒

तयुञ्जतेधियोव्विप्राव्विप्पस्यबृहतोव्विपश्चितः ॥ व्विहोत्रादधेव्वयुना
विदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिःस्वाहा ॥ १४ ॥ इदंव्विष्णुः ॥
इदंव्विष्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा
॥ १५ ॥ इरावतीधेनुमती ॥ इरावतीधेनुमतीहिभूतꣳसूयवसिनीम
नवेदशस्या ॥ व्यस्कभ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोम
यूखैःस्वाहा ॥ १६ ॥ देवश्श्रुतौदेवेषु ॥ देवश्श्रुतौदेवेष्वाघोषतम्प्रा
चीप्प्रेतमद्ध्वरङ्कल्पयन्तीऽऊर्द्ध्वय्यज्ञन्नयतम्माजिह्वरतम् ॥ स्वङ्गो

ष्ठमावदतन्देवीदुर्र्येऽआयुर्म्मानिर्व्वादिष्टम्प्रजाम्मानिर्व्वादिष्टमत्रर
मेथांव्वर्ष्म्मन्पृथिव्याः॥ १७॥ व्विष्णोर्न्नु। कंव्वीर्य्याणिप्प्रवोचंयः
पार्थिवानिव्विममेरजांꣳसि ॥ योऽअस्कभायदुत्तरꣳसधस्थंव्विचक्र
माणस्त्रेधोरुगायोव्विष्णवेत्वा ॥ १८ ॥ दिवोवा। व्विष्णऽउतवापृ
थिव्यामहोवाव्विष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ताव्वसुनापृणस्वा
प्प्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वा ॥१९॥ प्रतत् ॥ प्रतद्विष्णु
स्तवतेव्वीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुव्विक्रम

णेष्ष्वधिक्षि॒यन्ति॒भुवं॑ना॒नि॒व्विश्श्वा॑ ॥ २० ॥ व्विष्ष्णो॑ँर॒राटं॑म् ॥ व्विष्ष्णो॑
र॒राटं॑मसि॒व्विष्ष्णो॒ः श्नप्त्रें॑स्थो॒व्विष्ष्णो॒ः स्यूरं॑सि॒व्विष्ष्णो॑र्द्ध्रु॒वो॑सि ॥ वै॒
ष्ष्ण॒वमं॑सि॒व्विष्ष्णं॑वेत्त्वा ॥ २१ ॥ [ ८ ] दे॒वस्यं॑त्त्वा । स॒वि॒तुः प्प्रं॑स॒वे॒
श्श्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्ष्णोहस्तां॑ब्भ्याम् ॥ आद॑दे॒नार्यँ॑सी॒दम॒हꣳरक्षं॑
साङ्ग्रीवाऽअपिं॑कृन्तामि ॥ बृ॒हन्नं॑सिबृ॒हद्द्रं॑वाबृ॒ह॒तीमिन्द्रा॑य॒व्वाचं॑व्वद
॥ २२ ॥ र॒क्षो॒हणं॑व्वलग॒हनं॑म् ॥ र॒क्षो॒हणं॑व्वलग॒हनं॑व्वैष्ष्ण॒वीमि॒दम॒ह
न्तंव्वं॑लगमु॒त्किरा॑मि॒यम्मे॑निष्ट्यो॒यम॑मात्यो॑निच॒खाने॒दम॒हन्तंव्वं॑ल॒

गमुत्कि॑रामि॒यम्मे॑स॒मानो॒यमस॑मानो॒निच॒खाने॒दम॒हन्तंव्व॑ल॒गमुत्कि॑रामि॒यम्मे॒सब॑न्धु॒र्यमस॑बन्धु॒र्निच॒खाने॒दम॒हन्तंव्व॑ल॒गमुत्कि॑रामि॒यम्मे॑सजा॒तो॒यमस॑जातो॒निच॒खानोत्कृ॒त्याङ्कि॑रामि ॥ २३ ॥ स्व॒राड॑सि । सपत्न॒हा स॑त्र॒राड॑स्यभिमाति॒हाज॑न॒राड॑सिरक्षो॒हास॑र्व्व॒राड॑स्यमित्र॒हा ॥ २४ ॥ र॒क्षो॒हणो॑वः ॥ र॒क्षो॒हणो॑वोव्वलग॒हनः॒प्प्रोक्षा॑मिव्वैष्ण॒वान्र॑क्षो॒हणो॑वोव्वलग॒हनो॒व॑नयामिव्वैष्ण॒वान्र॑क्षो॒हणो॑वोव्वलग॒हनो॒व॑स्तृणामिव्वैष्ण॒वान्र॑क्षो॒हणौ॑वांव्वलग॒हना॒ऽउप॑दधामिव्वै

ष्ण॒वीर॑क्षो॒हणौ॑वांव्वलग॒हनौ॒प॑र्य्यूहामिवैष्ण॒वीवै॑ष्ण॒वम॑सिवैष्ण॒
वास्थ॑ ॥ २५ ॥ [ ४ ] दे॒वस्य॑त्त्वा । सवि॒तुःप्प्र॑स॒वेश्विनो॑र्ब्बा॒हुब्भ्या॑
म्पू॒ष्णोहस्ता॑ब्भ्याम् ॥ आद॑दे॒नार्य्य॑सी॒दम॒हꣳरक्ष॑साङ्ग्री॒वाऽअपि॑कृ
न्तामि ॥ यवो॑सिय॒वया॒स्म्मद्द्वेषो॑य॒वयारा॑तीर्द्दि॒वेत्त्वा॒न्तरि॑क्षायत्त्वा
पृथि॒व्यैत्त्वा॒शुन्ध॑न्ताल्लो॒काःपि॑तृ॒षद॑नाःपितृ॒षद॑नमसि ॥ २६ ॥ उद्दि
व॑म् ॥ उद्दिव॑ꣳस्तभा॒नान्तरि॑क्षम्पृण॒दृꣳह॑स्वपृथि॒व्यान्द्द्यु॑ता॒नस्त्वा॑मा
रु॒तोमि॑नोतुमि॒त्त्रावरु॑णौद्ध्रुवेण॒धर्म्म॑णा ॥ ब्र॒ह्म॒वनि॑त्त्वाक्षत्त्र॒वनि॑राय

स्पोष॒वनि॒पर्यूहामि ॥ ब्रह्म॑दृꣳहक्ष॒त्रन्दृ॒ꣳहायु॑र्दृꣳहप्र॒जान्दृ॑ꣳह
॥ २७ ॥ ध्रु॒वासि॑ । ध्रु॒वो॒य॑य्यज॑मानो॒स्मिन्ना॒य॑तनेप्र॒जया॑प॒शुभि॑र्भू
यात् ॥ घृ॒तेन॑द्यावापृथिवीपूर्य्ये॑था॒मिन्द्र॑स्यच्छ॒दिर॑सिविश्वज॒नस्य॑
च्छा॒या ॥ २८ ॥ परि॑त्त्वा । गिर्व्व॑णो॒गिर॑ऽइ॒माभ॑वन्तुवि॒श्वत॑ः ॥
वृ॒द्धायु॒मनु॒वृद्ध॑यो॒जुष्टा॑भवन्तु॒जुष्ट॑यꣳ ॥ २९ ॥ इंद्र॑स्य॒स्यूः ॥ इन्द्र॑स्य॒
स्यूर॒सीन्द्र॑स्यद्ध्रु॒वोसि ॥ ऐ॒न्द्रम॑सिवैश्वदे॒वम॑सि ॥ ३० ॥ [ ५ ] वि॒भू
र॑सि । प्र॒वाह॑णो॒वह्नि॑रसिहव्य॒वाह॑नꣳ ॥ श्वा॒त्रोसि॒प्रचे॑तास्तु॒थोसि

वि॒श्ववे॑दाऽउ॒शिग॑सि ॥ ३१ ॥ उ॒शिग॑सि । क॒विरङ्घा॑रिरसि॒बम्भा॑रि
र॒वस्यूर॑सि॒दुव॑स्वाञ्छु॒न्ध्यूर॑सिमार्ज्जा॒लीय॑ःस॒म्म्राड॑सिकृ॒शानु॑ःप
रि॒षद्यो॑सि॒पव॑माना॒नभो॑सि॒प्प्रत॒क्वा॑मृ॒ष्टो॑सिह॒व्य॒सूद॑नऽऋ॒तधा॑मा
सि॒स्व॒र्ज्ज्योति॑ःस॒मु॒द्रो॑सि ॥ ३२ ॥ स॒मु॒द्रो॑सि । वि॒श्वव्य॑चाऽअ॒जो॑स्येक॑
पा॒दहि॑रसि॒बु॒ध्न्यो॒वाग॑स्यै॒न्द्रम॑सि॒सदो॒स्यृत॑स्य॒द्वारौ॒मामा॒सन्ता॑प्त॒म
ध्व॑नामध्वपते॒प्प्रमा॑तिरस्व॒स्तिमे॒स्मिन्प॒थिदे॑व॒याने॑भूयान्मि॒त्रस्य॑मा
॥ ३३ ॥ मि॒त्रस्य॑मा ॥ मि॒त्रस्य॑मा॒ चक्षु॑षेक्षध्व॒मग्न॑यःसगराःसग॑रास्थ॒

सगरेणनाम्नारौद्रेणानीकेनपातमाग्नयःपिपृतमाग्नयोगोपायत
मानमोवोस्तुमामाहिꣳसिष्ट ॥ ३४ ॥ [ ४ ] ज्योतिरसि । विश्वरू
पंविश्वेषान्देवानाꣳसमित् ॥ त्वꣳसोमतनूकृद्भ्योद्वेषोभ्योन्यकृते
भ्यऽउरुयन्तासिवरूथꣳस्वाहाजुषाणोऽअप्तुराज्यस्यवेतुस्वाहा
॥३५॥ शतम् ॥२००॥ अग्नेनय । सुपथारायेऽअस्मान्विश्वानिदेव
वयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिं
विधेम ॥ ३६ ॥ अयन्नः ॥ अयन्नोऽअग्निर्वरिवस्कृणोत्वयम्मृधः

पुरऽएंतुप्प्रभिन्दन् ॥ अयंव्वाजांञ्जयतुव्वाजंसातावयꣳशत्रूँञ्जयतुजर्हृ
षाणꣳस्वाहां ॥ ३७ ॥ उरुव्विंष्णो ॥ उरुव्विंष्णोव्विक्कंमस्वोरुक्षयां
यनस्कृधि ॥ घृतंघृंतयोनेपिबप्प्रप्प्रंयज्ञपंतिन्तिरस्वाहां ॥ ३८ ॥ देवं
सवितꣳ ॥ देवंसवितरेषतेसोमस्तꣳरंक्षस्वमात्वांदभन् ॥ एतत्वन्देंव
सोमदेवोदेवाँ २ ॥ ऽउपांगाऽइदमहम्मंनुष्ष्यान्त्सहरायस्पोषेंणस्वा
हानिर्व्वंरुणस्यपाशांन्मुच्ये ॥ ३९ ॥ अग्ग्नेंव्व्रतपाꣳ ॥ अग्ग्नेंव्व्रतपास्त्वे
व्व्रंतपायातवंतनूर्म्मंय्यभूंदेषासात्वयियोममंतनूस्त्वय्यभूंदियꣳ

सामयि॑ ॥ य॒था॒य॒थन्नौ॑व्व्रतपतेव्व्र॒तान्यनु॑मेदी॒क्षान्दी॒क्षाप॑ति॒रम॒ꣳ
स्तानु॒तप॒स्तप॑स्प्पतिः ॥ ४० ॥ [ ६ ] उ॒रुव्वि॑ष्णो ॥ उ॒रुव्वि॑ष्ण॒ोव्विक्क्र॑
मस्वो॒रुक्षया॑यनस्कृधि ॥ घृ॒तङ्घृ॑तयोने॑पिब॒प्प्रप्र॑य॒ज्ञप॑तिन्तर॒स्वाहा॑
॥ ४१ ॥ अत्त्य॒न्न्यान् ॥ अत्त्य॒न्न्याँ२॥ऽअगा॒न्नान्न्याँ२॥ऽउपा॑गाम॒व्वा॑
क्त्वा॒परे॒भ्भ्योवि॑दम्प॒रोव॑रेभ्भ्यः ॥ तन्त्वा॑जुषामहेदेवव्वनस्प्पतेदेव
य॒ज्ज्यायै॑दे॒वास्त्वा॑देवय॒ज्ज्यायै॑जुष॒न्ता॒व्विष्ण॑वेत्त्वा ॥ ओष॑धे॒त्त्राय॑स्व॒
स्वधि॑ते॒मैनꣳ॑हिꣳसीः ॥ ४२ ॥ द्याम्मा ॥ द्याम्मालेखीर॒न्तरि॑क्ष॒

म्माहिꣳसीꣳपृथिव्यासम्भव ॥ अयꣳहित्वास्वाधितिस्तेतिजानꣳप्प्रणि
नायमहतेसौभगाय ॥ अतस्त्वन्देवव्वनस्प्पतेशतवल्शोव्विरोहसहस्र
वल्शाव्विवयꣳरुहेम ॥ ४३ ॥ [३] १० ॥ इतिश्रीवाजसनेयसंहितायां
पंचमोऽध्यायः ॥ ५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ देवस्य
त्त्वा, षडुपावीरसिपंच, माहिःषट्, संतेतिस्रः, समुद्रंगच्छ, हविष्मती
रिमाद्विकौ, हृदेत्वापंच, देवस्यत्वाष्टौ, सप्तत्रिꣳशत् ॥ हरिः ॐ ॥ देव
स्यत्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ आदे

[ॐ देवस्यत्वा सवितु रित्यस्य हिरण्यगर्भऋषि: सवितादेवता गायत्रीछन्दोयज्ञाधीशफलप्राप्तिकाम:
पाठे विनियोग: ॥ ६ ॥]

दे॒ना॒र्य॑सी॒द॒म॒हᳪरक्ष॑सा॒ङ्ग्रीवा॒ऽअपि॑कृन्तामि ॥ य॒वो॑सिय॒वया॒स्मद्द्वे
षो॑य॒वयारा॑ती॒र्दि॒वेत्त्वा॒न्तरि॑क्षायत्त्वापृथि॒व्यैत्त्वा॒शुन्ध॑न्ताल्लो॒काः
पि॑तृ॒षद॑नाःपि॑तृ॒षद॑नमसि ॥ १ ॥ अ॒ग्रे॒णीर॑सि । स्वा॒वे॒शऽउ॑न्ने॒तॄणा
मे॒तस्य॑वि॒त्ता॒दधि॑त्वास्थास्यतिदे॒वस्त्वा॑सवि॒तामध्वा॑नक्तुसुपिप्प॒ला
भ्य॒स्त्वौष॑धीभ्यः ॥ द्याम॑ग्रे॑णास्पृक्ष॒ऽआन्तरि॑क्ष॒म्मध्ये॑नाप्राःपृ
थि॒वीमु॒प॑रेणादृᳪहीः ॥ २ ॥ याते॑ ॥ याते॒धामा॑न्यु॒श्मसि॒गम॑ध्यै॒य
त्र॒गावो॒भूरि॑शृङ्गा॒ऽअ॒यासः॑ ॥ अत्राह॒तदु॑रुगा॒यस्य॒विष्णोः॑प॒रमम्प॒

द॒मवं॑भारि॒भूरि॑ ॥ ब्र॒ह्म॒वनि॑त्वाक्षत्र॒वनि॑रायस्पोष॒वनि॒पर्य्यूँहा
मि ॥ ब्रह्मं॑दृꣳहक्ष॒त्रन्दृ॒ꣳहायुं॑र्दृꣳहप्र॒जान्दृꣳह ॥ ३ ॥ व्विष्णो॒ः
कर्म्मा॑णि । पश्यत॒यतो॑व्व्र॒ता॑निपस्प॒शे ॥ इन्द्र॑स्य॒युज्ज्य॒ःसखा॑ ॥ ४ ॥
तद्विष्णो॑ः । प॒रमम्प॒दꣳसदा॑पश्यन्तिसू॒रय॑ः ॥ दि॒वी॑व॒चक्षु॒रात॑तम्
॥ ५ ॥ प॒रि॒वीर॑सि ॥ प॒रि॒वीर॑सि॒परि॑त्वा॒दैवी॒र्व्विशो॑व्ययन्ता॒म्परी॒मं
ऽयज॑मान॒ꣳरायो॑मनु॒ष्या॒णाम् ॥ दि॒वःसू॒नुर॑स्ये॒षते॑पृथि॒व्याँल्लो॒कऽ
आर॒ण्यस्ते॑प॒शुः ॥ ६ ॥ [ ६ ] उ॒पा॒वीर॑सि ॥ उ॒पा॒वीर॒स्युप॑दे॒वान्दैवी॒

व्विश॒ꣳप्प्रागु॑रु॒शिजो॒व्वह्नि॑तमान् ॥ दे॒वं॑त्वष्टु॒र्व्वसु॑रमह॒व्याते॑स्वद॒न्ता
म् ॥ ७ ॥ रेव॑ती॒रम॑ध्वम् ॥ रेव॑ती॒रम॑ध्व॒म्बृह॑स्प्पतेधा॒रया॒व्वसू॑नि ॥
ऋ॒तस्य॑त्त्वादेवहवि॒ꣳपाशे॑न॒प्प्रति॑मुञ्चा॒मि॒धर्षा॒मानु॑षꣳ ॥ ८ ॥ दे॒वस्य॑
त्त्वा । स॒वि॒तुःप्प्र॑स॒वे॒श्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्णोहस्ता॑भ्याम् ॥ अ॒ग्नी
षोमा॑भ्याञ्जु॒ष्टन्नियु॑नज्मि ॥ अ॒द्भ्यस्त्वौष॑धी॒भ्योनु॑त्त्वामा॒ताम॑न्य
ता॒मनु॑पि॒तानु॒भ्भ्राता॒सग॒र्भ्भ्योनु॒सखा॒सयू॑त्थ्यꣳ ॥ अ॒ग्नीषोमा॑भ्या
न्त्वा॒जुष्ट॒म्प्रोक्षा॑मि ॥ ९ ॥ अ॒पाम्पे॒रुः ॥ अ॒पाम्पे॒रुर॒स्यापो॑दे॒वीःस्व॑द॒न्तु

स्वात्तञ्चित्सद्देवंहविः ॥ सन्तेप्प्राणोव्वातेनगच्छताꣳसमङ्गानियज
त्रैःसंय्यज्ञपतिराशिषा ॥ १० ॥ घृतेनाक्तौ । पशूँस्त्रायेथाꣳरेवतियज
मानेप्प्रियन्धाऽआविश ॥ उरोरन्तरिक्षात्सजूर्देवेनव्वातेनास्यहवि
षस्त्मनायजसमस्यतन्न्वाभव ॥ व्वर्षोव्वर्षीयसियज्ञेयज्ञपतिन्धाःस्वा
हादेवेभ्योदेवेभ्यःस्वाहा ॥ ११ ॥ [ ५ ] माहि÷ ॥ माहिर्भूर्म्मापृदा
कुर्न्नमस्तऽआतानानर्व्वाप्प्रेहि ॥ घृतस्यकुल्याऽउपऽऋतस्यपथ्याऽअ
नु ॥ १२ ॥ देवीरापः । शुद्धाव्वोढ्वꣳसुपरिविष्टादेवेषुसुपरिविष्टाव्वयम्प

रिवेष्टारोभूयास्म ॥ १३ ॥ व्वाचंन्ते ॥ व्वाचंन्तेशुन्धामिप्प्राणन्तेशु
न्धामिचक्षुंस्तेशुन्धामिश्श्रोत्रंन्तेशुन्धामिनाभिंन्तेशुन्धामिमेढ्रं
न्ते शुन्धामिपायुन्तेशुन्धामिचरित्राँस्तेशुन्धामि ॥ १४ ॥ मनंस्ते ॥
मनंस्तऽआप्प्यांयतांव्वाक्तऽआप्प्यांयताम्प्राणस्तऽआप्प्यांयताञ्च
क्षुंस्तऽआप्प्यांयतांꣳश्रोत्रंन्तऽआप्प्यांयताम् ॥ यत्तेक्रूरंयदास्थितं
तन्तत्तऽआप्प्यांयतान्निष्ट्यांयतान्तत्तेशुद्ध्यतुशमहोभ्यः ॥ ओषं
धेत्रायंस्वस्वधितेमैनꣳहिꣳसीः॥ १५ ॥ रक्षंसाम्भागः ॥ रक्षंसाम्भागो

सि॒निर॑स्त॒ꣳरक्ष॑ऽइ॒दम॒हꣳरक्षो॒भिति॑ष्ठामी॒दम॒हꣳरक्षो॑वबाध॒ऽइ॒दम॒
हꣳरक्षो॑ध॒मन्तमो॑नयामि ॥ घृ॒तेन॑द्यावापृथि॒वीप्प्रोर्णु॑वा॒था॑ंवा॒यो॒वे
स्तो॒काना॑म॒ग्निराज्य॑ंस्यवे॑तु॒स्वाहा॒स्वाहा॑कृते॒ऽऊ॒र्द्ध्वन॑भसम्मारु॒तङ्ग॑
च्छतम् ॥ १६॥ इ॒दमा॑पः ॥ इ॒दमा॑प॒ःप्प्रव॑हताव॒द्यञ्च॒मल॑ंच॒यत् ॥ यच्चा॑
भिदु॒द्रोहानृ॑तं॒यच्च॑शे॒पेऽअ॑भी॒रुण॑म् ॥ आपो॑मा॒तस्मा॒देन॑स॒ःपव॑
मानश्च॒मुञ्चतु ॥१७॥ [६] सन्ते॑ ॥ सन्ते॒मनो॒मन॑सा॒सम्प्रा॒णःप्प्रा॒णेन॑
गच्छताम् ॥रेड॑स्य॒ग्निष्ट्वा॑श्श्रीणा॒त्वाप॑स्त्वा॒सम॑रिण॒न्वात॑स्यत्वा॒ध्राज्यै॑

पूष्णोरꣳह्याऽऊष्मणोव्यथिषत्प्रयुतन्द्वेष÷ ॥ १८ ॥ घृतङ्घृतपावा
नꣳ ॥ घृतङ्घृतपावानꣳपिबतव्वसांव्वसापावानꣳपिबतान्तरिक्षस्यह
विरसिस्वाहा ॥ दिश÷प्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्भ्यः
स्वाहा ॥ १९ ॥ ऐन्द्रःप्प्राणः ॥ ऐन्द्रःप्प्राणोऽअङ्गेऽअङ्गेनिदीध्य
दैन्द्रऽउदानोऽअङ्गेऽअङ्गेनिधीतꣳ ॥ देवत्वष्टर्भूरितेसꣳसमेतुस
लक्ष्मायद्विषुरूपम्भवाति ॥ देवत्त्रायन्तमवसेसखायोनुत्वामाता
पितरोमदन्तु ॥ २० ॥ [ ३ ] समुद्रङ्गच्छ ॥ समुद्रङ्गच्छस्वाहान्तरि

क्षङ्गच्छ॒स्वाहा॑दे॒वꣳस॑वि॒तार॑ङ्गच्छ॒स्वाहा॑मि॒त्रावरु॑णौगच्छ॒स्वाहा॑
होरा॒त्रेग॑च्छ॒स्वाहा॒च्छन्दा॑ꣳसिगच्छ॒स्वाहा॒द्यावा॑पृथि॒वीग॑च्छ॒स्वा
हा॑य॒ज्ञङ्ग॑च्छ॒स्वाहा॒सोम॑ङ्गच्छ॒स्वाहा॑दि॒व्यन्नभो॑गच्छ॒स्वाहा॒ग्निंवै॑
श्वान॒रङ्ग॑च्छ॒स्वाहा॒मनो॑मे॒हार्दि॑यच्छ॒दिव॑न्तेधूमोग॑च्छतु॒स्वर्ज्यो॑
तिःपृथि॒वीम्भस्म॒नापृ॑ण॒स्वाहा॑ ॥२१॥ मापः ॥ मापोमौष॑धीर्हिꣳसी॒
र्द्धाम्नो॑धाम्नोराजँ॒स्ततो॑व्वरुणनोमुञ्च ॥ यदा॒हु॒रघ्न्याऽइति॒व्वरु॒णेति॒
शपा॑महे॒ततो॑व्वरुणनोमुञ्च ॥ सुमि॒त्रि॒यान॒ऽआप॒ऽओष॑धयःसन्तुदु

र्म्मित्रियास्तस्म्मैंसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः ॥ २२ ॥ [ २ ]
हविष्म्मतीरिमाः ॥ हविष्म्मतीरिमाऽआपोहविष्म्माँ २ ॥ ऽआविवा
सति ॥ हविष्म्मान्देवोऽअध्वरोहविष्म्माँ २ ॥ ऽअस्तुसूर्य्य÷ ॥ २३ ॥
अग्नेर्व्व÷ ॥ अग्नेर्व्वोपन्नगृहस्यसदसिसादयामीन्द्राग्न्योर्भ्भागधेयी
स्त्थमित्त्रावरुणयोर्भ्भागधेयीस्त्थव्विश्श्वेषान्देवानाम्भागधेयीस्त्थ ॥
अमूर्ज्जाऽउपसूर्य्येयाभिर्व्वासूर्य्य÷सह ॥ तानोहिन्वन्त्वध्वरम् ॥ २४ ॥
[ २ ] हृदेत्वा ॥ हृदेत्त्वामनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वमि

मम॑ध्व॒रन्दि॒विदे॒वेषु॒होत्रा॑यच्छ ॥ २५ ॥ सोम॑राजन् ॥ सोम॑राज॒न्वि
श्वा॒स्त्वम्प्र॒जाऽउ॒पाव॑रोह॒व्विश्वा॒स्त्वाँम्प्र॒जाऽउ॒पाव॑रोहन्तु ॥ शृ॒णो
त्व॒ग्निःस॒मिधा॒हव॑म्मेशृ॒ण्वन्त्वापो॑धि॒षणा॑श्चदे॒वीः ॥ श्रोता॑ग्ग्रावा
णो॑व्वि॒दुषो॒नय॒ज्ञꣳशृ॒णोतु॑दे॒वःस॑वि॒ताहव॑म्मे॒स्वाहा॑ ॥ २६ ॥ देवी॑रा
पꣳ ॥ देवी॑रापोऽअपान्नपा॒द्योव॑ऽऊ॒र्म्मिर्ह॑वि॒ष्य॒ऽइन्द्रि॒यावा॑न्म॒दि
न्त॑मꣳ ॥ तन्दे॒वेब्भ्यो॑देव॒त्राद॑त्तशु॒क्रपे॒ब्भ्यो॒येषा॑म्भा॒गस्त्थस्वाहा॑
॥ २७ ॥ कार्षि॑रसि ॥ कार्षि॑रसिसमु॒द्रस्य॒त्त्वाक्षि॑त्त्या॒ऽउन्न॑यामि ॥

समापो॑ऽअ॒द्भिर॑ग्ग्मत॒समोष॑धीभि॒रोष॑धीꣳ ॥ २८ ॥ सम॑ग्ग्ने ॥ सम॑ग्ग्ने
पृ॒त्सुमर्त्त्य॒म॑वा॒व्वाजे॑षु॒यञ्जु॒नाः ॥ सय॒न्ताशश्व॑ती॒रिष॒ꣳस्वाहा॑ ॥ २९ ॥
[ ५ ] दे॒वस्य॑त्त्वा ॥ दे॒वस्य॑त्त्वासवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्ष्णो
हस्ता॑भ्याम् ॥ आद॑दे॒रावा॑सिगभी॒रमि॒मम॑ध्व॒रङ्कृ॒धीन्द्रा॑यसु॒षूत॑मम् ॥ उ॒त्त॒मेन॑प॒विनोर्ज्ज॑स्वन्त॒म्मधु॑मन्त॒म्पय॑स्वन्त॑न्निग्ग्रा॒भ्या॒स्त्थदे॒
व॒श्रुत॑स्त॒र्प्पय॑तमा॒मनो॑मे ॥ ३० ॥ मनो॑मे । त॒र्प्पय॑त॒व्वाच॑म्मेतर्प्पयत
प्प्रा॒णम्मे॑तर्प्पयत॒चक्षु॑र्म्मेतर्प्पयत॒श्श्रोत्र॑म्मेतर्प्पयता॒त्मान॑म्मेतर्प्प

यतप्प्र॒जाम्मे॑तर्प्पयतप॒शून्मे॑तर्प्पयतग॒णान्मे॑तर्प्पयतग॒णामे॒माव्वि
तृ॑षन् ॥ ३१ ॥ इन्द्रा॑यत्त्वा ॥ इन्द्रा॑यत्त्वा॒व्वसु॑मतेरु॒द्द्रव॑त॒ऽइन्द्रा॑यत्त्वा
दि॒त्त्यव॑त॒ऽइन्द्रा॑यत्त्वाभिमाति॒ग्घ्ने ॥ श्ये॒नाय॑त्त्वासोम॒भृते॒ग्ग्नये॑
त्त्वारायस्प्पोष॒दे ॥ ३२ ॥ यत्ते॑ । सोमदि॒विज्ज्योति॒र्य्यत्पृ॑थि॒व्यांय्यदु॒
राव॒न्तरि॑क्षे । तेना॒स्म्मैयज॑मानायो॒रूरा॒येकृ॒ध्ध्यधि॑दा॒त्त्रेव्वो॑चः ॥ ३३ ॥
श्वा॒त्त्रास्त्थ॑ ॥ श्वा॒त्त्रास्त्थ॑व्वृ॒त्त्र॒तुरो॒राधो॑गूर्त्ताऽअ॒मृत॑स्य॒पत्नीः॑ ॥ तादे॑
वीर्द्दे॑व॒त्रेमंय्य॒ज्ञन्न॑य॒तोप॑हूता॒ःसोम॑स्यपिबत ॥ ३४ ॥ माभेः॑ ॥ माभे॒

र्म्मासंव्विंक्थाऽऊर्ज्जन्धत्स्वधिषंणेव्वीड्वीसतीव्वीडयेथामूर्ज्जन्दधाथा
म् ॥ पाप्माहतोनसोमं÷॥३५॥प्रागपाक् ॥ प्रागपागुदगधराक्सर्व्वतं
स्त्वादिशऽआधावन्तु ॥ अम्बनिष्पंरसमरीव्विंदाम् ॥ ३६॥ त्वमङ्ग ॥
त्वमङ्गप्रशंᳲसिषोदेवःशंविष्ठमर्त्त्यँम् ॥ नत्त्वदन्न्योमंघवन्नास्तिमर्ड्डि
तेन्द्रब्रवीमितेव्वचं÷ ॥ ३७॥ ॥८॥ इतिश्रीवाजसनेयसंहितायांषष्ठोऽ
ध्यायः॥६॥श्रीवेदपुरुषायनमः॥अनुवाक्सूत्रम्॥ व्वाचस्पतयेत्रिको,प
यामगृहीतोसित्रिका,वायोद्विका,यंव्वांद्विको,सावामेका,तंप्रत्क्कथाच

तस्रो,ऽयंव्वेनास्त्रिका,येदेवासस्त्रिका,इन्द्राय-मूर्द्धानंद्विकौ,यस्तएका,
प्राणायमेतिस्रो,मघवऽएकें,द्राग्नीऽआगतमेका,घैको,मासऽएका,
व्विश्वेदेवासऽआगतऽएकें,द्रमरुत्वऽएका,मरुत्वंतंवृषभमेका,[1]मरुतां
त्वा,सजोषाऽइंद्रऽएका,मरुत्वाँ२॥ऽइंद्रऽएका,महाँ२॥ऽइंद्रऽएका,
महाँ२॥ऽइंद्रऽएको,दुत्यमष्टौपंचविꣳशतिरष्टाचत्वारिꣳशत् ॥७॥
हरिः ॐ ॥ व्वाचस्प्पतये ॥ व्वाचस्प्पतयेपवस्वव्वृष्ष्णोऽअꣳशुब्भ्याङ्गभं

---

[1] इतिशतपथब्राह्मणपाठः ।

[ॐ वाचस्पतये, इत्यस्याऽनुवाकस्य नारायणऋषिः कश्यपोदेवता त्रिष्टुप्छन्दः, अश्वमेधावभृथफल-
प्राप्ति कामः पाठे विनियोगः ॥७॥]

स्तिपूतꣳ ॥ देवोदेवेभ्यः पवस्वयेषाम्भागोसि ॥ १ ॥ मधुमतीर्न्नꣳ॥मधु
मतीर्न्नऽइषस्कृधियत्तेसोमादाभ्यन्नामजागृवितस्मैतेसोमसोमा
यस्वाहास्वाहोर्व्वँतरिक्षमन्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृतोसि । व्विश्वे
भ्यऽइंद्रियेभ्योदिव्येभ्यꣳपार्थिवेभ्योमनस्त्वाष्टुस्वाहात्त्वासुभ
वसूऽर्य्यायदेवेभ्यस्त्वामरीचिपेभ्योदेवाꣳशोयस्मैत्वेडेतत्सत्यमु
परिस्रुताभङ्गेनहतोसौफट्प्राणायत्त्वाव्यानायत्त्वा ॥ ३ ॥ [ ३ ] उप
यामगृहीतोसि ॥ उपयामगृहीतोस्यन्तऽर्यँच्छमघवन्पाहिसोमम् ॥

उरुष्ष्यरायऽएषोयजस्व ॥ ४ ॥ अन्तस्ते ॥ अन्तस्तेद्यावापृथिवीदधा
म्म्यन्तर्द्दधाम्म्युर्व्वन्तरिक्षम् ॥ सजूर्द्देवेभिरवरैःपरैश्चान्तर्य्यामेमघ
वन्मादयस्व ॥५॥ स्वाङ्कृतोसि ॥ स्वाङ्कृतोसिविश्वेभ्यऽइन्द्रियेभ्यो
दिव्येभ्यःपार्थिवेभ्योमनस्त्वाष्टुस्वाहात्वासुभवसूर्य्यायदेवेभ्य
स्त्वामरीचिपेभ्यऽउदानायत्त्वा ॥ ६ ॥ [ ३ ] आवायो ॥ आवायो
भूषशुचिपाऽउपनःसहस्रन्तेनियुतोविश्ववार ॥ उपोतेऽअन्धोमद्य
मयामियस्यदेवदधिषेपूर्व्वपेयंवायवेत्त्वा ॥७॥ इन्द्रवायूऽइमे । सुताऽ

उप॒प्प्रयो॑भि॒राग॑तम् ॥ इन्द॑वोवामु॒शन्ति॒हि ॥ उ॒प॒या॒मगृ॑हीतोसिव्वा॒य
व॑ऽइन्द्रवा॒युब्भ्यां॑न्त्वै॒षते॒योनिः॑स॒जोषो॑ब्भ्यान्त्वा ॥ ८ ॥ [ २ ] अ॒यं
व्वा॑म् ॥ अ॒यंव्वा॑म्मित्रावरुणासु॒तःसोम॑ऽऋतावृधा ॥ ममेदि॒हश्श्रु॑त॒ꣳ
हव॑म् ॥ उ॒प॒या॒मगृ॑हीतोसिमि॒त्रावरु॑णाब्भ्यान्त्वा ॥ ९ ॥ रा॒याव्व॒य
म् ॥ रा॒याव्व॒यꣳस॑स॒वाꣳसो॑मदेमह॒व्व्येन॑दे॒वायव॑सेन॒गावः॑ ॥ तान्धे॒नु
म्मि॑त्रावरुणायु॒वन्नो॑व्वि॒श्श्वाहा॑धत्त॒मन॑पस्प्फुरन्तीमे॒षते॒योनि॑र्ऋता॒
युब्भ्यां॑न्त्वा ॥ १० ॥ [२] यावा॑म् ॥ यावा॒ङ्कःशा॒मधु॑म॒त्त्याश्श्वि॑नासू॒नृता॑

वती ॥ तयायज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषते
योनिर्म्माध्वीभ्यान्त्वा ॥११॥ [ १ ] तम्प्रत्नथा । पूर्व्वथाविश्वथे
मथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधुनि
माशुञ्जयन्तमनुयासुवर्द्धसे ॥ उपयामगृहीतोसिशण्डायत्त्वैषतेयो
निर्व्वीरताम्पाह्यपमृष्टःशण्डोदेवास्त्वाशुक्रपाःप्प्रणयन्त्वनाधृष्टा
सि ॥१२॥ सुवीरोव्वीरान् ॥ सुवीरोव्वीरान्प्रजनयन्परीह्यभिरायस्पो
षेणयजमानम् ॥ सञ्जग्मानोदिवापृथिव्याशुक्रःशुक्रशोचिषानिर

स्त॒ःशण्ड॑ः शु॒क्रस्या॑धि॒ष्ठान॑मसि ॥ १३ ॥ अच्छिन्नस्यते । दे॒वसोम
सु॒वीर्य्यँ॑स्यरा॒यस्प्पोष॑स्यद॒दि॒तार॑ःस्याम ॥ साप्प्र॑थ॒मासँ॑स्कृ॑तिर्व्वि॒श्व
वा॑रा॒सप्प्र॑थ॒मोव्वरु॑णोमि॒त्रोऽअ॒ग्निः ॥ १४ ॥ सप्प्र॑थ॒मः ॥ सप्प्र॑थ॒मोबृ
ह॒स्प्पति॑श्चिकि॒त्वाँस्तस्मा॒ऽइ॒न्द्रा॑यसु॒तमाजु॑होत॒स्वाहा॑ ॥ तृ॒म्पन्तु॒हो
त्रा॒मद्ध्वो॒याःस्वि॑ष्टा॒याःसु॒प्प्री॑ता॒ःसु॒हु॑ता॒यत्स्वाहा॑या॑ड॒ग्नीत् ॥ १५ ॥
[ ४ ] अ॒यंव्वे॒नः ॥ अ॒यंव्वे॒नश्चो॑द॒यत्पृश्नि॑गर्भा॒ज्ज्योति॑र्ज्जरायू॒रज॑सो
व्वि॒मा॑ने ॥ इ॒मम॒पाꣳसं॑ङ्गमेसू॒र्य्यँ॑स्य॒शिशु॒न्नव्विप्प्रा॑म॒तिभी॑रिहन्ति ॥

उपयामगृहीतोसिमर्क्कायत्त्वा ॥ १६ ॥ मनोन । येषुहवनेषुतिग्ग्मं
व्विपꣳशच्च्याव्वनुथोद्द्रवन्ता ॥ आयःशर्य्याभिस्तुविनृम्म्णोऽअस्या
श्श्रीणीतादिशङ्गभस्तावेषतेयोनि÷प्प्रजाःपाह्यपमृष्टोमर्क्कोदेवा
स्त्वामन्थिपाःप्प्रणयन्त्वनाधृष्टासि ॥ १७ ॥ सुप्प्रजाः । प्प्रजाःप्प्र
जनयन्परीह्यभिरायस्प्पोषेणयजमानम् ॥ सञ्जग्ग्मानोदिवापृथि
व्व्यामन्थीमन्थिशोचिषानिरस्तोमर्क्कोमन्थिनोधिष्ठानमसि ॥ १८ ॥
[ ३ ] येदेवासꣳ ॥ येदेवासोदिव्व्येकादशस्त्थपृथिव्व्यामद्ध्येकादश

स्त्थ ॥ अप्प्सुक्षितोमहिनैकादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्व
म् ॥ १९ ॥ उपयामगृहीतोसि ॥ उपयामगृहीतोस्याग्ग्रयणोसि
स्वाग्ग्रयणꣳपाहियज्ञम्पाहियज्ञपतिंव्विष्ष्णुस्त्वामिन्द्रियेणपातुव्वि
ष्ष्णुन्त्वम्पाह्यभिसवनानिपाहि ॥ २० ॥ सोमः पवते ॥ सोमः प
वतेसोमःपवतेस्स्मैब्ब्रह्मणेस्स्मैक्षत्त्रायास्स्मैसुन्व्वतेयजमानायप
वतऽइषऽऊर्ज्जेपवतेद्भ्यऽओषधीब्भ्यꣳपवतेद्यावापृथिवीब्भ्याम्पवते
सुभूतायपवतेव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवे

ब्भ्यः ॥ २१ ॥ [ ३ ] उपयामगृहीतोसि ॥ उपयामगृहीतोसीन्द्राय
त्वाबृहद्वतेव्वयस्वतऽउक्क्थाव्व्यङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वयस्तस्मै
त्वाव्विष्ष्णवेत्त्वैषतेयोनिरुक्क्थेब्भ्यस्त्वादेवेब्भ्यस्त्वादेवाव्व्यंय्यज्ञ
स्यायुषेगृह्णामिमित्रावरुणाब्भ्यान्त्वा ॥ २२ ॥ मित्रावरुणाब्भ्या
न्त्वा । देवाव्व्यंय्यज्ञस्यायुषेगृह्णामीन्द्रायत्त्वादेवाव्व्यंय्यज्ञस्यायुषे
गृह्णामीन्द्राग्निब्भ्यान्त्वादेवाव्व्यंय्यज्ञस्यायुषेगृह्णामीन्द्रावरुणा
ब्भ्यान्त्वादेवाव्व्यंय्यज्ञस्यायुषेगृह्णामीन्द्राबृहस्प्पतिब्भ्यान्त्वादे

वाव्यंय्यज्ञस्यायुंषेगृह्णामीन्द्राविष्णुभ्यान्त्वादेवाव्यंय्यज्ञस्यायुं
षेगृह्णामि ॥ २३ ॥ [ २ ] मूर्द्धानंन्दिवः ॥ मूर्द्धानंन्दिवोऽअरतिम्पृथि
व्यावैश्श्वानरमृतऽआजातमग्निम् ॥ कविꣳसम्म्राजमतिथिञ्जनांना
मासन्नापात्रंञ्जनयन्तदेवाः ॥ २४ ॥ उपयामगृहीतोसि । ध्रुवोसि
ध्रुवक्षितिर्द्ध्रुवाणान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्वै
श्श्वानरायत्त्वा ॥ ध्रुवन्ध्रुवेणमनसाव्वाचासोममवनयामि ॥ अथानऽ
इन्द्रऽइद्विशोसपत्नाःसमनसस्करत् ॥ २५ ॥ [ २ ] यस्ते । द्रप्सस्कन्द

तियस्तेंऽअꣳशुर्ग्ग्रावंच्युतोधिषणंयोरुपस्त्थांत् ॥ अद्ध्वर्य्योंर्व्वापरिंवा
यःपवित्रात्तन्तेंजुहोमिमनंसावषंट्कृतꣳस्वाहांदेवानांमुत्क्रमंणम
सि ॥ २६ ॥ [ १ ] प्राणायंमे । वर्च्चोंदावर्च्चंसेपवस्वव्यानायंमेवर्च्चोंदाव
र्च्चंसेपवस्वोदानायंमेवर्च्चोंदावर्च्चंसेपवस्ववाचेमेंवर्च्चोंदावर्च्चंसेपवस्व
क्क्रतुदक्षाब्भ्याम्मेवर्च्चोंदावर्च्चंसेपवस्वश्श्रोत्रांयमेवर्च्चोंदावर्च्चंसेपव
स्वचक्षुंर्ब्भ्याम्मेवर्च्चोंदसौवर्च्चंसेपवेथमात्मनेंमे ॥ २७ ॥ आत्म
नेंमे । वर्च्चोंदावर्च्चंसेपवस्वौजंसेमेवर्च्चोंदावर्च्चंसेपवस्वायुंषेमेवर्च्चोंदाव

र्च्चसेपवस्वविश्वाभ्योमेप्प्रजाभ्योवर्च्चोदसौवर्च्चसेपवेथाम् ॥ २८ ॥
कोसि। कतमोसिकस्यासिकोनामासि ॥ यस्यतेनामामन्महियन्त्वा
सोमेनातीतृपाम ॥ भूर्भुवःस्वः सुप्प्रजाः प्प्रजाभिः स्याꣳसुवीरो
वीरैःसुपोषःपोषैः ॥ २९ ॥ [ ३ ] उपयामगृहीतोसि ॥ उपयामगृही
तोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयामगृहीतोसिशु
क्रायत्वोपयामगृहीतोसिशुचयेत्वोपयामगृहीतोसिनभसेत्वोपया
मगृहीतोसिनभस्यायत्वोपयामगृहीतोसीषेत्वोपयामगृहीतोस्यू

र्जे॑त्वो॑पया॒मगृ॑हीतो॑सि॒सह॑सेत्वो॑पया॒मगृ॑हीतो॑सिसह॒स्या॑यत्वो॑पया॒
मगृ॑हीतो॑सि॒तप॑सेत्वो॑पया॒मगृ॑हीतो॑सितप॒स्या॑यत्वो॑पया॒मगृ॑हीतो
स्यꣳह॑सस्प॒तये॑त्त्वा ॥ ३० ॥ [ १ ] इन्द्रा॑ग्नी॒ऽआग॑तम् ॥ इन्द्रा॑
ग्नी॒ऽआग॑तꣳसु॒तङ्गी॒र्भि॑र्न्नभो॒व्वरे॑ण्यम् ॥ अ॒स्यपा॑तन्धि॒येषि॒ता ॥
उ॒प॒या॒मगृ॑हीतो॑सीन्द्रा॒ग्निब्भ्या॑न्त्वै॒षते॒यो॒नि॑रिन्द्रा॒ग्निब्भ्या॑न्त्वा
॥ ३१ ॥ [ १ ] आघं॑ ॥ आ॒घा॒ये॒ऽअ॒ग्निमि॑न्ध॒तेस्तृ॒णन्ति॑ब॒र्हि॑रा॑नु॒ष
क् ॥ येषा॒मिन्द्रो॒युवा॒सखा॑ ॥ उ॒प॒या॒मगृ॑हीतो॑स्यग्नी॒न्द्राब्भ्या॑न्त्वै॒ष

ते॒योनिंरग्नी॒न्द्राब्भ्यांन्त्वा ॥ ३२ ॥ [१] ओमांसश्चर्षणीधृतः ॥ ओमांसश्चर्षणीधृ॒तो॒व्विश्वेंदे॒वास॒ऽआगंत ॥ दा॒श्वाꣳसोंदा॒शुषंःसु॒तम् ॥ उ॒प॒या॒मगृंहीतोसि॒व्विश्वेंब्भ्यस्त्वादे॒वेब्भ्यंऽए॒षते॒योनि॒र्व्विश्वेंब्भ्यस्त्वादे॒वेब्भ्यंः ॥ ३३ ॥ [१] व्विश्वेंदे॒वासः ॥ व्विश्वेंदे॒वास॒ऽआगंतशृ॒णुतामंऽइ॒मꣳहवंम् ॥ ए॒दम्ब॒र्हिर्न्निषींद॒त ॥ उ॒प॒या॒मगृंहीतोसि॒व्विश्वेंब्भ्यस्त्वादे॒वेब्भ्यंऽए॒षते॒योनि॒र्व्विश्वेंब्भ्यस्त्वादे॒वेब्भ्यंः ॥ ३४ ॥ [१] इन्द्रंमरुत्त्वः ॥ इन्द्रंमरुत्त्वऽइ॒हपांहि॒सोमं॒य्यथांशा॒र्य्यातेऽअपिंबः

सुतस्य॑ ॥ तव॒प्प्रणी॑ती॒तव॑शूर॒शर्म्म॒न्नावि॑वासन्तिक॒वय॑÷सु॒य॒ज्ञाः ॥
उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाम॒रुत्व॑तऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाम॒रु
त्त्व॑ते ॥ ३५ ॥ [१] म॒रुत्व॑न्तंवृ॒ष॒भं। वा॑वृधा॒नमक॑वारिन्दि॒व्यꣳशा॒
समिन्द्र॑म् ॥ वि॒श्वासाह॒मव॑से॒नूत॑नायो॒ग्रꣳस॑हो॒दामि॒हतꣳहु॑वेम ॥
उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाम॒रुत्व॑तऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाम॒रु
त्त्व॑ते ॥ [१][१] उ॒प॒या॒मगृ॑हीतोसिम॒रु॒तान्त्वौज॑से ॥ ३६ ॥ [१] स॒जो

---

[१] ( इतिशतपथे ) ।

षा॑ऽइन्द्र॒ ॥ स॒जोषा॑ऽइन्द्र॒सग॑णोम॒रुद्भि॒ᳪसोम॑म्पिबवृ॒त्र॒हाशू॑राव्वि॒द्वा
न्॥ ज॒हि॒शत्रूँ॒१॥रप॒मृधो॑नुद॒स्वाथाभ॑यङ्कृ॒णु॒हिव्वि॒श्वतो॑नᳪ ॥ उ॒प॒या
मगृ॑हीतो॒सीन्द्रा॑यत्त्वाम॒रुत्व॑तऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाम॒रुत्व॑ते
॥३७॥ [ १ ] म॒रुत्वाँ॑ २ ॥ ऽइन्द्र । वृ॒ष॒भोरणा॑य॒पिबा॒सोम॑मनु॒ष्व॒ध
म्मदा॑य ॥ आसि॑ञ्चस्वज॒ठरे॒मध्व॑ऽऊ॒र्म्मिन्त्वᳪराजा॑सि॒प्प्रति॑पत्सु॒ता
ना॑म् ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाम॒रुत्व॑तऽए॒षते॒योनि॒रिन्द्रा॑य
त्त्वाम॒रुत्व॑ते ॥ ३८ ॥ [१] म॒हाँ २ ॥ ऽइन्द्र॑÷ ॥ म॒हाँ २ ॥ ऽइन्द्रो॑न्नृ॒वदाच॑

र्षणिप्प्राऽउतद्विबर्हाऽअमिनःसहोभिः ॥ अस्म्मद्र्यग्ग्वावृधेव्वी
र्य्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत् ॥ उपयामगृहीतोसिमहेन्द्रायं
त्त्वैषतेयोनिर्म्महेन्द्रायंत्त्वा ॥३९॥[१] महाँ२॥ऽइन्द्रः॥महाँ२॥ऽइ
न्द्रोयऽओजसापर्ज्जन्न्योवृष्टिमाँ२॥ऽइव ॥ स्तोमैर्व्वत्सस्यंव्वावृधे ॥ उप
यामगृहीतोसिमहेन्द्रायंत्त्वैषतेयोनिर्म्महेन्द्रायंत्त्वा ॥ ४० ॥ [१]
उदुत्यम् ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेव्विश्वायसू
र्य्यꣳस्वाहा ॥ ४१ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीक

ञ्चक्षु॑र्म्मि॒त्रस्य॒व्वरु॑णस्या॒ग्ग्नेः ॥ आप्प्रा॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्ष॒ꣳसू
र्य्यं॑ऽआ॒त्माजग॑तस्त॒स्थुष॑श्च॒स्वाहा॑ ॥ ४२ ॥ अग्ग्ने॒नय॑ । सु॒पथा॑रा॒
येऽअ॒स्मान्विश्वा॑निदेवव्व॒युना॑निवि॒द्वान् ॥ यु॒यो॒ध्य॒स्मज्जु॑हुरा॒ण
मेनो॒भूयि॑ष्ठान्ते॒नम॑ऽउक्तिं॑व्विधेम॒स्वाहा॑ ॥ ४३ ॥ अ॒यन्न॑ः ॥ अ॒यन्नो॑
ऽअ॒ग्निर्व्वरि॑वस्कृणोत्व॒यम्मृध॑ःपु॒रऽए॑तुप्प्रभि॒न्दन् ॥ अ॒यंव्वाजा॑ञ्ज
यतु॒व्वाजं॑साताव॒यꣳशत्रूँ॑ञ्जयतु॒जर्हृ॑षाण॒ःस्वाहा॑ ॥ ४४ ॥ रू॒पेण॑वः ॥
रू॒पेण॑वोरू॒पम॒ब्भ्यागा॑न्तु॒थोवो॑व्वि॒श्ववे॑दा॒व्विभ॑जतु ॥ ऋ॒तस्य॑प॒थाप्प्रे

तंचन्द्रंदक्षिणाव्विस्वꣳपश्यव्व्यन्तरिक्षंय्यतस्वसदस्यैः ॥४५॥ ब्राह्म
णमद्य । व्विदेयम्पितृमन्तम्पैतृमत्यमृषिमार्षेयꣳसुधातुदक्षिणम् ॥
अस्म्मद्द्रातादेवत्त्रागच्छतप्प्रदातारमाविशत ॥ ४६ ॥ अग्नयेत्त्वा ॥
अग्नयेत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयायुर्द्दात्रऽएधिमयो
मह्यम्प्रतिग्ग्रहीत्रेरुद्द्रायत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीय
प्प्राणोदात्रऽएधिव्वयोमह्यम्प्रतिग्ग्रहीत्रेबृहस्प्पतयेत्त्वामह्यंव्वरुणो
ददातुसोमृतत्वमशीयत्त्वग्ग्दात्रऽएधिमयोमह्यम्प्रतिग्ग्रहीत्रेयमा

यंत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमंशीयहयोंदात्रऽएंधिव्वयोमह्यं
म्प्रतिग्ग्रहीत्रे ॥ ४७ ॥ कोंदात् ॥ कोंदात्कस्म्माऽअदात्कामोंदात्का
मांयादात् ॥ कामोंदाताकामं÷प्प्रतिग्ग्रहीताकामैतत्ते ॥ ४८ ॥ [८]
॥२५॥ इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः ॥ ७ ॥ श्रीवेदपुरु
षायनमः ॥ अनुवाकसूत्रम् ॥ उपयामगृहीतोस्यादित्येभ्यःपंच, वाम
मद्यद्वे, सुशर्मास्येका, बृहस्पतिसुतस्यद्वे, हरिरसिचतस्रः, समिन्द्रे
ऽष्टौ, माहिःपंच, ऽएजतुदशमास्यःपंचा, तिष्ठैका, सुक्ष्वाह्येके, न्द्रामिदे

का,यस्मान्नद्धे,ऽग्नेपवस्वो,त्तिष्ठन्न,दृश्रमु,दुत्यमेकैका,जिघ्रद्धे,वि
नइंद्र,वाचस्पतिं,विश्वकर्मन्नेकैका,ग्नयेत्वाचतस्र,इहरातिस्तिस्रः,पर
मेष्ठीदश,त्रयोविꣳशतिस्त्रिषष्टिः ॥ हरिःॐ ॥ उपयामगृंहीतोसि ॥ उ
पयामगृंहीतोस्यादित्त्येभ्यंस्त्वा ॥ विष्णंऽउरुगायैषतेसोमस्तꣳरंक्ष
स्वमात्त्वांदभन् ॥ १ ॥ कदाचन । स्तरीरंसिनेन्द्रंसश्चासिदाशुषें ॥ उपोपे
न्नुमंघवन्भूयऽइन्नुतेदानंन्देवस्यंपृच्यतऽआदित्येभ्यंस्त्वा ॥ २ ॥ कदा
चन । प्रयुंच्छस्युभेनिपांसिजन्मंनी ॥ तुरीयादित्त्यसवंनन्तऽइन्द्रिय

[ॐ उपयामगृहीतोसीत्यस्याऽनुवाकस्य विवस्वान्ऋषि रिन्द्रो देवता जगतीच्छन्दः सौत्रामणि;-अवभृथ-
फल प्राप्ति कामः पाठे विनियोगः ॥ ८ ॥ [कौडिन्य वसिष्ठ मैत्रावरुणीति त्रिप्रवरः कौडिण्यगोत्रोत्पन्नः; लोक नाथ शर्मोऽहं)

मा॒तं॑स्तथा॒व॒मृ॒तं॑न्दि॒व्व्या॒दि॒त्त्येब्भ्यं॑स्त्वा ॥३॥ य॒ज्ञोदे॒वानां॑म्॥ य॒ज्ञोदे॒
वा॒ना॒म्प्प्रत्त्यें॑तिसु॒म्न॒मादि॑त्यासो॒भवं॑तामृ॒डय॒न्तं÷ ॥ आवो॒र्व्वाचीं॑सु॒म॒
ति॒र्व्वं॑वृत्त्यादु॒ꣳहो॑श्चि॒द्या॒व्वं॑रि॒वो॑वि॒त्त॒रा॑संदा॒दि॒त्येब्भ्यं॑स्त्वा ॥४॥ व्वि॒वं॑स्व
न्नादि॑त्य ॥ व्वि॒वं॑स्व॒न्ना॒दि॒त्त्यै॒षतें॑सोमपी॒थस्ता॒स्मिं॑न्मत्स्व ॥ श्र॒दं॑स्म्मै
न॒रो॒व्वचं॑सेदधात॒न॒यदा॒शी॒र्द्दादम्पं॑ती॒व्वा॒म॒मं॑श्नुतः ॥ पु॒मां॑न्पु॒त्त्रो॒जा॑
य॒ते॒व्वि॒न्दते॒व्वस्व॒धां॑व्वि॒श्वाहा॑रु॒पऽएं॑धते॒गृहे ॥ ५ ॥ [५] व्वा॒मम॒द्य। सं॑वि
त॒र्व्वा॒मम॒श्वो॒दि॒वेदि॑वे॒व्वा॒मम॒स्म्मब्भ्यंꣳसावीꣳ ॥ व्वा॒मस्य॒हि॒क्षयं॑स्यदे

व॒भूरै॑र॒याधि॒याव्वा॑म॒भाज॑÷स्याम ॥ ६ ॥ उ॒प॒या॒मगृ॑हीतोसि । सावि॒त्रो
सिचनो॒धाश्च॑नो॒धाऽअ॑सि॒चनो॒मयि॑धेहि ॥ जिन्व॑य॒ज्ञञ्जिन्व॑य॒ज्ञप॑
ति॒म्भगा॑यदे॒वाय॑त्त्वासावि॒त्रे ॥ ७ ॥ [ २ ] शतम् ॥ ३०० ॥ उ॒प॒या॒म
गृ॑हीतोसि । सु॒शर्म्मा॑सिसु॒प्प्रति॒ष्ठानो॑बृ॒हदु॑क्षाय॒नम॑÷ ॥ व्विश्वे॑भ्य
स्त्वादे॒वेभ्य॑ऽए॒षते॒योनि॒र्व्विश्वे॑भ्यस्त्वादे॒वेभ्य॑÷ ॥ ८ ॥ [ १ ] उ॒प॒
या॒मगृ॑हीतोसि ॥ उ॒प॒या॒मगृ॑हीतोसि॒बृ॒ह॒स्प्पति॑सुतस्यदेवसोमत॒ऽइ
न्दो॑रिन्द्रि॒याव॑त॒÷पत्नी॑वतो॒ग्ग्रहाँ॑ २ ॥ ऽऋध्यासम् ॥ अ॒हम्प॒रस्ता॑द॒हम॒

वस्ताद्यदन्तरिक्षन्तदुमेपिताभूत् ॥ अहꣳसूर्य्यमुभयतोददर्शाह
न्देवानाम्परमङ्गुहायत् ॥ ९ ॥ अग्ना ३ ॥ ऽइपत्नीवन् ॥ अग्ना ३ ॥ ऽइ
पत्नीवन्तसजूर्देवेनत्त्वष्ट्रासोमम्पिबस्वाहा ॥ प्रजापतिर्वृषासिरेतो
धारेतोमयिधेहिप्प्रजापतेस्तेवृष्णोरेतोधसोरेतोधामशीय ॥ १० ॥ [२]
उपयामगृहीतोसि ॥ उपयामगृहीतोसिहरिरसिहारियोजनोहरि
ब्भ्यान्त्वा ॥ हर्य्योर्द्धानास्त्थसहसोमाऽइन्द्राय ॥ ११ ॥ यस्ते ।
ऽअश्वसनिर्ब्भक्षोयोगोसनिस्तस्यतऽइष्टयजुषस्तुतस्तोमस्यशस्तो

क्थस्योपहूतस्योपहूतो भक्षयामि ॥ १२ ॥ देवकृतस्यैनसः ॥ देवकृतस्यै
नसोवयजनमसिमनुष्यकृतस्यैनसोवयजनमसिपितृकृतस्यैनसो
वयजनमस्यात्मकृतस्यैनसोवयजनमस्येनसऽएनसोवयजनमसि ॥
यच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्यसर्व्वस्यैनसोवयजनमसि
॥ १३ ॥ संवर्च्चसा ॥ संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशि
वेन॥त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १४ ॥ [४]
समिन्द्र । णोमनसानेषिगोभिःसꣳसूरिभिर्म्मघवन्त्सꣳस्वस्त्या ॥

सम्ब्रह्म॑णादे॒वकृ॑तं॒ऽयदस्ति॒सन्दे॒वाना॑ꣳसुम॒तौय॒ज्ञिया॑ना॒ꣳस्वाहा॑
॥ १५ ॥ संव्वर्च्च॑सा ॥ संव्वर्च्च॑सा॒पय॑सा॒सन्त॒नूभि॒रग॑न्महि॒मन॑सा॒सꣳ
शि॒वेन॑। त्वष्टा॑सु॒दत्रो॒व्विद॑धातु॒रायो॒नु॑मार्ष्टु॒तन्वो॒यद्विलि॑ष्टम् ॥ १६ ॥
धा॒ता॒राति॑ः। सवि॑तेदञ्जु॑षन्ताम्प्र॒जाप॑ति॒र्न्नि॑धि॒पादे॒वोऽअ॒ग्निः ॥ त्व
ष्टाव्विष्णु॑ःप्प्र॒जया॑सꣳरराणा॒यज॑मानाय॒द्रवि॑णन्दधात॒स्वाहा॑
॥ १७ ॥ सु॒गाव॑ः ॥ सु॒गावो॑दे॒वाःसद॑नाऽअक॒र्म्म॒यऽआ॑ज॒ग्मेदꣳस
वन॑ञ्जुषा॒णाः ॥ भर॑माणा॒व्वह॑मानाह॒वीꣳष्य॒स्मेध॑त्तवस॒वोव्वसू॑नि

स्वाहा॑॥१८॥ याँ॑२॥ऽआव॑हः॥ याँ॑२॥ऽआव॑हऽउश॒तोदे॑वदे॒वाँस्तान्प्रे

र॑य॒स्वेऽअ॑ग्नेस॒धस्त्थे॑॥ ज॒क्षि॒वाꣳस॑÷पपि॒वाꣳस॑ श्च॒विश्वेसुं॑ङ्घ॒र्म्मꣳ

स्व॒राति॑ष्ठ॒तानु॒स्वाहा॑ ॥ १९ ॥ व॒यꣳहि । त्त्वां॑प्प्रय॒तिय॒ज्ञेऽअ॒स्म्मिन्न

ग्ने॒होता॑र॒मवृ॑णीमही॒ह ॥ ऋध॑ग॒याऽऋध॑गु॒ताश॑मिष्ठाःप्प्रजा॒नन्य॒

ज्ञमु॑पयाहिवि॒द्वान्त्स्वाहा॑ ॥ २० ॥ देवा॑गातुविदः ॥ देवा॑गातुविदो

गा॒तुं॑वि॒त्त्वागा॒तुमि॑त ॥ मन॑सस्प्पतऽइ॒मन्दे॑वय॒ज्ञꣳस्वाहा॒वाते॑धाः

॥ २१ ॥ यज्ञं॑य॒ज्ञम् ॥ यज्ञं॑य॒ज्ञङ्गच्छय॒ज्ञप॑तिङ्गच्छ॒स्वांऽयोनि॑ङ्गच्छ॒

स्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकꣳसर्व्ववीरस्तज्जुषस्वस्वाहा
॥ २२ ॥ [८]माहिः ॥ माहिर्भूर्म्मापृदाकुः ॥ उरुꣳहिराजाव्वरुणश्च
कारसूर्य्यायपन्थामन्वेतवाऽउं ॥ अपदेपादाप्प्रतिधातवेकरुतापवु
क्ताहृदयाव्विधश्चित् ॥ नमोव्वरुणायाभिष्ठितोव्वरुणस्यपाशः ॥२३॥
अग्नेरनीकम् ॥ अग्नेरनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्य्य
म् ॥ दमेदमेसमिधꣳयक्ष्यग्नेप्प्रतितेजिह्वाघृतमुच्चरण्यत्स्वाहा ॥२४॥
समुद्रेते ॥ समुद्रेतेहृदयमप्प्स्वन्तःसन्त्वाविशन्त्वोषधीरुतापः ॥

य॒ज्ञस्य॑त्त्वायज्ञपते॒सू॒क्तोक्तौ॑नमो॑वा॒केव्विं॑धे॒म॒यत्स्वाहा॑ ॥ २५ ॥ देवीं॑
रापः ॥ देवीं॑रापऽए॒षवो॒गर्भ॒स्तꣳसु॒प्रीत॒ꣳसुभृ॑तम्बिभृत ॥ देवं॑सोमै॒ष
ते॑लो॒कस्ता॒स्मि॒ञ्छञ्च॒व॒क्ष्व॒परिं॑चव॒क्ष्व ॥ २६ ॥ अवं॑भृथनिचु॒म्पुण ।
निचे॒रुरं॑सिनिचु॒म्पुणः ॥ अवं॑दे॒वैर्दे॒वकृ॑त॒मेनो॑यासिष॒मव॒मर्त्यै॒र्म्मर्त्यं॑
कृ॑तम्पु॒रु॒राव्वणो॑देवरि॒षस्पा॑हि॒दे॒वानां॑ꣳस॒मिदं॑सि ॥ २७ ॥ [५] एजं॑
तु॒दश॑मास्यः ॥ एजं॑तु॒दश॑मास्यो॒गर्भो॑जु॒रायु॑णास॒ह ॥ यथा॒यं॑व्वा॒युरे
जं॑ति॒यथा॑समु॒द्रऽएजं॑ति ॥ एवाय॒न्दश॑मास्यो॒ऽअस्त्रं॑ज्जु॒रायु॑णास॒ह

॥ २८ ॥ यस्यैते । य॒ज्ञियो॒ग~भो॑यस्यै॒योनि॑र्हि॑र॒ण्यया॑ ॥ अङ्गा॒न्य~हु॑
ता॒यस्यु॒तम्मा॒त्रासम॑जीगम॒ꣳस्वाहा॑ ॥ २९ ॥ पु॒रु॒दु॒स्म्मोव्विषु॑रूपꣳ ॥
पु॒रु॒दु॒स्म्मोव्विषु॑रूप॒ऽइन्दु॑र॒न्तम्म॑हि॒मान॑मानञ्ज॒धीर॑÷ ॥ एक॑पदी
न्द्वि॒पदी॑न्त्रि॒पदी॒ञ्चतु॑ष्पदी॒मष्टाप॑दी॒म्भुव॒नानु॑ष्प्रथन्ता॒ꣳस्वाहा॑
॥ ३० ॥ मरु॑तो॒यस्य॑ ॥ मरु॑तो॒यस्य॒हिक्षये॑पा॒थादि॒वोव्वि॑महसꣳ ॥ ससु
गो॒पात॑मो॒जन॑÷ ॥ ३१ ॥ म॒हीद्यौः । पृ॑थि॒वीच॑नऽइ॒मंय्य॒ज्ञम्मि॑मि
क्षताम् ॥ पि॒पृ॒ता॒न्नोभरी॑माभिꣳ ॥ ३२ ॥ [५] आति॑ष्ठ । वृ॒त्रह॒न्न्रथ॑य्यु॒

क्ता॒ते॒ब्रह्म॑णा॒हरी॑ ॥ अ॒र्व्वा॒चीन॒ꣳसुते॒मनो॒ग्ग्रावा॑कृणोतुव्व॒ग्ग्नुना॑ ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाषोड॒शिन॑ऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाषोड॒शिने॑ ॥ ३३ ॥ [ १ ] युक्ष्वाहि । के॒शिना॒हरी॒वृष॑णाकक्ष्य॒प्प्रा ॥ अथा॑नऽइन्द्रसोमपागि॒रामुप॑श्श्रुतिञ्चर ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाषोड॒शिन॑ऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाषोड॒शिने॑ ॥ ३४ ॥ [१] इन्द्र॒मित् ॥ इन्द्र॒मिद्धरी॑व्वह॒तोप्प्र॑तिधृष्टशवसम् ॥ ऋषी॑णाञ्चस्तुतीरुप॑य॒ज्ञ॒ञ्चमानु॑षाणाम् ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाषोड॒शिन॑ऽए॒षते॒योनि॒रिन्द्रा॑

यत्त्वाषोडशिने ॥३५॥ [१] यस्मान्न । जातःपरोऽअन्योऽअस्तियऽ
आविवेशभुवनानिविश्श्वा ॥ प्रजापतिःप्प्रजयासꣳरराणस्त्रीणिज्ज्यो
तीꣳषिसचतेसषोडशी ॥३६॥ इन्द्रश्श्च । सम्म्राड्वरुणश्श्चराजातौतेभक्ष
ञ्चक्रतुरग्ग्रऽएतम् ॥ तयोरहमनुभक्षम्भक्षयामिव्वाग्ग्देवीजुषाणा
सोमस्यतृप्प्यतुसहप्प्राणेनस्वाहा ॥३७॥ [२] अग्नेपवस्व ॥ अग्नेपव
स्वस्वपाऽअस्म्मेव्वर्च्चःसुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयामगृ
हीतोस्यग्नयेत्त्वावर्चसऽएषतेयोनिरग्नयेत्त्वाव्वर्च्चसे ॥ अग्नेवर्च्चस्वि

न्वर्च्चँस्वाँस्त्वन्देवेष्ष्वासिव्वर्च्चँस्वानहम्मंनुष्ष्येषुभूयासम् ॥ ३८ ॥
[१]उत्तिष्ठन्नोजंसा ॥ उत्तिष्ठन्नोजंसासहपीत्वीशिप्प्रेंऽअवेपयः ॥ सो
मंमिन्द्रचमूसुतम् ॥ उपयामगृंहीतोसीन्द्रांयत्त्वौजंसऽएषतेयोनि
रिन्द्रांयत्त्वौजंसे ॥ इन्द्रौजिष्ठौजिंष्ठस्त्वन्देवेष्ष्वस्योजिंष्ठोहम्म्मंनु
ष्ष्येषुभूयासम् ॥ ३९ ॥ [१]अदृंश्श्रमस्य । केतवोव्विरश्म्मयोजनाँ२ ॥
ऽअनुं ॥ भ्राजंन्तोऽअग्ग्नयोंयथा ॥ उपयामगृंहीतोसिसूर्य्यांयत्त्वा
भ्भ्राजायैषतेयोनिःसूर्य्यांयत्त्वाभ्भ्राजायं ॥ सूर्य्यंभ्भ्राजिष्ठभ्भ्राजिं

ष्ठुस्त्वन्देवेष्ष्वसिब्भ्राजिष्ठोहम्मनुष्ष्येषुभूयासम् ॥ ४० ॥ [१]उदु
त्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेव्विश्श्वायसूर्य्य
म् ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाब्भ्राजायैषतेयोनिꣳसूर्य्यायत्वा
ब्भ्राजाय ॥ ४१ ॥ [ १ ] आजिग्घ्र ॥ आजिग्घ्रकलशम्मह्यात्वाव्विश
न्त्विन्दवꣳ ॥ पुनरूर्ज्जानिवर्तस्वसानःसहस्रन्धुक्क्ष्वोरुधारापयस्व
तीपुनर्म्माविशताद्द्रयिः ॥४२॥ इडेरन्ते ॥ इडेरन्तेहव्व्येकाम्म्येचन्द्रे
ज्ज्योतेदितिसरस्वतिमहिविश्श्रुति ॥ एतातेऽअग्घ्न्येनामानिदेवेब्भ्यो

मासु॒कृ॒त॑म्ब्रू॒तात् ॥४३॥ [२] व्विन॑ः ॥ व्विन॑ऽइन्द्र॒मृधो॑जहिनी॒चाय॑च्छ
पृतन्य॒तः ॥ योऽअ॒स्म्माँ२॥ऽअ॑भि॒दास॒त्त्यध॑रङ्गमया॒तम॑ः ॥ उ॒प॒या॒म
गृ॑हीतो॒सीन्द्रा॑यत्त्वाव्वि॒मृध॑ऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाव्वि॒मृधे॑ ॥ ४४ ॥
[१] व्वा॒चस्प्पतिं॑ । व्वि॒श्वक॑र्म्माणमू॒तये॑मनो॒जुव॑व्वाजे॑ऽअ॒द्याहु॑वेम ॥
सनो॒व्विश्वा॑नि॒हव॑नानिजोषा॑द्वि॒श्वश॑म्भू॒रव॑सेसा॒धुक॑र्म्मा ॥ उ॒प॒या॒म
गृ॑हीतो॒सीन्द्रा॑यत्त्वाव्वि॒श्वक॑र्म्मण॒ऽए॒षते॒योनि॒रिन्द्रा॑यत्त्वाव्वि॒श्वक॑र्म्म
णे ॥ ४५ ॥ [१] व्विश्व॑ङ्कर्म्म॑न्ह॒विषा॑ ॥ व्विश्व॑ङ्कर्म्म॑न्ह॒विषा॒व्वर्द्धे॑

नेनत्त्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्म्मैव्विशःसमनमन्तपूर्व्वीरयमु
ग्ग्रोव्विहव्योयथासत् ॥ उपयामगृहीतोसीन्द्रायत्त्वाव्विश्वकर्म्मणऽ
एषतेयोनिरिन्द्रायत्वाव्विश्वकर्म्मणे ॥ ४६ ॥ [ १ ] उपयामगृ
हीतोसि ॥ उपयामगृहीतोस्यग्ग्नयेत्त्वागायत्रच्छन्दसंगृह्णामीन्द्रा
यत्त्वात्त्रिष्टुप्छन्दसंगृह्णामिव्विश्वेब्भ्यस्त्वादेवेब्भ्योजगच्छन्दसंगृह्णा
म्म्यनुष्टुप्तेभिगरः ॥ ४७ ॥ व्व्रेशीनान्त्वा ॥ व्व्रेशीनान्त्वापत्म
न्नाधूनोमिकुकूननानान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्म

न्नाधूंनोमिमुदिन्तंमानान्त्वापत्क्ष्मन्नाधूंनोमिमुधुन्तंमानान्त्वाप
त्क्ष्मन्नाधूंनोमिशुक्रन्त्वांशुक्रऽआधूंनोम्म्यह्नौंरूपेसूर्य्यंस्यरश्मिषुं
॥ ४८ ॥ ककुभꣳरूपं । वृंषभस्यंरोचतेबृहच्छुक्रःशुक्रस्यंपुरोगाः
सोमꣳसोमंस्यपुरोगाः ॥ यत्तेंसोमादांभ्यन्नामजागृंवितस्मैंत्त्वा
गृह्णामितस्मैंतेसोमसोमांयस्वाहां ॥ ४९ ॥ उशिक्त्वम् ॥ उशि
क्त्वन्देंवसोमाग्नेःप्प्रियम्पाथोपींहिव्वशीत्वन्देंवसोमेन्द्रंस्याप्प्रियम्पा
थोपींह्यस्म्मत्संखात्वन्देंवसोमव्विश्वेंषान्देवानांम्प्प्रियम्पाथोपींहि

॥ ५० ॥ [ ४ ] इहरतिः ॥ इहरतिरिहरमद्ध्वमिहधृतिरिहस्वधृतिꣳस्वाहा ॥ उपसृजन्धरुणम्मात्रेधरुणोमातरन्धयन् ॥ रायस्पोषमस्म्मासुदीधरत्स्वाहा ॥ ५१ ॥ सत्रस्यऽऋद्धिः ॥ सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्व्याऽअद्ध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ॥ ५२ ॥ सुवन्तम् ॥ सुवन्तामिन्द्रापर्व्वतापुरोयुधायोनःपृतन्न्यादपतन्तमिद्धतंव्वज्ज्रेणतन्तमिद्धतम्॥ दूरेचत्तायच्छन्त्सद्गहनंय्यदिनक्षत् ॥ अस्म्माकꣳशत्रूँन्परिशूरविश्वतोदर्म्मादर्षीष्टवि

श्वतं÷ ॥ भूर्भुवःस्व÷सुप्प्रजाःप्प्रजाभिं÷स्यामसुवीरांव्वीरैःसुपोषाः
पोषैं÷ ॥५३॥ [३] परमेष्ठ्यभिधींतः । प्प्रजापंतिर्व्वाचिव्याहृंतायाम
न्धोऽअच्छेतःसवितासन्न्यांव्विश्वकंर्म्मादीक्षायांम्पूषासोंमक्क्रयंण्या
मिन्द्रंश्च ॥ ५४ ॥ इन्द्रंश्च । मरुतंश्चक्क्रयायोपोत्थितोसुंरःपण्यमांनो
मित्रःक्क्रीतोव्विष्ष्णुं÷शिपिविष्टऽऊरावासंन्नोव्विष्ष्णुंर्न्नरन्धिषःप्प्रोह्य
मांणःसोमं÷ ॥ ५५ ॥ प्प्रोह्यमांणःसोमं÷ ॥ प्प्रोह्यमांणःसोमऽआगं
तोव्वरुंणऽआसन्द्यामासंन्नोग्ग्निराग्नींध्रऽइन्द्रोंहविर्द्धानेथंर्व्वोंपावह्रि

यमाणोव्विश्श्वेदेवाः ॥ ५६ ॥ व्विश्श्वेदेवाः ॥ व्विश्श्वेदेवाऽअꣳशुषुन्न्युप्तोव्विष्ष्णुराप्प्रीतपाऽआप्प्यायमानोयमःसुयमानोव्विष्ष्णु÷सम्भ्रियमाणोव्वायुःपूयमानꣳशुक्रःपूतःशुक्रःक्षीरश्श्रीर्म्मन्थीसक्तुश्श्रीर्व्विश्श्वेदेवाः ॥ ५७ ॥ व्विश्श्वेदेवाः ॥ व्विश्श्वेदेवाश्चमसेषून्नीतोसुर्होमायोद्यतोरुद्द्रोहूयमानोव्वातोऽभ्यावृत्तोनृचक्षाꣳप्प्रतिक्ख्यातोभक्षोभक्ष्यमाणꣳपितरोनाराशꣳसाःसन्नःसिन्धु÷ ॥५८॥ सन्नःसिन्धु÷ ॥ सन्नःसिन्धुरवभृथायोद्यतꣳसमुद्द्रोऽभ्यवह्रियमाणꣳसलिलःप्प्रप्लुतोययो

रोज॑सास्क्काभि॒तारजा॑ꣳसिव्वी॒र्य्यै॑भिर्व्वी॒रत॑मा॒शवि॑ष्ठा ॥ यापत्यै॑ते॒ऽअ
प्प्र॑तीता॒सहो॑भि॒र्व्विष्ष्णू॑ऽअग॒न्वरु॑णापू॒र्व्वहू॑तौ ॥ ५९ ॥ दे॒वान्दिव॑म् ॥
दे॒वान्दिव॑मगन्य॒ज्ञस्ततो॑मा॒द्द्रवि॑णमष्टु॒मनु॒ष्ष्यान॒न्तरि॑क्षमगन्य॒ज्ञ
स्ततो॑मा॒द्द्रवि॑णमष्टु॒पि॒तॄन्पृ॑थि॒वीम॑गन्य॒ज्ञस्ततो॑मा॒द्द्रवि॑णमष्टु॒यङ्क॒ञ्च॑
लो॒कमग॑न्य॒ज्ञस्ततो॑मेभ॒द्रम॑भूत् ॥ ६० ॥ चतु॑स्त्त्रि॒ꣳश॒त्तन्त॑वः ॥ चतु॑स्त्त्रि
ꣳश॒त्तन्त॑वो॒येव्वि॑तत्नि॒रेयऽइ॒मंय॒ज्ञꣳस्व॒धया॒दद॑न्ते ॥ तेषा॑ञ्छि॒न्न
ꣳसम्म्वे॒तद्द॑धामि॒स्वाहा॑घ॒र्म्मोऽअप्प्ये॑तुदे॒वान् ॥ ६१ ॥ य॒ज्ञस्य॒दोहः॑ ॥

यज्ञस्यदोहोव्विततःपुरुत्रासोऽअष्टधादिवमन्वाततान॥सयज्ञधुक्ष्व महिमेप्प्रजायाꣳरायस्प्पोषंव्विश्वमायुरशीयस्वाहा॥६२॥आपवस्व॥ आपवस्वहिरण्यवदश्वावत्सोमव्वीरवत्॥ व्वाजङ्गोमन्तमाभरस्वाहा ॥६३॥[१०]॥२३॥इतिश्रीवाजसनेयसंहितायांअष्टमोऽध्यायः ॥८॥ श्रीवेदपुरुषायनमः॥ अनुवाक्सूत्रम्॥ देवसवितश्चतस्र, इंद्रस्यवज्रःपंच,देवस्याहंदश,पयेस्वाहातिस्रो,वाजस्येममष्टा,वग्निरे काक्षरेणचतुष्कौ,षतेचतुष्कौ,सवितात्वाद्वे,अष्टौचत्वारिꣳशत्॥

[ॐ देवसवितेत्यनुवाकस्य वामदेव ऋषिरग्निर्देवता विराट् छन्दश्चान्द्रायणव्रतस्य फलप्राप्तिकामः पाठे-
विनियोगः ॥ ८ ॥]

हरिःॐ ॥ देवसवितꣳ ॥ देवसवितꣳप्प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगा
य ॥ दिव्योगन्धर्व्वꣳकेतपूꣳकेतन्नꣳपुनातुव्वाचस्प्पतिर्व्वाजन्नꣳस्वदतु
स्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनꣳसदमुपयामगृहीतोसीन्द्राय
त्वाजुष्टँगृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ अप्प्सुषदन्त्वाघृ
तसदँव्योमसदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनि
रिन्द्रायत्वाजुष्टतमम् ॥ पृथिविसदन्त्वान्तरिक्षसदन्दिविसदन्देवस
दन्नाकसदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रा

यत्त्वाजुष्टंतमम् ॥ २ ॥ अपाꣳरसंम् ॥ अपाꣳरसमुद्वंयसꣳसूर्य्यैंस
न्तंꣳसमाहितम् ॥ अपाꣳरसंस्ययोरसस्तंव्वोंगृह्णाम्म्युत्तममुंपयाम
गृंहीतोसीन्द्रांयत्त्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिरिन्द्रांयत्त्वाजुष्टंतमम्
॥३॥ ग्रहांऽऊर्ज्जांहुतयः ॥ ग्रहांऽऊर्ज्जांहुतयोव्यन्तोव्विप्प्रांयमतिम् ॥
तेषांव्विशिंप्प्रियाणांव्वोहमिषमूर्ज्जꣳसमंग्ग्रभमुपयामगृंहीतोसीन्द्रांय
त्त्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिरिन्द्रांयत्त्वाजुष्टंतमम् ॥ सम्पृचौस्त्थः
सम्मांभद्रेणंपृङ्क्तंव्विपृचौस्थोव्विमांपाप्मनांपृङ्क्तम् ॥ ४ ॥ [ ४ ] इन्द्रं

स्य॒व्वज्ज्रं॑÷ ॥ इन्द्रं॑स्य॒व्वज्ज्रो॑सि॒व्वाज॒सास्त्वया॒यंव्वाजं॑ꣳसेत् ॥ व्वाजं॑
स्य॒नुप्प्रं॑स॒वेमा॒तरं॑म्म॒हीमदि॑ति॒न्नाम॒व्वचं॑साकरामहे ॥ यस्यां॑मि॒दंव्वि
श्श्व॒म्भुवं॑नमावि॒वेश॒तस्यां॑न्नोदे॒वः सं॑वि॒ताधर्म्मँ॑साविषत् ॥ ५ ॥ अ॒
प्प्स्व॒न्तः ॥ अ॒प्प्स्व॒न्तर॒मृतं॑म॒प्प्सुभे॑ष॒जम॒पामु॒तप्प्रशं॑स्ति॒ष्ष्वश्श्वा॒भ
वं॑तव्वा॒जिनं÷ ॥ देवी॑रापो॒योवं॑ऽऊ॒र्म्मिः प्प्र॒तूर्तिं॑ꣳक॒कुन्मांन्वाज॒सा
स्तेना॒यंव्वाजं॑ꣳसेत् ॥ ६ ॥ व्वातो॑वा ॥ व्वातो॑वा॒मनो॑वा॒गन्ध॒र्व्वाः स॒
प्तविं॑ꣳशतिंꣳ ॥ तेऽअग्ग्रेश्श्वं॑मयुञ्जँ॑स्तेऽअं॑स्म्मिञ्जव॒मादं॑धुंꣳ ॥ ७ ॥

वातरꣳहाभव। वाजिन्युज्यमानऽइन्द्रस्येवदक्षिणःश्रियैधि॥ युञ्ज
न्तुत्त्वामरुतोविश्ववेदसऽआतेत्त्वष्टापत्सुजवन्दधातु ॥ ८ ॥ जवो
यः ॥ जवोयस्तेवाजिन्निहितोगुहायःश्येनेपरीत्तोऽअचरच्चवाते ॥
तेननोवाजिन्बलवान्बलेनवाजजिच्चभवसमनेचपारयिष्णुः ॥
वाजिनोवाजजितोवाजꣳसरिष्यन्तोबृहस्पतेर्भागमवजिघ्रत
॥ ९ ॥ [ ५ ] देवस्याहम् ॥ देवस्याहꣳसवितुःसवेसत्त्यसवसोबृहस्प
तेरुत्तमन्नाकꣳरुहेयम् ॥ देवस्याहꣳसवितुःसवेसत्यसवसऽइन्द्रस्यो

त्तमन्नाकं६ःरुहेयम् ॥ देवस्याह६ःसंवितुःसवेसत्त्यप्प्रंसवसोबृहस्प्पते
रुत्तमन्नाकंमरुहम् ॥ देवस्याह६ःसंवितुःसवेसत्त्यप्प्रंसवसऽइन्द्रंस्यो
त्तमन्नाकंमरुहम् ॥ १० ॥ बृहंस्प्पतेव्वाजंम् ॥ बृहंस्प्पतेव्वाजंञ्जयबृ
हस्प्पतंयेव्वाचंव्वदतबृहस्प्पातिंव्वाजंञ्जापयत ॥ इन्द्रव्वाजंञ्जयेन्द्रांय
व्वाचंव्वदतेन्द्रंव्वाजंञ्जापयत ॥ ११ ॥ एषावं÷ ॥ एषाव६ंसासत्त्यासं
व्वागंभूव्वयाबृहस्प्पातिंव्वाजमजींजपताजींजपतबृहस्पातिंव्वाजंव्वनं
स्प्पतयोव्विमुंञ्चयद्ध्वम् ॥ एषाव६ंसासत्त्यासंव्वागंभूव्वयेन्द्रंव्वाजमजीं

जपताजीजपतेन्द्रंव्वाजंव्वनस्प्पतयोव्विमुच्च्यद्ध्वम् ॥ १२ ॥ देवस्या
हम् ॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्रसवसोबृहस्प्पतेर्व्वाजजितोव्वा
जञ्जेषम् ॥ व्वाजिनोव्वाजजितोद्ध्वनस्क्कब्भ्नुवन्तोयोजनामिमानाꣳ
काष्ठाङ्गच्छत ॥ १ ३॥ः एषस्यः ॥ एषस्यव्वाजीक्षिपणिन्तुरण्ण्यतिग्ग्री
वायाम्बद्धोऽअपिकक्षऽआसनि ॥ क्रतुन्दधिक्क्राऽअनुसꣳसनिष्ष्य
दत्त्पथामङ्क्काꣳस्यन्वापनीफणत्स्वाहा ॥ १४ ॥ उतस्म्म ॥ उतस्म्मा
स्यद्द्रवतस्तुरण्ण्यतःपर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः ॥ श्येनस्येवद्ध्रजतोऽ

अङ्कुसम्पारिंदधिक्क्राव्ण्णं÷सहोर्ज्जातरित्रतᳫंस्वाहा ॥ १५ ॥ शन्नं÷ ॥
शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवᳫंस्वर्क्काः ॥ जम्भयन्तो
हिंव्वृकᳫंरक्षाᳫंसिसनेम्म्यस्स्मद्युयवन्नमीवाᳫं ॥ १६ ॥ तेनं÷ ॥ तेनो
ऽअर्व्वन्तोहवनश्श्रुतोहवंव्विश्श्वेशृण्ण्वन्तुव्वाजिनोमितद्द्रवᳫं ॥ सहस्र
सामेधसातासनिष्ष्यवोमहोयेधनᳫंसमिथेषुजाब्भ्रिरे ॥ १७ ॥ व्वाजे
वाजेवत । व्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽऋतज्ञाᳫं ॥ अस्यमद्ध्वं÷
पिबतमादयद्ध्वन्तृप्ताय्यातपथिभिर्द्देवयानैᳫं ॥ १८ ॥ आमा ॥ आमा

व्वाजस्यप्प्रसवोजगम्म्यादेमेद्यावापृथिवीव्विश्वरूपे ॥ आमागन्ताम्पि
तरामातराचामासोमोऽअमृतत्वेनगम्म्यात् ॥ व्वाजिनोव्वाजजितो
व्वाजꣳससृवाꣳसोबृहस्प्पतेर्ब्भागमवजिघ्रतानिमृजानाः ॥ १९ ॥
[ १० ] आपयेस्वाहा । स्वापयेस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्वस
वेस्वाहाहर्प्पतयेस्वाहाह्नेमुग्धायस्वाहामुग्धायवैनꣳशिनायस्वाहा
व्विनꣳशिनऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यप
तयेस्वाहाधिपतयेस्वाहा ॥ २० ॥ आयुर्य्यज्ञेन । कल्प्पताम्प्राणो

य॒ज्ञेन॑कल्प्पता॒ञ्चक्षु॑र्य्य॒ज्ञेन॑कल्प्पता॒ᳪश्श्रोत्रं॑य्य॒ज्ञेन॑कल्प्पताम्पृ॒ष्ठं
य्य॒ज्ञेन॑कल्प्पतां॑य्य॒ज्ञोय॒ज्ञेन॑कल्प्पताम् ॥ प्र॒जाप॑तेःप्र॒जाऽअ॑भूम॒
स्व॒र्द्दे॑वाऽअगन्मा॒मृता॑ऽअभूम ॥ २१ ॥ अ॒स्मेवं॑÷ ॥ अ॒स्मेवो॑ऽअ
स्त्वि॒न्द्रि॒यम॒स्मेनृ॒म्म्णमु॒तक्क्रतु॑र॒स्मेव्वर्च्चा॑ᳪसिसन्तुवः ॥ नमो॑मा॒
त्रेपृ॑थि॒व्यैनमो॑मा॒त्रेपृ॑थि॒व्याऽइ॒यन्ते॒राड्ड॒यन्ता॑सि॒यम॑नोध्रु॒वो॑सिध॒रु
णं÷ ॥ कृ॒ष्यैत्त्वा॒क्षेमा॑यत्त्वार॒य्यैत्त्वा॒पोषा॑यत्त्वा ॥ २२ ॥ [ ३ ] व्वाजं
स्ये॒मम् ॥ व्वाजं॑स्ये॒मम्प्रं॑स॒वःसुं॑षुवे॒ग्ग्रे॒सोम॒ᳪराजा॑न॒मोषं॑धीष्ष्व॒प्प्सु ॥

ताऽअस्म्मब्भ्यम्मधुमतीर्ब्भवन्तुव्वयꣳराष्ट्रेजागृयामपुरोहिताꣳस्वा
हा ॥ २३ ॥ व्वाजस्येमाम् ॥ व्वाजस्येमाम्प्रसवःशिश्श्रियेदेवमि
माचव्विश्श्वाभुवनानिसम्म्राट् ॥ अदित्सन्तन्दापयतिप्प्रजानन्त्स
नोरयिꣳसर्व्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥ व्वाजस्यनु । प्प्रसवऽआब
भूवेमाचव्विश्श्वाभुवनानिसर्व्वत÷ ॥ सनेमिराजापरियातिव्विद्वान्प्रजां
पुष्टिंव्वर्द्धयमानोऽअस्म्मेस्वाहा ॥ २५ ॥ सोमꣳराजानम् । सोमꣳ
राजानमवसेग्निमन्वारभामहे ॥ आदित्त्यान्विष्ष्णुꣳसूर्य्यम्ब्रह्माणं

ब्बृहस्प्पतिꣳस्वाहा ॥ २६ ॥ अर्य्यमणम्बृहस्प्पतिम् ॥ अर्य्यमणम्बृ
हस्प्पतिमिन्द्रन्दानायचोदय ॥ व्वाचंव्विष्णुꣳसरस्वतीꣳसवितारंव्व
व्वाजिनꣳस्वाहा ॥ २७ ॥ अग्ग्नेऽअच्छ ॥ अग्नेऽअच्छावदेहनःप्प्रतिनः
सुमनाभव ॥ प्रनोयच्छसहस्रजित्त्वꣳहिधनदाऽअसिस्वाहा ॥ २८ ॥
प्रनः ॥ प्रनोयच्छत्त्वर्य्यमाप्प्रपूषाप्प्रबृहस्प्पतिः ॥ प्रवाग्ग्देवीददातु
नःस्वाहा ॥ २९ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्विनोर्बाहुभ्याम्पूष्णोह
स्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तुर्य्यन्त्रियैदधामिबृहस्प्पतेष्ट्वासाम्म्रा

ज्ज्येना॒भिषि॑ञ्चाम्म्यसौ ॥ ३० ॥ [८] अ॒ग्निरेका॑क्षरेण । प्प्रा॒णमु॑द्
जय॒त्तमुज्जे॑षम॒श्श्विनौ॒द्व्य॑क्षरेणा॒द्द्विप॒दो॑मनु॒ष्या॒नुद॑जयता॒न्तानुज्जे॑
षं॒विष्ष्णु॒स्त्र्य॑क्षरेण॒त्त्रीन्ल्लो॒कानुद॑जय॒त्तानुज्जे॑ष॒ꣳसोम॒श्चतु॑रक्षरेण॒च
तु॑ष्प्पद॒ꣳप॒शूनुद॑जय॒त्तानुज्जे॑षम्पू॒षापञ्चा॑क्षरेण ॥ ३१ ॥ पू॒षापञ्चा॑क्षरे
ण ॥ पू॒षापञ्चा॑क्षरेण॒पञ्च॒दिश॒ऽउद॑जय॒त्ताऽउज्जे॑षꣳसवि॒ताषड॑क्षरेण॒ष
डृ॒तूनुद॑जय॒त्तानुज्जे॑षम्म॒रुत॑÷स॒प्प्ता॑क्षरेणस॒प्प्तग्ग्रा॒म्म्यान्प॒शूनुद॑जयँ॒
स्तानुज्जे॑ष॒म्बृह॒स्प्पति॒रष्टा॑क्षरेणगाय॒त्त्रीमुद॑जय॒त्तामुज्जे॑षम्मि॒त्त्रोनवा॑

क्षरेण ॥ ३२ ॥ मित्रोनवाक्षरेण । त्रिवृतꣳस्तोममुदजयत्तमुज्जेषंव्वरुणोदशाक्षरेणाव्विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेणात्रिष्टुभमुदजयत्तामुज्जेषंव्विश्वेदेवाद्वादशाक्षरेणजगतीमुदजयँस्तामुज्जेषंव्वसवस्त्रयोदशाक्षरेण ॥ ३३ ॥ व्वसवस्त्रयोदशाक्षरेण । त्रयोदशꣳस्तोममुदजयँस्तमुज्जेषꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दशꣳस्तोममुदजयँस्तमुज्जेषमादित्याःपञ्चदशाक्षरेणपञ्चदशꣳस्तोममुदजयँस्तमुज्जेषमदितिःषोडशाक्षरेणषोडशꣳस्तोममुदजयत्तमुज्जेष

म्प्रजापतिꣳसप्तदशाक्षरेणसप्तदशꣳस्तोममुदजयत्तमुज्जेषम् ॥
॥ ३४ ॥ [४] एषते। निर्ऋतेभागस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवे
भ्यं÷पुरꣳसद्भ्यꣳस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यꣳस्वाहावि
श्वदेवनेत्रेभ्योदेवेभ्यं÷पश्चात्सद्भ्यꣳस्वाहामित्रावरुणनेत्रेभ्योवाम
रुन्नेत्रेभ्योवादेवेभ्यंऽउत्तरासद्भ्यꣳस्वाहासोमनेत्रेभ्योदेवेभ्यंऽउप
रिसद्भ्योदुवस्वद्भ्यꣳस्वाहा ॥ ३५ ॥ येदेवाः ॥ येदेवाऽअग्निनेत्राꣳपुरꣳ
सदस्तेभ्यꣳस्वाहायेदेवायमनेत्रादक्षिणासदस्तेभ्यꣳस्वाहायेदेवा

विश्वदेवनेत्राःपश्चात्सदस्तेभ्यःस्वाहायेदेवामित्रावरुणनेत्रावाम
रुन्नेत्रावोत्तरासदस्तेभ्यःस्वाहायेदेवाःसोमनेत्राऽउपरिसदोदुवस्व
न्तस्तेभ्यःस्वाहा ॥ ३६ ॥ अग्ग्नेसहस्व ॥ अग्ग्नेसहस्वपृतनाऽअ
भिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्व्वर्च्चोधायज्ञवाहसि ॥ ३७ ॥ देवस्य
त्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ उपाꣳ
शोर्व्वीर्य्येणजुहोमिहतꣳरक्षःस्वाहारक्षसान्त्वावधायावधिष्मर
क्षोवधिष्मामुमसौहतः ॥ ३८ ॥ [४] सवितात्त्वा । सवानाꣳसुवता

म॒ग्निर्गृ॒हप॑तीना॒ꣳसोमो॒व्वन॒स्पती॑नाम् ॥ बृह॒स्पति॑र्व्वा॒चऽइन्द्रो॒ज्ज्यै
ष्ठ्या॑यरु॒द्रःप॒शुभ्यो॑मि॒त्रःस॒त्त्योव्वरु॑णो॒धर्म्म॑पतीनाम् ॥ ३९ ॥ इ॒म
न्दे॑वाः ॥ इ॒मन्दे॑वाऽअसप॒त्नꣳसु॑वद्ध्वम्मह॒तेक्ष॒त्त्राय॑मह॒तेज्ज्यैष्ठ्या॑य
मह॒तेजान॑राज्ज्या॒येन्द्र॑स्येन्द्रि॒याय॑ ॥ इ॒मम॒मुष्य॑पु॒त्रम॒मुष्यै॑पु॒त्रम॒
स्यै॒व्विशऽए॒षवो॑मीरा॒जासोमो॒स्म्माक॑म्ब्राह्म॒णाना॒ꣳराजा॑ ॥४०॥[२]
॥ ८ ॥ इतिश्रीवाजसनेयसंहितायांनवमोऽध्यायः ॥ ९ ॥ श्रीवेदपुरुषा
यनमः ॥ अनुवाक्सूत्रम् ॥ अपोदेवाश्चतस्रः, सोमस्यात्विषिःपञ्चा,

वेष्टादन्दशूकाःसप्त,सोमस्यत्वाचतस्र,ऽइन्द्रस्यव्वज्रःपञ्च,स्योनासिच
तस्रः,सवित्राप्रसवित्रैका,श्विभ्यांपच्यस्वचतस्रो,ष्टौचतुस्त्रिꣳशत् ॥
हरिःॐ॥ अ॒पोदे॒वाः॥ अ॒पोदे॒वामधु॑मतीरगृभ्ण॒न्नूर्ज॑स्वतीराज॒स्व॒श्चि
ता॑नाꣳ ॥ याभि॑र्म्मि॒त्रावरु॑णाव॒भ्यषि॑ञ्च॒न्याभि॒रिन्द्र॒मन॑य॒न्नत्यरा॑
तीꣳ॥१॥ वृष्ण॑ऽऊ॒र्मिः॥ वृष्ण॑ऽऊ॒र्म्मिर॑सिराष्ट्रदारा॒ष्ट्रम्मे॑दे॒हि॒स्वाहा॒
वृष्ण॑ऽऊ॒र्म्मिर॑सिराष्ट्रदारा॒ष्ट्रम॒मुष्मै॑देहिवृष॒से॒नो॑सिराष्ट्रदारा॒ष्ट्रम्मे॑दे

[ॐ अपोदेवेत्यनुवाकस्य गोतमऋषि वायुर्देवता त्रिष्टुप्छन्दः सोमयाग-फलप्राप्तिकामः पाठे विनियोगः।]

॥१०॥

हि॒स्वाहा॑वृ॒षसे॒नो॒सिराष्ट्र॒दारा॒ष्ट्रम॒मुष्मै॑देह्य॒र्त्थे॑त॑स्त्थ ॥ २ ॥ अ॒र्त्थे॑त॑
स्त्थ। राष्ट्र॒दारा॒ष्ट्रम्मे॑दत्त॒स्वाहा॒र्त्थे॑त॑स्त्थराष्ट्र॒दारा॒ष्ट्रम॒मुष्मै॑द॒त्तौज॑स्व
तीस्त्थराष्ट्र॒दारा॒ष्ट्रम्मे॑दत्त॒स्वाहौज॑स्वतीस्त्थराष्ट्र॒दारा॒ष्ट्रम॒मुष्मै॑द॒त्ता
प॑÷परिवा॒हिणी॑स्त्थराष्ट्र॒दारा॒ष्ट्रम्मे॑दत्त॒स्वाहाप॑÷परिवा॒हिणी॑स्त्थराष्ट्र॒
दारा॒ष्ट्रम॒मुष्मै॑दत्ता॒पाम्पति॑रसिराष्ट्र॒दारा॒ष्ट्रम्मे॑देहि॒स्वाहा॒पाम्पति॑र
सिराष्ट्र॒दारा॒ष्ट्रम॒मुष्मै॑देह्य॒पाङ्ग·र्ब्भो॑सिराष्ट्र॒दारा॒ष्ट्रम्मे॑देहि॒स्वाहा॒पाङ्ग

ब्भौँ॑सिराष्ट्रदारा॒ष्ट्रम॒मुष्म्मै॑देहि॒सूर्य्यँ॑त्त्वचसस्त्थ ॥ ३ ॥ सूर्य्यँ॑त्त्वचस
स्त्थ । राष्ट्रदारा॒ष्ट्रम्मै॑दत्त॒स्वाहा॒सूर्य्यँ॑त्त्वचसस्त्थराष्ट्रदारा॒ष्ट्रम॒मुष्म्मै॑द
त्त॒सूर्य्यँ॑वर्च्चसस्त्थराष्ट्रदारा॒ष्ट्रम्मै॑दत्त॒स्वाहा॒सूर्य्यँ॑वर्च्चसस्त्थराष्ट्रदारा॒ष्ट्र
म॒मुष्म्मै॑दत्त॒मान्दा॑स्त्थराष्ट्रदारा॒ष्ट्रम्मै॑दत्त॒स्वाहा॒मान्दा॑स्त्थराष्ट्रदारा॒
ष्ट्रम॒मुष्म्मै॑दत्तव्व्रजा॒क्षितं॑स्त्थराष्ट्रदारा॒ष्ट्रम्मै॑दत्त॒स्वाहा॑व्व्रजा॒क्षितं॑स्त्थरा
ष्ट्रदारा॒ष्ट्रम॒मुष्म्मै॑दत्त॒व्वाशा॑स्त्थराष्ट्रदारा॒ष्ट्रम्मै॑दत्त॒स्वाहा॒व्वाशा॑स्त्थराष्ट्र

दाराष्ट्रममुष्मैदत्तशविष्ठास्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाशविष्ठास्थरा
ष्ट्रदाराष्ट्रममुष्मैदत्तशक्वरीस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाशक्वरीस्त्थ
राष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाजनभृत
स्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहावि
श्वभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराजस्त्थराष्ट्रदाराष्ट्रममु
ष्मैदत्त ॥ मधुमतीर्म्मधुमतीभिःपृञ्च्यन्ताम्महिक्षत्रङ्क्षत्रियायव

न्वानाऽअनाधृष्टाꣳसीदतसहौजसोमहिक्षत्रङ्क्षत्रियायदधतीꣳ ॥४॥
[ ४ ] शतम् ॥ ४०० ॥ सोमस्यत्त्विषिः ॥ सोमस्यत्त्विषिरसित
वेवमेत्त्विषिर्भूयात् ॥ अग्नयेस्वाहासोमायस्वाहासवित्रेस्वाहासर
स्वत्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहा
श्श्लोकायस्वाहाꣳशायस्वाहाभगायस्वाहाऽर्य्यम्म्णेस्वाहा ॥ ५ ॥ पवि
त्रेस्त्थꣳ ॥ पवित्रेस्त्थोवैष्ष्णव्व्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छि
द्द्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ अनिभृष्टमसिव्वाचोबन्धुस्तपो

जाः॑ सोम॑स्य द॒त्रम॑सि॒ स्वाहा॑ राज॒स्वः॑ ॥ ६ ॥ स॒ध॒मादो॑ द्युम्म्निनीः॑ ॥
स॒ध॒मादो॑ द्युम्म्निनी॒राप॑ऽए॒ताऽअना॑धृष्टाऽअप॒स्यो॒ व्वसा॑नाः ॥ प॒स्त्या॒
सु च॒क्क्रे॒ व्वरु॑णः स॒धस्त्थ॑म॒पाꣳ शिशु॑र्म्मा॒तृत॑मास्व॒न्तः ॥ ७ ॥ क्ष॒त्र
स्योल्ब॑म् ॥ क्ष॒त्रस्योल्ब॑मसि क्ष॒त्रस्य॑ ज॒राय्व॑सि क्ष॒त्रस्य॒ योनि॑रसि क्ष॒
त्रस्य॒ नाभि॑र॒सीन्द्र॑स्य॒ व्वार्त्र॑घ्नमसि मि॒त्रस्या॑सि॒ व्वरु॑णस्यासि॒ त्वया॒यं॑ व्वृ॒
त्रं॑ व्व॑धेत् ॥ दृ॒वासि॑ रु॒जासि॑ क्षु॒मासि॑ ॥ पा॒तैन॒म्प्राञ्च॑म्पा॒तैन॑म्प्र॒त्यञ्च॑म्पा॒तै
नं॑ ति॒र्य्यञ्च॑न्दि॒ग्भ्यः पा॑त ॥ ८ ॥ आ॒विर्म्म॑र्य्याः ॥ आ॒विर्म्म॑र्य्या॒ऽआ

वि॑त्तोऽअ॒ग्निर्गृ॒हप॑ति॒रावि॑त्त॒ऽइन्द्रो॑वृ॒द्धश्श्र॑वा॒ऽआवि॑त्तौमि॒त्रावरु॑णौ
धृ॒तव्र॑ता॒वावि॑त्तꣳपू॒षावि॒श्श्ववे॑दा॒ऽआवि॑त्ते॒द्यावा॑पृथि॒वीवि॒श्श्वश॑म्भुवा॒
वावि॒त्तादि॑ति॒रु॒रुश॑र्म्मा ॥९॥ [ ५ ] अवे॑ष्टादन्द॒शू॒काः ॥ अवे॑ष्टादन्द॒
शू॒काꣳप्प्राची॒मारो॑हगाय॒त्रीत्त्वा॑वतुरथन्त॒रꣳसाम॑त्रि॒वृत्स्तोमो॑व्वस॒
न्तऽऋ॒तुर्ब्रह्म॒द्रवि॑ण॒न्दक्षि॑णा॒मारो॑ह ॥ १० ॥ दक्षि॑णा॒मारो॑ह । त्रि॒ष्टु
प्त्वा॑वतुबृ॒हत्साम॑पञ्चद॒शस्तोमो॑ग्ग्री॒ष्म्मऽऋ॒तुःक्ष॒त्त्रन्द्रवि॑णम्प्र॒ती
ची॒मारो॑ह ॥ ११ ॥ प्र॒ती॒ची॒मारो॑ह ॥ प्र॒ती॒ची॒मारो॑ह॒जग॑ती॒त्त्वा॑वतु॒वैरू॑प

ꣳसामसप्तदशस्तोमोव्वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह ॥१२॥ उदी
चीमारोह॥उदीचीमारोहानुष्टुप्त्वावतुव्वैराजꣳसामैकविꣳशस्तोमः
शरदृतुःफलन्द्रविणमूर्द्ध्वामारोह ॥ १३ ॥ ऊर्द्ध्वामारोह। पङ्क्तिस्त्वावतु
शाक्वररैवतेसामनीत्रिणवत्रयस्त्रिꣳशौस्तोमौहेमन्तशिशिरावृतूव्वर्च्चो
द्रविणम्प्रत्यस्तन्नमुचेःशिरः ॥१४॥ सोमस्यत्त्विषिः ॥ सोमस्यत्त्वि
षिरसितवेवमेत्विषिर्भूयात् ॥ मृत्योःपाह्योजोसिसहोस्यमृतमसि
॥१५॥ हिरण्यरूपाऽउषसः॥ हिरण्यरूपाऽउषसोव्विरोकऽउभावि

न्द्राऽउदिथुःसूर्य्यश्च ॥ आरोहतंव्वरुणमित्रगर्तन्ततश्चक्षाथामदिति
न्दितिञ्चमित्रोसिव्वरुणोसि॥ १६॥[७]सोमस्यत्त्वाद्युम्नेनाभिषिञ्चा
म्म्यग्नेर्ब्भ्राजसासूर्य्यस्यव्वर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्राणाङ्क्षत्रपतिरेद्ध्य
तिदिद्यून्पाहि ॥१७॥ इमन्देवाः ॥ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्मह
तेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इमम
मुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्म
णानाꣳराजा ॥ १८ ॥ प्रपर्व्वतस्य । वृषभस्यपृष्ठान्नावश्चरन्तिस्व

सिच॑ऽइया॒नाः ॥ ताऽआव॑वृत्रन्नध॒रागुद॑क्ता॒ऽअहि॒म्बुध्न्य॒मनु॒रीय॑मा
णाः ॥ व्विष्णो॑र्व्वि॒क्क्रम॑णमसि॒व्विष्णो॒र्व्विक्क्रा॑न्तमसि॒व्विष्णोः॑क्क्रा॒न्तम॑
सि ॥ १९ ॥ प्रजा॑पते॒न । त्त्वदे॒तान्य॒न्योव्वि॒श्वा॑रू॒पाणि॒परि॒ताब॑भू
व ॥ यत्का॑मास्तेजुहु॒मस्तन्नो॑ऽअस्त्व॒यम॒मु॒ष्य॑पि॒तासा॒वस्य॑पि॒ताव॒
यꣳस्या॑म॒पत॑योरयी॒णाꣳस्वाहा॑ ॥ रुद्र॒यत्ते॒क्क्रिवि॒पर॒न्नाम॒तस्मि॑न्हु
तम॑स्यमे॒ष्टम॑सि॒स्वाहा॑ ॥ २० ॥ [ ४ ] इन्द्र॑स्य॒व्वज्ज्र॑÷ ॥ इन्द्र॑स्य॒व्वज्ज्रो॑
सिमि॒त्रावरु॑णयोस्त्वाप्प्रशा॒स्त्रोःप्प्र॒शिषा॑युनज्मि ॥ अव्य॑थायैत्त्वा

स्व॒धायै॒त्त्वारि॑ष्टोऽअर्ज्जु॑नोम॒रुता॑म्प्रस॒वेन॑ज॒यापा॑म॒मन॑सा॒समि॑न्द्रि॒ये
ण॑ ॥ २१ ॥ माते॑ ॥ मात॑ऽइन्द्रतेव॒यन्तु॑राषा॒डयु॑क्तासोऽअब्र॒ह्मता॒वि
द॑साम ॥ तिष्ठा॒रथ॒मधि॒यंव॑ज्ज्रह॒स्तार॒श्म्मीन्दे॑वयमसे॒स्वश्वा॑न् ॥ २२ ॥
अ॒ग्नये॑गृ॒हप॑तये ॥ अ॒ग्नये॑गृ॒हप॑तये॒स्वाहा॒सोमा॑य॒व्वन॒स्प्पत॑ये॒स्वाहा॑म॒
रुता॒मोज॑से॒स्वाहेन्द्र॑स्येन्द्रि॒याय॒स्वाहा॑ ॥ पृथि॑विमात॒र्म्मामा॑हिꣳसी॒
र्म्मोऽअ॒हन्त्वाम् ॥ २३ ॥ ह॒ꣳसःशु॑चि॒षत् ॥ ह॒ꣳसःशु॑चि॒षद्व॒सु॑र
न्तरिक्ष॒सद्धोता॑व्वेदि॒षदति॑थिर्दुरोण॒सत् ॥ नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒

ब्ब्जागो॒जाऽऋ॑त॒जाऽअ॑द्रि॒जाऽऋ॒तम्बृ॒हत् ॥ २४ ॥ इय॑द॒सि ॥ इय॑
द॒स्यायु॑र॒स्यायु॒र्म्मयि॑धे॒हि॒युङ्ङ॑सि॒वर्च्चो॑सि॒वर्च्चो॒मयि॑धे॒ह्यूर्ग॒स्यूर्ज्ज॒म्मयि॑
धे॒हि ॥ इन्द्र॑स्यवांव्वी॒र्य्य॒कृतो॑बा॒हूऽअ॑भ्यु॒पाव॑हरामि ॥ २५ ॥
[ ५ ] स्यो॒नासि॑ । सु॒षदा॑सि क्ष॒त्रस्य॒योनि॑रसि ॥ स्यो॒नामासी॑दसु॒षदा॒
मासी॑दक्ष॒त्रस्य॒योनि॒मासी॑द ॥ २६ ॥ निष॑साद । धृ॒तव्व्र॑तो॒व्वरु॑णःप॒
स्त्या॒स्वा ॥ साम्म्रा॑ज्ज्यायसु॒क्रतु॑ः ॥ २७ ॥ अ॒भि॒भूर॑सि ॥ अ॒भि॒
भूर॑स्ये॒ता॒स्ते॒प॒ञ्चदिश॑ःकल्प्पन्ता॒म्ब्रह्मँ॒स्त्वम्ब्र॒ह्मासि॑सवि॒तासि॑स॒त्य

प्प्र॑सवो॒व्वरु॑णो॒ऽसिस॒त्यौजा॒ऽइन्द्रो॑ऽसि॒व्विशौ॑जारु॒द्रो॑ऽसिसु॒शेव॑÷ ॥ बहु॑
का॒र॒श्श्रेय॑स्क्कर॒भूय॑स्क्कु॒रेन्द्र॑स्य॒व्वज्रो॑ऽसि॒तेन॑मेरद्ध्य ॥ २८ ॥ अ॒ग्निःपृ
थु॒ः ॥ अ॒ग्निःपृ॒थुर्द्धर्म्म॑ण॒स्पति॒र्ज्जु॒षा॒णोऽअ॒ग्निःपृ॒थुर्द्धर्म्म॑ण॒स्प्पति॒रा
ज्ज्य॑स्य॒व्वेतु॒स्वाहा॒स्वाहा॑कृता॒ꣳसूर्य्य॑स्यर॒श्म्मिभि॑र्य्यतद्ध्वꣳसजा॒ताना॑
म्म॒द्ध्य॒मेष्ठ्या॑य ॥ २९ ॥ [ ४ ] स॒वि॒त्राप्प्र॑सवि॒त्रा । सर॑स्वत्या॒व्वा॒चा
त्वष्ट्रा॑रू॒पैःपू॒ष्णाप॒शु॒भि॒रिन्द्रे॑णा॒स्मेबृह॒स्प्पति॑ना॒ब्ब्रह्म॑णा॒व्वरु॑णे॒नौ
ज॑सा॒ग्निना॒तेज॑सा॒सोमे॑न॒राज्ञा॒व्विष्ष्णु॑ना॒दश॒म्म्या॒देवत॑या॒प्प्रसू॑त॒ꣳप्प्र

स॑र्पामि ॥ ३० ॥ [ १ ] अ॒श्विभ्या॑म्पच्यस्व ॥ अ॒श्विभ्या॑म्पच्य॒स्व॒सर॑स्वत्यैपच्य॒स्वेन्द्रा॑यसु॒त्राम्म्णे॑पच्यस्व ॥ वा॒युःपू॒तःप॒वित्त्रे॑णप्प्र॒त्यङ्क्सोमो॒ऽअति॑स्रु॒तꣳ ॥ इन्द्र॑स्य॒युज्य॒ꣳसखा॑ ॥ ३१ ॥ कु॒विद॒ङ्ग । यव॑मन्तो॒यव॑ञ्चि॒द्यथा॒दान्त्य॑नुपू॒र्वँवि॒यूय॑ ॥ इ॒हेहै॑षाङ्कृणु॒हि॒भोज॑नानि॒येब॒र्हिषो॒नम॑ऽउ॒क्तिंयज॑न्ति ॥ उ॒प॒या॒मगृ॑हीतोस्य॒श्विभ्या॑न्त्वा॒सर॑स्वत्यै॒त्वेन्द्रा॑यत्वासु॒त्राम्म्णे॑ ॥ ३२ ॥ यु॒वꣳसु॒राम॑म् ॥ यु॒वꣳसु॒राम॑मश्वि॒नानमु॑चावासु॒रेसचा॑ ॥ वि॒पि॒पा॒नाशु॑भस्पती॒ऽइन्द्र॒ङ्कर्म्म॑

स्वाव॑तम् ॥ ३३ ॥ पु॒त्रमि॑वपि॒तरौ॑ ॥ पु॒त्रमि॑वपि॒तरा॑व॒श्विनो॒भेन्द्रा॒
व॒थुःकाव्यै॑र्द॒ꣳस॒नाभिः ॥ यत्सु॒राम॑ं॒व्यपि॑बः॒शची॑भि॒ःसर॑स्वतीत्त्वा
मघवन्नभिष्णक् ॥ ३४ ॥ [ ४ ] ॥ ८ ॥ इतिश्रीवाजसनेयसंहिता
यांदशमोऽध्यायः ॥ १० ॥ श्रीवेदपुरुषायनमः । अनुवाकसूत्रम् । यु
ञ्जानएकादश, प्रतूर्त्तंवाजिन्षोडश, देवस्यत्वादश, पोदेवीर्द्वादश,
पोह्येकादश, द्वितिष्ठापञ्च, कूतिमग्निमष्टादश, सप्तत्र्यशीतिः ॥ हरिः
सं. १४ ॐ ॥ यु॒ञ्जा॒नः प्र॑थ॒मम् ॥ यु॒ञ्जा॒नः प्र॑थ॒मम्मन॑स्त॒त्त्वाय॑सवि॒ताधिय॑ः ॥

[ ॐ युञ्जानः प्रथममित्यनुवाकस्य ~~वामदेवऋषिरग्निर्देवता~~ ] भरद्वाजऋषिः सूर्यो देवता, उष्णिक्
छन्दः सकलपापक्षयार्थे पाठे विनियोगः ॥ ११ ॥ ]

अग्नेर्ज्ज्योतिंर्न्निचाय्यंपृथिव्याऽअध्याभंरत् ॥ १ ॥ युक्तेनमनंसा ।
व्वयन्देवस्यंसवितुःसवे ॥ स्वर्ग्ग्यांयशक्त्यां ॥ २ ॥ युक्त्वायंसविता ।
देवान्त्स्वंर्य्यंतोधियादिवंम् ॥ बृहज्ज्योतिं÷करिष्यतःसंविताप्प्रसुंवा
तितान् ॥ ३ ॥ युञ्जतेमनं÷ ॥ युञ्जतेमनंऽउतयुंञ्जतेधियोव्विप्प्राव्विप्प्रंस्य
बृहतोव्विंपश्चितं÷ ॥ व्विहोत्त्रांदधेव्वयुनाविदेकऽइन्महीदेवस्यंसवितुः
परिंष्टुतिः ॥ ४ ॥ युजेवांम् ॥ युजेवाम्ब्रह्मंपूर्व्यंन्नमोंभिर्व्विश्श्लोकंऽ
एतुपथ्येवसूरेः ॥ शृण्वन्तुव्विश्वेंऽअमृतंस्यपुत्राऽआयेधामांनिदिव्या

नि॑त॒स्त्थुः ॥ ५ ॥ यस्य॑प्प्र॒याण॑म् ॥ यस्य॑प्प्र॒याण॒मन्व॒न्यऽइ॒द्य॒युर्दे॑वा
दे॒वस्य॑महि॒मान॒मोज॑सा ॥ यःपार्थि॑वानिव्विम॒मेसऽए॒त॑शो॒रजा॑ꣳसि
दे॒वःस॑वि॒ताम॑हित्व॒ना ॥ ६ ॥ देव॑सवितः ॥ देव॑सवि॒तᳶप्प्रसु॑वय॒ज्ञम्प्र
सु॑वय॒ज्ञप॑ति॒म्भगा॑य ॥ दि॒व्योग॑न्ध॒र्व्वःकेत॒पूःके॒तन्नᳶपुना॑तु॒व्वाचस्प्प
ति॒र्व्वाच॑न्नᳶस्वदतु ॥ ७ ॥ इ॒मन्न॑÷ ॥ इ॒मन्नो॑देवसवित॒र्य्य॒ज्ञम्प्रण॑य
दे॒वाव्य॑ꣳसखि॒वि॒द॑ꣳसत्रा॒जित॑न्धना॒जित॑ꣳस्व॒र्ज्जित॑म् ॥ ऋ॒चास्तो
म॒ꣳसम॑र्द्धयगाय॒त्त्रेण॑रथन्त॒रम्बृ॒हद्गा॑य॒त्त्रव॑र्तनि॒स्वाहा॑ ॥ ८ ॥ दे॒वस्य॑

त्त्वा । सवि॒तुःप्प्र॑स॒वेऽश्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्णोहस्ता॑ब्भ्याम् ॥ आद॑दे
गाय॒त्रेण॒च्छन्द॑साङ्गि॒रस्वत्पृ॑थि॒व्याःस॒धस्था॑द॒ग्निम्पु॑री॒ष्यमङ्गिर॒
स्वदाभ॑र॒त्रैष्टु॑भेन॒च्छन्द॑साङ्गि॒रस्वत् ॥९॥ अब्भ्रि॑रसि ॥ अब्भ्रि॑रसिना
र्य्यं॑सि॒त्त्वया॑व्व॒यम॒ग्निꣳश॑केम॒खनि॑तुꣳस॒धस्त्थ॒ऽआ ॥ जाग॑तेन॒च्छ
न्द॑साङ्गि॒रस्वत् ॥१०॥ हस्त॑ऽआ॒धाय॑ । सवि॒ताबिब्भ्र॒दब्भ्रि॑ꣳहि॒रण्णय
यीम् ॥ अ॒ग्नेर्ज्ज्योति॑र्न्नि॒चाय्य॑पृथि॒व्याऽअद्ध्याभ॑र॒दानु॑ष्टुभेन॒च्छन्द॑
साङ्गि॒रस्वत् ॥ ११ ॥ [ ११ ] प्रतू॑र्त्तँव्वाजिन् ॥ प्रतू॑र्त्तँव्वाजि॒न्नाद्र॑व॒व्वारि॑

ष्ठामनुंसंव्वतंम् ॥ दिवितेजन्मंपरममन्तरिंक्षेतवनाभिं÷पृथिव्याम
धियोनिरित् ॥ १२ ॥ युञ्जाथाꣳरासंभम् ॥ युञ्जाथाꣳरासंभंय्युव
मस्म्मिन्व्यामैंव्वृषणण्वसू ॥ अग्निम्भरंन्तमस्म्मयुम् ॥ १३ ॥ योगें
योगेतवस्तंरम् ॥ योगेंयोगेतवस्तंरंव्वाजेंवाजेहवामहे ॥ सखांयुऽइन्द्रं
मूतयें ॥ १४ ॥ प्रतूर्व्वन्नेहिं ॥ प्रतूर्व्वन्नेह्यंवक्रामन्नशंस्तीरुद्रस्यगाणंप
त्त्यम्मयोभूरेहिं ॥ उर्व्वन्तरिंक्षंव्वीहिस्वस्तिगंव्यूतिरभंयानिकृण्वन्पू
ष्णासयुजांसह ॥ १५ ॥ पृथिव्याःसधस्थांत् ॥ पृथिव्याःसधस्थां

दग्निम्पुरीष्ष्यमङ्गिरस्वदाभराग्निम्पुरीष्ष्यमङ्गिरस्वदच्छेमोग्निम्पु
रीष्ष्यमङ्गिरस्वद्भरिष्ष्यामꣳ ॥ १६ ॥ अन्वग्निः ॥ अन्वग्निरुष
सामग्ग्रमक्ख्यदन्वहानिप्प्रथमोजातवेदाꣳ ॥ अनुसूर्य्यस्यपुरुत्राच
रश्म्मीननुद्यावापृथिवीऽआततंथ ॥ १७ ॥ आगत्त्यव्वाजी ॥ आ
गत्त्यव्वाज्ज्यद्ध्वानꣳसर्व्वामृधोविधूनुते ॥ अग्निꣳसधस्त्थेमहतिचक्षु
षानिचिकीषते ॥ १८ ॥ आक्रम्म्यव्वाजिन् ॥ आक्रम्म्यव्वाजिन्पृथिवी
मग्निमिच्छरुचात्त्वम् ॥ भूम्म्यावृत्त्वायनोब्रूहियतꣳखनेमतव्वयम्

॥१९॥ द्यौस्ते॑। पृ॒ष्ठम्पृ॑थि॒वीस॒धस्थ॑मा॒त्मान्तरि॑क्षꣳसमु॒द्रोयोनि॑ः॥
वि॒क्ख्या॒य॒चक्षु॑षा॒त्त्वम॒भितिष्ठ॑पृतन्य॒तः ॥ २० ॥ उत्क्रा॑म। म॒हते
सौभ॑गाया॒स्म्मादा॒स्थाना॑द्द्रवि॒णोदाव्वा॑जिन् ॥ व्व॒यꣳस्या॑मसुम॒तौ
पृ॑थि॒व्याऽअ॒ग्निङ्ख॒न॑न्तऽउ॒पस्थे॑ऽअस्याः ॥२१॥ उद॑क्रमीत्॥ उद॑क्र
मीद्द्रवि॒णोदा॒व्वाज्यर्व्वाक॒ःसुलो॒कꣳसुकृ॑तम्पृथि॒व्याम्॥ तत॑ःखनेम
सुप्रती॑कम॒ग्निꣳस्वो॒रुहा॑णाऽअधि॒नाक॑मु॒त्तमम्॥ २२ ॥ आत्त्वा॑।
जिघर्म्मि॒मन॑साघृ॒तेन॑प्प्रतिक्षि॒यन्त॒म्भुव॑नानि॒व्विश्वा॑॥ पृथु॒न्तिर॒श्चा

व्वय॑साबृ॒हन्तं॒व्यचि॑ष्ठमन्नै॑रभ॒सन्दृशा॑नम् ॥ २३ ॥ आवि॒श्श्वत॑÷ । प्प्र॒
त्यञ्च॑ञ्जिघर्म्म्यर॒क्षसा॒मन॑सा॒तज्जु॑षेत ॥ मर्य्य॑श्श्रीस्पृ॒हयद्व॑र्णोऽअ॒
ग्निर्न्ना॑भि॒मृशे॑त॒न्वा॒जब्भु॑राणः ॥ २४ ॥ परि॒वाज॑पतिः ॥ परि॒वाज॑प
तिः क॒वि॒र॒ग्निर्ह॒व्यान्य॑क्रमीत् ॥ द॒धद्रत्ना॑नि॒दाशुषे॑ ॥ २५ ॥ परि॑त्वा ।
ग्ने॒पुर॑व्व॒य॑व्विप्प्र॑ꣳसहस्यधीमहि ॥ धृ॒षद्व॑र्णन्दि॒वेदि॑वेह॒न्तार॑म्भङ्गु॒राव॑
ताम् ॥ २६ ॥ त्वम॑ग्ने ॥ त्वम॑ग्ने॒द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्य
स्त्वमश्म॑न॒स्प्परि॑ ॥ त्वंव्वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वन्नृ॒णान्नृ॑पतेजा

यसे॒शुचि॑ः ॥ २७ ॥ [ १६ ] दे॒वस्य॑त्त्वा । सवि॒तुःप्र॑स॒वे॒श्विनो॑र्बा॒हु
भ्या॑म्पू॒ष्णोहस्ता॑भ्याम् ॥ पृ॒थि॒व्याःस॒धस्था॑द॒ग्निम्पु॑री॒ष्य॒मङ्गि
र॒स्वत्त्ख॑नामि ॥ ज्योति॑ष्मन्तन्त्वाग्ने॒सु॒प्प्रती॑क॒मज॑स्त्रेणभा॒नु॒ना
दी॒द्य॑तम् ॥ शि॒वम्प्र॒जाभ्यो॒हि॑ꣳसन्तम्पृ॒थि॒व्याःस॒धस्था॑द॒ग्निम्पु॑
री॒ष्य॒मङ्गि॒र॒स्वत्त्ख॑नामꣳ ॥ २८ ॥ अ॒पाम्पृ॒ष्ठम् ॥ अ॒पाम्पृ॒ष्ठम॑सि॒यो
निर॒ग्नेःस॑मु॒द्रम॒भितꣳपिन्व॑मानम् ॥ वर्द्ध॑मानोम॒हाँ २ ॥ ऽआच॒पुष्क॑
रे॒दि॒वोमात्र॑याव॒रि॒म्म्णाप्प्र॑थस्व ॥ २९ ॥ शर्म्म॑च ॥ शर्म्म॑च॒स्थोव

म्मैंचुस्तथोच्छिद्रेबहुलेऽउभे ॥ व्यचस्वतीसंव्वसाथाम्भृतमग्निम्पुरी
ष्यम् ॥ ३० ॥ संव्वसाथाम् ॥ संव्वसाथाꣳस्वर्व्विदासमीचीऽउरसा
त्मना ॥ अग्निमन्तर्ब्भरिष्यन्तीज्ज्योतिष्मन्तमजस्रमित् ॥ ३१ ॥
पुरीष्योसि । व्विश्वभराऽअथर्व्वात्त्वाप्प्रथमोनिरमन्थदग्ने ॥ त्त्वाम
ग्ग्नेपुष्कराद्ध्यथर्व्वानिरमन्थत ॥ मूर्ध्नोव्विश्वस्यव्वाघतः ॥ ३२ ॥ त
मुत्त्वा । दध्यङ्ऋषिःपुत्रऽईधेऽअथर्व्वणः ॥ वृत्रहणम्पुरन्दरम् ॥ ३३ ॥
तमुत्त्वा । पात्थ्योव्वृषासमीधेदस्युहन्तमम् ॥ धनञ्जयꣳरणेरणे

॥ ३४ ॥ सीद॑होतः ॥ सीद॑होत॒ःस्वऽउ॑लो॒केचि॑कि॒त्वान्त्सा॒दया॑य॒
ज्ञꣳसु॑कृतस्य॒योनौ॑ ॥ दे॒वा॒वी॒र्दे॑वान्ह॒विषा॑यजा॒स्यग्ने॑बृहद्यज॑माने॒व
यो॑धाः ॥ ३५ ॥ निहोता॑ । होतृषद॑ने॒व्विदा॑नस्त्वे॒षोदी॑दि॒वाँ २ ॥ ऽअ॑स
दत्सुदक्ष॑ः ॥ अद॑ब्धव्रतप्प्रमति॒र्व्वसि॑ष्ठःसहस्रम्भ॒रःशुचि॑जिह्वोऽअ॒
ग्निः ॥ ३६ ॥ सꣳसी॑दस्व । म॒हाँ २ ॥ ऽअ॑सि॒शोच॑स्वदे॒ववी॑तमः ॥ व्विधूम
म॑ग्नेऽअरु॒षम्मि॑येध्यसृजप्प्र॑शस्तदर्श॒तम् ॥ ३७ ॥ [१०] अ॒पोदे॒वीः ॥
अ॒पोदे॒वीरुप॑सृज॒मधु॑मतीरय॒क्ष्माय॑प्प्र॒जाभ्यः ॥ तासा॑मा॒स्थाना॒दु

ज्जिहतामोषंधयःसुपिप्पलाः ॥ ३८ ॥ सन्तै । व्वायुर्म्मांतरिश्श्वांदधातू
त्तानायाहृदंयंञ्यद्विकंस्तम् ॥ योदेवानाञ्चरंसिप्प्राणथेनकस्म्मैदेव
व्वषंडस्तुतुब्भ्यंम् ॥ ३९ ॥ सुजातोज्ज्योतिंषा । सहशर्म्मव्वरूंथमा
संदत्स्व÷ ॥ व्वासोंऽअग्नेव्विश्श्वरूंपꣳसंव्ययंयस्वाव्विभावसो ॥ ४० ॥
उदुंतिष्ठ । स्वद्ध्वरावांनोदेव्व्याधिया ॥ दृशेचंभासाबृंहतासुंशुक्वनिरा
ग्नेयाहिसुशस्तिभिं÷ ॥४१॥ ऊर्द्ध्वऽऊषुण÷ ॥ ऊर्द्ध्वऽऊषुणंऽऊतयेति
ष्ठांदेवोनसंविता ॥ ऊर्द्ध्वोव्वाजंस्यसनिंतायदञ्जिभिंर्व्वाघद्भिंर्व्विह्वयांमहे

॥ ४२ ॥ सजातः ॥ सजातोगर्ब्भोऽअसिरोदस्योरग्ग्नेचारुर्व्विभृतऽओ
षधीषु ॥ चित्रःशिशुःपरितमाꣳस्यक्तून्प्रमातृब्भ्योऽअधिकनिक्क्र
दद्गाः ॥ ४३ ॥ स्त्थिरोभव । व्वीड्वङ्गःऽआशुर्ब्भवव्वाज्यर्व्वन् ॥ पृथुर्ब्भ
वसुषदस्त्वमग्ग्नेःपुरीषवाहणः ॥ ४४ ॥ शिवोभव । प्प्रजाब्भ्योमा
नुषीब्भ्यस्त्वमङ्गिरः ॥ माद्यावापृथिवीऽअभिशोचीर्म्मान्तरिक्षम्मा
व्वनस्प्पतीन् ॥ ४५ ॥ प्रैतु । व्वाजीकनिक्क्रदन्नानदद्द्रासभःपत्वा ॥
भरन्नग्निम्पुरीष्यम्मापाद्यायुषःपुरा ॥ वृषाग्निम्वृषणम्भरन्नपाङ्ग

सं. १५

ब्भे॑ꣳसमु॒द्रिय॑म् ॥ अग्न॒ऽआया॑हिव्वी॒तये॑ ॥ ४६ ॥ ऋ॒तꣳस॒त्त्यम् ॥
ऋ॒तꣳस॒त्त्यमृ॒तꣳस॒त्यम॒ग्निम्पु॑री॒ष्ष्यमङ्गि॒रस्व॒द्भ॑रामः ॥ ओष॑धय॒ः
प्प्रति॑मोदद्ध्वम॒ग्निमे॒तꣳशि॒वमा॒यन्त॑म॒ब्भ्यत्र॑सु॒ष्ष्माः ॥ व्व्यस्य॒न्वि
श्वा॒ऽअनि॑रा॒ऽअमी॑वा॒निषीद॑न्नो॒ऽअप॑दु॒र्म्म॒तिञ्ज॑हि ॥ ४७ ॥ ओष॑ध
य॒ःप्प्रति॑ । गृ॒भ्णीत॒पुष्प॑वतीःसुपिप्प॒लाः ॥ अ॒यंव्वो॒गब्र्भ॑ऽऋ॒त्त्विय॑ः
प्प्र॒त्नꣳस॒धस्त्थ॒मास॑दत् ॥ ४८ ॥ व्विपाज॑सा । पृ॒थुना॒शोशु॑चा॒नो
बाध॑स्वद्द्वि॒षोर॒क्षसो॒ऽअमी॑वाः ॥ सु॒शर्म्म॑णोबृह॒तःशर्म्म॑णिस्याम॒ग्ने

र॒ह॒ᳪसु॒ह॒वं॑स्यु॒प्प्रणी॑तौ ॥ ४९ ॥ [ १२ ] आपो॒हि । ष्ठाम॑यो॒भुव॒स्ता
न॑ऽऊ॒र्जे॑द॒॑धातन ॥ म॒हेरणा॑य॒चक्ष॑से ॥ ५० ॥ यो॒वः॑ । शि॒वत॑मो॒र
स॒स्तस्य॑भाजयते॒हनः॑ ॥ उ॒श॒तीरि॑वमा॒तरः॑ ॥ ५१ ॥ तस्म्मा॒ऽअर॑म् ॥
तस्म्मा॒ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ॥ आपो॑ज॒नय॑थाचनᳪ
॥ ५२ ॥ मि॒त्रः॒स॒ᳪसृज्ज्य॑ । पृ॒थि॒वीम्भूमि॑ञ्च॒ज्ज्योति॑षास॒ह ॥ सु॒जा॑त
ज्ञा॒तवे॑दसम॒यक्ष्माय॑त्त्वा॒सᳪसृ॑जामिप्प्र॒जाभ्यः॑ ॥ ५३ ॥ रु॒द्राः॒स॒ᳪ
सृज्ज्य॑ । पृ॒थि॒वीम्बृ॒ह॒ज्ज्योति॒ᳪसमी॑धिरे । तेषा॑म्भा॒नुरज॑स्र॒ऽइच्छु॒क्रो

देवेषुरोचते ॥५४॥ सꣳसृष्टांवसुभिः ॥ सꣳसृष्टांवसुभीरुद्रैर्द्धीरैः क
र्म्मण्याम्मृदम् ॥ हस्ताभ्याम्मृद्वीङ्कृत्वासिनीवालीकृणोतुताम्
॥५५॥ सिनीवालीसुकपर्द्दा । सुकुरीरास्वौपशा ॥ सातुभ्यमदितेमह्यो
खान्दधातुहस्तयोः ॥५६॥ उखाङ्कृणोतु ॥ उखाङ्कृणोतुशक्त्याबाहु
भ्यामदितिर्द्धिया ॥ मातापुत्रंयथोपस्थेसाग्निम्बिभर्त्तुगर्भऽआ ॥
मखस्यशिरोसि ॥ ५७ ॥ वसवस्त्वा । कृण्वन्तुगायत्रेणच्छन्दसा
ङ्गिरस्वद्ध्रुवासिपृथिव्यसिधारयामयिप्प्रजाꣳरायस्प्पोषङ्गौपत्त्यꣳ

सुवीर्य्यँꣳसजातान्न्यजमानायरुद्द्रास्त्वाकृण्ण्वन्तुत्रैष्टुभेनच्छन्दसा
ङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्प्रजाꣳरायस्प्पोषंङ्गौपत्त्यꣳ
सुवीर्य्यँꣳसजातान्न्यजमानायादित्त्यास्त्वाकृण्ण्वन्तुजागतेनच्छन्द
साङ्गिरस्वद्ध्रुवासिद्द्यौरसिधारयामयिप्प्रजाꣳरायस्प्पोषंङ्गौपत्त्यꣳसु
वीर्य्यँꣳसजातान्न्यजमानायव्विश्श्वेत्त्वादेवाव्वैश्श्वानराᳵकृण्ण्वन्त्वानु
ष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदिशोसिधारयामयिप्प्रजाꣳरायस्प्पो
षंङ्गौपत्यꣳसुवीर्य्यँꣳसजातान्न्यजमानाय ॥५८॥ अदित्त्यैरास्ना ॥

अदि॑त्त्यै॒रास्ना॒स्यदि॑तिष्टे॒बिल॑ङ्गृभ्णातु । कृत्त्वाय॒साम॒हीमु॒खांमृ॒न्म
यीं॒य्योनि॑म॒ग्नये॑ ॥ पु॒त्रेभ्य॒ःप्प्राय॑च्छ॒दादि॑तिःश्र॒पया॒निति॑ ॥ ५९ ॥
व्वस॑वस्त्वा । धूपयन्तुगाय॒त्त्रेण॒च्छन्द॑साङ्गिर॒स्वद्रु॒द्द्रास्त्वा॑धूपयन्तु॒त्त्रै
ष्टु॑भेन॒च्छन्द॑साङ्गिर॒स्वदा॑दि॒त्त्यास्त्वा॑धूपयन्तु॒जाग॑तेन॒च्छन्द॑साङ्गिर॒
स्वद्विश्श्वे॑त्त्वादे॒वाव्वै॑श्श्वान॒राधू॑पय॒न्त्वानु॑ष्टुभेन॒च्छन्द॑साङ्गिर॒स्वदिन्द्र॑
स्त्वाधूपयतु॒व्वरु॑णस्त्वाधूपयतु॒व्विष्ष्णु॑स्त्वाधूपयतु ॥ ६० ॥ [ ११ ]
अदि॑तिष्ट्वा दे॒वीव्वि॒श्श्वदे॑व्व्यावतीपृ॑थि॒व्व्याःस॒धस्त्थे॑ऽअङ्गिर॒स्वत्त्व॑न

त्ववटदेवानान्त्वापत्नीर्द्देवीर्व्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअ
ङ्गिरस्वद्दधतूखेधिषणास्त्वादेवीर्व्विश्वदेव्यावतीःपृथिव्याःसधस्थेऽ
अङ्गिरस्वदभीन्धतामुखेव्वरूत्रीष्ट्वादेवीर्व्विश्वदेव्यावतीःपृथिव्याःस
धस्त्थेऽअङ्गिरस्वच्छ्रपयन्तूखेग्नास्त्वादेवीर्व्विश्वदेव्यावतीःपृथिव्याः
सधस्त्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्व्विश्वदेव्याव
तीःपृथिव्याःसधस्त्थेऽअङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥ मित्रस्यच
र्षणीधृतः ॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि ॥ द्युम्नञ्चित्र

श्र॑वस्तमम् ॥६२॥ दे॒वस्त्वा॑ । सवि॒तोद्व॑पतु सु॒पा॒णिः स्व॑ङ्गु॒रिः सु॑बा॒हुरु॒त
शक्त्या॑ ॥ अव्य॑थमाना पृथि॒व्यामाशा॒ दिश॒ऽआपृ॑ण ॥६३॥ उ॒त्थाय॑ बृ
ह॒ती । भु॒वोदु॑ तिष्ठ ध्रु॒वा त्वम् ॥ मि॒त्रै॒तान्त॑ऽउ॒खाम्परि॑ द॒दा॒म्यभि॑त्त्या
ऽए॒षा मा भे॑दि ॥६४॥ व॒स॑वस्त्वा ॥ वस॑व॒स्त्वा च्छृ॑न्दन्तु गाय॒त्रेण॒ च्छन्द॑
साङ्गि॒र॒स्वद्रु॒द्रास्त्वा च्छृ॑न्दन्तु॒ त्रैष्टु॑भेन॒ च्छन्द॑साङ्गि॒र॒स्वदा॑दि॒त्यास्त्वा
च्छृ॑न्दन्तु॒ जाग॑तेन॒ च्छन्द॑साङ्गि॒र॒स्वद्वि॒श्वे॑ त्वा दे॒वा वै॑श्वान॒राऽआ च्छृ॑
न्दन्त्वानु॑ष्टुभेन॒ च्छन्द॑साङ्गि॒र॒स्वत् ॥६५॥ [५] आकू॑तिम॒ग्निम् ॥ आकू॑

तिमग्निम्प्रयुजᳪंस्वाहामनोमेधामग्निम्प्रयुजᳪंस्वाहाचित्तंव्विज्ञा
तमग्निम्प्रयुजᳪंस्वाहाव्वाचोव्विधृंतिमग्निम्प्रयुजᳪंस्वाहाप्प्रजापंत
येमनवेस्वाहाग्नयेव्वैश्वानरायस्वाहा ॥ ६६ ॥ व्विश्वोदेवस्य । नेतुर्म्म
तौव्वुरीतसक्ख्यम् ॥ व्विश्वोरायऽइषुद्ध्यतिद्युम्नंव्वृंणीतपुष्ष्यसेस्वाहा
॥ ६७॥ मासु । भिंत्थामासुरिषोम्बंधृष्ष्णुव्वीरयंस्वसु ॥ अग्निश्श्चेद
ङ्करिष्ष्यथः ॥ ६८॥ दृᳪंहस्वदेवि। पृथिविस्वस्तयंऽआसुरीमायास्वधया
कृतासिं ॥ जुष्टन्देवेब्भ्यंऽइदमंस्तुहव्व्यमरिष्टात्वमुदिंहियज्ञेऽअस्म्मि

न्॥६९॥ द्व॑न्नꣳस॒र्प्पि॑रासु॒तिꣳ। प्प्र॒त्क्को॑होता॒व्वरे॑ण्यꣳ॥सह॑सस्प्पु॒त्रो॑ऽअ
द्भु॒तꣳ॥७०॥शतम्॥५००॥पर॑स्या॒ऽअधि॑।सं॒व्वतो॑वरा॑ँ २॥ऽअ॒भ्याते॑र॥
यत्रा॒हम॑स्मि॒ताँ २॥ऽअ॑व॥७१॥प॒र॒मस्या॑÷परा॒वत॑÷॥प॒र॒मस्या॑÷प
रा॒वतौ॑रो॒हिद॑श्श्वऽइ॒हाग॑हि ॥ पु॒री॒ष्ष्य॑÷पुरु॒प्प्रियो॒ग्ग्ने॒त्वन्त॑रा॒म्मृध॑÷
॥ ७२ ॥ यद॑ग्ग्ने ॥ यद॑ग्ग्ने॒का॒नि॒कानि॑चि॒दाते॒दारू॑णिद॒ध्मसि॑ ॥

सर्व्व॒न्तद॑स्तु॒तेघृ॒तन्तज्जु॑षस्वयविष्ठ्य ॥ ७३ ॥ यदत्त्ति॑ ॥ यद॒त्त्यु॑प॒जि
ह्वि॑का॒यद्व॒म्म्रो॒ऽअ॑ति॒सर्प्प॑ति ॥ सर्व्व॒न्तद॑स्तु॒तेघृ॒तन्तज्जु॑षस्वयविष्ठ्य

॥ ७४ ॥ अह॑रह॒रप्प्र॑यावम् ॥ अह॑रह॒रप्प्र॑याव॒म्भर॒न्तोश्श्वा॑येव॒तिष्ठ॑
तेघा॒सम॑स्म्मै ॥ रा॒यस्प्पोषे॑ण॒सामि॒षामद॒न्तोग्ग्ने॒माते॒प्प्रति॑वेशारिषा
म ॥ ७५ ॥ नाभा॑पृथि॒व्याः । स॑मिधा॒नेऽअ॒ग्ग्नौरा॒यस्प्पोषा॑यबृह॒ते
ह॑वामहे ॥ इ॒र॒म्म॒दम्बृ॒हदु॑क्थ॒ꣳयज॑त्त्र॒ञ्जेता॑रम॒ग्ग्निम्पृत॑नासुसास॒हिम्
॥ ७६ ॥ याःसेना॑ꣳ ॥ याःसेना॑ऽअ॒भीत्त्व॑रीराव्या॒धिनी॒रुग॑णाऽउ॒
त ॥ येस्ते॒नायेच॒तस्क॑रा॒स्ताँस्ते॑ऽअ॒ग्ग्नेपि॑दधाम्म्या॒स्ये ॥ ७७ ॥ दꣳ॑
ष्ट्रा॑भ्याम्म॒लिम्म्लू॑न् ॥ दꣳ॑ष्ट्रा॑भ्याम्म॒लिम्म्लू॒ञ्जम्भ्यै॒स्तस्क॑राँ२॥

ऽउत ॥ हनुभ्याᳫंस्तेनान्भगवस्ताँस्त्वङ्खादसुखादितान् ॥ ७८ ॥
येजनेषु । मलिम्म्लवस्तेनासस्तस्कराव्वने ॥ येकक्षेष्ष्वघायवस्ताँस्ते
दधामिजम्भयोः ॥ ७९ ॥ योऽअस्म्मभ्यम् ॥ योऽअस्म्मभ्यम
रातीयाद्यश्चनोद्वेषतेजनः ॥ निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्व्वन्त
म्भस्म्मसाकुरु ॥ ८० ॥ सᳫंशितम्मे ॥ सᳫंशितम्मेब्रह्मसᳫंशितं
व्वीर्य्यम्बलम् ॥ सᳫंशितङ्क्षत्रञ्जिष्ष्णुयस्याहमस्मिपुरोहितः ॥८१॥
उदेषाम् ॥ उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअथोबलम् ॥ क्षिणोमिब्रह्म

णामित्रानुन्नंयामिस्वाँ२॥ऽअहम् ॥ ८२ ॥ अन्नंपतेन्नंस्य । नोदे
ह्यनमीवस्यंशुष्मिमणं÷ ॥ प्रप्प्रंदातारंन्तारिषऽऊर्ज्जंन्नोधेहिद्विपदेच
तुंष्पदे ॥ ८३ ॥ [ १८ ] इतिश्रीवाजसनेयसंहितायांएकादशोऽध्या
यः ॥१२॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ दृशानःसप्तदश,
दिवस्परिद्वादश,समिधाग्निंपंचदशा,पेतसप्तदशा,सुन्वंतमयजमानं
त्रयोदश,याऽओषधीःसप्तविꣳशति,मांमाषोडश,सप्तसप्तदशꣳशत
म् ॥ हरिः ॐ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यंद्यौर्दुम्मर्ष

[ॐ दृशानोरुक्मेति विश्वामित्र ऋषिः प्रजापतिर्देवता बृहती छन्दः सर्वसौख्य फल कामः पाठेविनि
योगः॥ १२॥]

मायु॑÷श्रि॒येरु॑चा॒नः ॥ अ॒ग्निर॒मृतो॑ऽअभव॒द्वयो॑भि॒र्यदे॑न॒न्द्यौरज॑
नयत्त्सु॒रेता॑÷ ॥ १ ॥ नक्तो॒षासा॒सम॑नसा ॥ नक्तो॒षासा॒सम॑नसा॒
विरू॑पेधा॒पये॑ते॒शिशु॒मेक॑ꣳसमी॒ची ॥ द्यावा॒क्षामा॑रु॒क्मोऽअ॒न्तर्वि
भा॑तिदे॒वाऽअ॒ग्निन्धा॑रयन्द्रविणो॒दाः ॥ २ ॥ विश्वा॑रू॒पाणि॑ ॥ वि
श्वा॑रू॒पाणि॒प्प्रति॑मुञ्चतेक॒विः प्प्रासा॑वीद्भ॒द्रंद्वि॒पदे॒चतु॑ष्ष्पदे ॥ विना
क॑मक्ख्यत्त्सवि॒ताव्वरे॒ण्योनु॑प्प्र॒याण॑मु॒षसो॒व्विरा॑जति ॥ ३ ॥ सु॒प॒र्णो
सि । ग॒रुत्त्माँ॑स्त्रि॒वृत्ते॒शिरो॑गाय॒त्रञ्चक्षु॑र्बृहद्रथन्त॒रेप॒क्षौ ॥ स्तोम॑ऽआ॒

त्माच्छन्दाꣳस्यङ्गानियजूꣳषिनाम ॥ सामतेतनूर्व्वामदेव्यंयज्ञाय
ज्ञियम्पुच्छन्धिष्ष्ण्याःशफाः ॥ सुपर्णोसिगरुत्मान्दिवङ्गच्छस्वः
पत ॥ ४ ॥ व्विष्ष्णोᳵक्रमः ॥ व्विष्ष्णोᳵक्रमोसिसपत्नहागायत्र
ञ्छन्दऽआरोहपृथिवीमनुविक्रमस्वव्विष्ष्णोᳵक्रमोस्यभिमातिहात्रै
ष्टुभञ्छन्दऽआरोहान्तरिक्षमनुविक्रमस्वव्विष्ष्णोᳵक्रमोस्यरातीयतो
हन्ताजागतञ्छन्दऽआरोहदिवमनुविक्रमस्वव्विष्ष्णोᳵक्रमोसिशत्रू
यतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनुविक्रमस्व ॥ ५ ॥ अक्रन्द

दग्निः॥ अक्रन्ददग्निस्तनयन्निवद्यौꣳक्षामारेरिहद्वीरुधः समञ्जन्॥
सद्योजज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्यन्तः॥ ६॥
अग्नेऽभ्यावर्त्तिन्॥ अग्नेऽभ्यावर्त्तिन्नभिमानिवर्तस्वायुषाव्वर्चसाप्प्र
जयाधनेन॥ सन्न्यामेधयारय्यापोषेण॥ ७॥ अग्नेऽअङ्गिरꣳ।
शतन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः॥ अधापोषस्यपोषेणपुनर्न्नो
नष्टमाकृधिपुनर्न्नोरयिमाकृधि॥ ८॥ पुनरूर्ज्जा। निवर्त्तस्वपुनर
ग्नऽइषायुषा॥ पुनर्न्नꣳपाह्यꣳहसꣳ॥ ९॥ सहरय्या। निवर्त्त

स्वा॒ग्ग्ने॒पिन्व॑स्व॒धार॑या ॥ वि॒श्श्वप्प्स्न्या॑वि॒श्श्वत॒स्प्परि॑ ॥ १० ॥ आत्त्वा॑ ।
हा॒र्षम॒न्तर॑भूर्द्ध्रु॒वस्ति॒ष्ठावि॑चाचलिꣳ ॥ विश॑स्त्वा॒सर्व्वा॑व्वाञ्छन्तु॒मात्व
द्रा॒ष्ट्रमधि॑भ्रशत् ॥ ११ ॥ उदु॑त्त॒मम् ॥ उदु॑त्त॒मव्व॑रुण॒पाश॑म॒स्म्मद
वा॑ध॒मंवि॑म॑ध्य॒मꣳश्र॑थाय ॥ अथा॑व्व॒यमा॑दित्यव्व्र॒तेतवाना॑गसो॒ऽअदि॑
तयेस्याम ॥ १२ ॥ अग्ग्रे॑बृ॒हन् ॥ अग्ग्रे॑बृ॒हन्नु॒षसा॑मू॒र्द्ध्वोऽअ॑स्थान्निर्ज्जग॒
न्वान्तम॑सो॒ज्ज्योति॒षागा॑त् ॥ अ॒ग्निर्भा॒नुना॒रुश॑ता॒स्वङ्ग॒ऽआजा॒तो॑वि
श्श्वा॒सद्मा॑न्यप्प्राꣳ ॥ १३ ॥ ह॒ꣳसःशु॑चि॒षत् ॥ ह॒ꣳसःशु॑चि॒षद्वसु॑रन्तरि

क्ष॒सद्धोता॑व्वेदि॒षदति॑थिर्दुरोण॒सत् ॥ नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्ब्जा
गो॒जाऽऋ॑त॒जाऽअ॑द्रि॒जाऽऋ॒तं॑बृ॒हत् ॥ १४ ॥ सीद॒त्त्वम् ॥ सीद॒त्त्व
म्मा॒तुर॒स्याऽउ॒पस्थे॒व्विश्वा॑न्यग्नेव्व॒युना॑निव्वि॒द्वान् ॥ मैना॒न्तप॑सा॒मा
र्चिषा॒भिशो॑चीर॒न्तर॑स्याꣳशु॒क्रज्यो॑ति॒र्व्विभा॑हि ॥ १५ ॥ अ॒न्तर॑ग्ने ।
रु॒चात्त्वमु॒खाया॒ꣳसद॑ने॒स्वे ॥ तस्या॒स्त्वꣳहर॑सा॒तप॒ञ्जात॑वेद॒ꣳशि॒वोभ॑
व ॥ १६ ॥ शि॒वोभू॒त्त्वा । मह्यं॑मग्ने॒ऽअथो॑सीद॒शि॒वस्त्वम् ॥ शि॒वाः
कृ॒त्त्वादिश॒ꣳसर्व्वा॒ꣳस्वंय्योनि॑मि॒हास॑दꣳ ॥ १७ ॥ [ १७ ] दि॒वस्प्परि॑ ।

प्प्रथमञ्ज॑ज्ञेऽअग्निरस्म्माद्द्वितीयम्परि॑जातवे॑दाः॥ तृतीय॑मप्प्सुनृमणा
ऽअज॑स्त्रमिन्धा॑नऽएनञ्जरतेस्वाधीः॥१८॥ व्विद्माते॑ ॥ व्विद्माते॑ऽअग्ने
त्रेधात्त्रयाणि॑व्विद्मातेधामव्विभृ॑तापुरुत्रा ॥ व्विद्मातेनाम॑परमङ्गुहाय
द्विद्मातमुत्स॑ऽयत॑ऽआजगन्थ॑ ॥ १९ ॥ समुद्रेत्त्वा॑ । नृमणा॑ऽअप्प्स्व
न्तर्नृचक्षा॑ऽईधेदिवोऽअ॑ग्ग्नऽऊध॑न् ॥ तृतीये॑त्त्वारजा॑सितास्त्थवाꣳस॑
मपामुपस्त्थे॑महिषाऽअ॑वर्द्धन् ॥ २० ॥ अक्र॑न्ददग्निः ॥ अक्र॑न्दद
ग्निस्तनया॑न्निवद्यौःक्षामारेरी॑हद्वीरुध॑ःसमञ्जन् ॥ सद्योज॑ज्ञानोव्विही

मि॒द्धोऽअक्ख्य॒दारोद॑सीभा॒नुना॑भात्य॒न्तः ॥ २१ ॥ श्री॒णामु॑दा॒रः ॥
श्री॒णामु॑दा॒रोध॒रुणो॑र॒यीणा॒म्म॑नी॒षाणा॒म्प्रार्प्प॑णः॒सोम॑गोपाः ॥ व्व॒सुः॑
सू॒नुःस॒ह॑सोऽअ॒प्प्सुराजा॒व्विभा॒त्त्यग्ग्र॑ऽउ॒षसा॑मि॒धानः ॥ २२ ॥ व्वि
श्श्व॑स्यके॒तुः ॥ व्विश्श्व॑स्यके॒तुर्ब्भुव॑नस्य॒गर्ब्भ॒ऽआरोद॑सीऽअपृणा॒ज्जाय॑
मानः ॥ व्वी॒डुञ्चि॒दद्रि॑मभिनत्प॒रा॒यञ्जना॒यद॒ग्निमय॑जन्त॒पञ्च॑ ॥ २३ ॥
उ॒शिक्पा॑व॒कः ॥ उ॒शिक्पा॑व॒कोऽअ॑र॒तिःसु॒मे॒धामर्त्ते॑ष्व॒ग्निर॒मृतो॒
निधा॑यि ॥ इय॑र्त्तिधू॒मम॑रु॒षम्भरि॑भ्भ्रदु॒च्छुक्क्रे॑णशो॒चिषा॒द्यामिन॑क्षन्

॥ २४ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यंद्यौद्दुर्म्मर्षमायुंः
श्रियेरुंचानः ॥ अग्निरमृतोंऽअभवद्वयोंभिर्य्यदेंनन्द्यौरजंनयत्सुरे
ताः ॥२५॥ यस्ते ॥ यस्तेंऽअद्यकृणवंद्भद्रशोचेपूपन्देंवघृतवंन्तमग्ने ॥
प्रतन्नंयप्प्रतरंव्वस्योऽअच्छाभिसुम्नन्देवभंक्तंय्यविष्ठ ॥ २६ ॥ आत
म् ॥ आतम्भंजसौश्रवसेष्वंग्नऽउक्थऽउंक्थऽआभंजशस्यमांने ॥
प्प्रियःसूय्यैंप्प्रियोऽअग्नाभंवात्त्युज्जातेनंभिनदुदुज्जनिंत्त्वैंः ॥२७॥
त्त्वामंग्ने ॥ त्त्वामंग्नेयजंमानाऽअनुद्यून्विश्श्वावसुंदधिरेव्वार्य्याणि ॥

त्त्वया॑स॒हद्द्रवि॑णमि॒च्छमा॑नाव्व्र॒जङ्गोम॑न्तमु॒शिजो॒व्विव॑व्व्रुः ॥ २८ ॥
अस्ता॑व्य॒ग्निः ॥ अस्ता॑व्य॒ग्निर्न्न॒राꣳसु॒शेवो॑व्वैश्वान॒रऽऋषि॑भिः॒सो
म॑गोपाः॥अ॒द्वे॒षेद्यावा॑पृथि॒वीहु॑वेम॒देवा॑ध॒त्तर॒यिम॒स्म्मेसु॒वीर॑म् ॥२९॥
[१२] स॒मिधा॒ग्निम् ॥ स॒मिधा॒ग्निन्दु॑वस्यतघृ॒तैर्बो॑धय॒ताति॑थिम् ॥
आस्मि॑न्ह॒व्याजु॑होतन ॥ ३० ॥ उदु॑त्त्वा ॥ उदु॑त्त्वा॒व्विश्वे॑दे॒वाऽ
अग्ने॒भर॑न्तु॒चित्ति॑भिः ॥ सनो॑भवशि॒वस्त्वꣳसु॒प्प्रती॑कोव्वि॒भाव॑सुः
॥ ३१ ॥ प्रेत् ॥ प्रेद॑ग्ने॒ज्ज्योति॑ष्म्मान्याहिशि॒वेभि॑र॒र्चिभि॒ष्ट्वम् ॥

बृहद्भिर्भानुभिर्भासन्माहिꣳसीस्तन्वाप्प्रजाः ॥ ३२ ॥ अक्क्रन्द
दग्ग्निः ॥ अक्क्रन्ददग्ग्निस्तनयन्निवद्द्यौः क्षामारेरिहद्वीरुधः समञ्जन् ॥
सद्द्योजज्ञानोविहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्यन्तः॥३३॥
प्रप्प्रायम् ॥ प्रप्प्रायमग्ग्निर्भरतस्यशृण्वेवियत्सूर्य्योनरोचतेबृहद्भाः ॥
अभियःपूरुम्पृतनासुतस्त्थौदीदायदैव्व्योऽअतिथिःशिवोनः ॥३४॥
आपोदेवीः ॥ आपोदेवीःप्प्रतिगृब्भ्णीतभस्म्मैतत्स्योनेकृणुद्ध्वꣳसुर
भाऽउलोके ॥ तस्म्मैनमन्ताञ्जनयःसुपत्नीर्म्मातेवपुत्रम्बिभृताप्स्वे

नत् ॥ ३५ ॥ अप्प्स्वग्ग्ने ॥ अप्प्स्वग्ग्नेसधिष्ट्वसौषधीरनुरुध्यसे ॥
गर्ब्भेसञ्जायसेपुनः ॥ ३६ ॥ गर्ब्भोऽअसि ॥ गर्ब्भोऽअस्योषधीना
ङ्गर्ब्भोव्वनस्प्पतीनाम् ॥ गर्ब्भोव्विश्श्वस्यभूतस्याग्ग्नेगर्ब्भोऽअपामसि
॥ ३७ ॥ प्रसद्यभस्स्मना ॥ प्रसद्यभस्स्मनायोनिमपश्श्चपृथिवीम
ग्ग्ने ॥ सꣳसृज्ज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ॥ ३८ ॥ पुनरा
सद्य ॥ पुनरासद्यसदनमपश्श्चपृथिवीमग्ग्ने ॥ शेषेमातुर्य्यथोपस्थे
न्तरस्याꣳशिवतमः ॥ ३९ ॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्ग्नऽइ

पायु॑षा ॥ पुन॑र्न्नःपा॒ह्यꣳह॑सः ॥ ४० ॥ स॒हर॒य्या । निव॑र्त्त॒स्वाग्ने॒
पिन्व॑स्व॒धार॑या ॥ व्वि॒श्वप्प्स्न्या॑व्वि॒श्वत॒स्प्परि॑ ॥ ४१ ॥ बोधा॑मे ।
ऽअ॒स्यव्वच॑सोयविष्ठ॒मꣳहि॑ष्ठस्य॒प्प्रभृ॑तस्यस्वधावः ॥ पीय॑तित्त्वो॒ऽअनु॑
त्त्वोगृणातिव्व॒न्दारु॑ष्टेत॒न्वं॑व्वन्दे॒ऽअग्ने ॥ ४२ ॥ सबो॑धि । सू॒रिर्म्म॒घवा॒व्व
सु॑पते॒व्वसु॑दावन् ॥ यु॒यो॒द्ध्य॒स्ममद्वेषा॑ꣳसिव्वि॒श्वक॑र्म्मणे॒स्वाहा॑ ॥ ४३ ॥
पुन॑स्त्वा॑ । दि॒त्त्यारु॒द्राव्वस॑वः॒समि॑न्धता॒म्पुन॑र्ब्र॒ह्माणो॑व्वसुनीथय॒
ज्ञैः ॥ घृ॒तेन॒त्त्वन्त॒न्वं॑व्वर्द्धयस्वस॒त्त्याःस॑न्तु॒यज॑मानस्य॒कामा॑ः ॥ ४४ ॥

[ १५ ] अपे॑त ॥ अपे॑त॒व्वी॒ता॒व्विच॑स॒र्प्प॑ता॒तो॒येत्त्र॒स्त्थपु॑रा॒णाये॒च॒नूत॑
नाः ॥ अदा॑द्य॒मो॒व॒सान॑म्पृथि॒व्याऽअक्र॑न्नि॒मम्पि॒तरो॑लो॒कम॑स्म्मै
॥ ४५ ॥ सँ॒ज्ञान॑मसि । का॒म॒धर॑ण॒म्मयि॑तेका॒म॒धर॑णम्भूयात् ॥ अ॒
ग्ग्नेर्भस्म्मा॑स्य॒ग्ग्नेःपुरी॑षमसि॒चित॑स्त्थपरि॒चित॑ऽऊर्द्ध्व॒चित॑÷श्रयद्ध्वम्
॥ ४६ ॥ अ॒यꣳसः ॥ अ॒यꣳसोऽअ॒ग्ग्निर्य्य॑स्म्मि॒न्त्सोम॒मिन्द्र॑÷सु॒त
न्द॒धेज॒ठरे॑व्वावशा॒नः ॥ स॒ह॒स्त्रिय॒म्व्वाज॒मत्त्य॒न्नसप्ति॑ꣳससवा॒न्त्स
न्त्स्तू॑यसेजातवेदः ॥ ४७ ॥ अग्ग्ने॒यत् ॥ अग्ग्ने॒यत्ते॑दि॒विव्वर्च्च॑÷पृथि॒

घ्यांऽस्यदोषधीष्वप्स्वायजत्र ॥ येनान्तरिक्षमुर्व्वाततन्थत्त्वेषःसभा
नुरर्ण्णवोनृचक्षा÷ ॥ ४८ ॥ अग्ग्नेदिवः ॥ अग्ग्नेदिवोऽअर्ण्णमच्छा
जिगास्यच्छादेवाँ२॥ऽऊंचिषेधिष्ण्याये ॥ यारोचनेपरस्तात्त्सूर्य्यस्य
याश्चावस्तादुपतिष्ठन्तऽआप÷ ॥ ४९ ॥ पुरीष्ष्यासोऽअग्ग्नय÷ । प्प्रा
वणेभि÷सजोषसः ॥ जुषन्ताँऽयज्ञमद्रुहोनमीवाऽइषोमहीः ॥ ५० ॥
इडामग्ग्ने । पुरुदꣳसꣳसनिङ्गोःशश्वत्तमꣳहवमानायसाध ॥ स्या
न्न÷सूनुस्तनयोव्विजावाग्ग्नेसातेसुमतिर्भूत्त्वस्मे ॥ ५१ ॥ अयन्ते ॥

अयन्तेयोनिर्ऋत्त्वियोयतौंजातोऽअरौंचथाः ॥ तञ्जानन्नंग्नऽआरो
हाथांनोव्वर्द्धयारयिम् ॥ ५२ ॥ चिदंसि ॥ चिदंसितयांदेवतंयाङ्गिर
स्वद्ध्रुवासींदपरिचिदंसितयांदेवतंयाङ्गिरस्वद्ध्रुवासींद ॥ ५३ ॥ लोक
म्म्पृंण । च्छिद्रम्म्पृणाथौंसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिर
स्मिन्न्योनांवसीषदन् ॥५४॥ ताऽअंस्य । ताऽअंस्य सूदंदोहसःसोमंꣳ
श्रीणन्तिपृश्न्नंयः ॥ जन्मंन्देवानांव्विशंस्त्रिष्ष्वारौंचनेदिवः ॥५५॥
इन्द्रंव्विश्श्वाः ॥ इन्द्रंव्विश्श्वांऽअवीवृधन्तसमुद्द्रव्यंचसाङ्गिरंः ॥ रथीतं

मꣳर॒थीना॒ंव्वाजा॑ना॒ꣳसत्प॑ति॒म्पति॑म् ॥ ५६ ॥ समि॑तम् ॥ समि॑त॒ꣳ
सङ्क॑ल्प्पेथा॒ꣳसम्प्रि॑यौ॒रोचि॒ष्णूसु॑मन॒स्यमा॑नौ ॥ इष॒मूर्ज्ज॑म॒भिसं॒व्व
सा॑नौ ॥ ५७ ॥ संव्वा॑म् ॥ संव्वा॒म्मना॑ꣳसि॒संव्र॒तासमु॑चि॒त्तान्याक॑र
म् ॥ अग्ने॑पुरीष्याधि॒पाभ॑व॒त्त्वन्न॒ऽइष॒मूर्ज्जँ॒य्यज॑मानायधेहि ॥५८॥
अग्ने॒त्त्वम् ॥ अग्ने॒त्त्वम्पु॑री॒ष्योर॒यि॒मान्पु॑ष्टि॒माँ२॥ऽअ॑सि ॥ शि॒
वाःकृ॒त्त्वादि॒शः॑सर्व्वाः॒स्वं॒य्योनि॑मि॒हास॑दः ॥ ५९ ॥ भव॑तन्नः ॥ भ
व॑तन्न॒ःसम॑नसौ॒सचे॑तसावरे॒पसौ॑ ॥ माय॒ज्ञꣳहिꣳसिष्टम्माय॒ज्ञप॑ति

ज्ञातवेदसौशिवौभवतमद्यनः॥६०॥मातेवपुत्त्रम्॥ मातेवपुत्त्रम्पृथि
वीपुरीष्यमग्निꣳस्वेयोनावभारुखा॥ तांव्विश्वैर्देवैर्ऋतुभिःसंव्विदा
नःप्प्रजापतिर्व्विश्वकर्म्माव्विमुञ्चतु॥६१॥[१७] असुन्वन्तमयजमा
नम्॥ असुन्वन्तमयजमानमिच्छस्त्तेनस्येत्त्यामन्विहितस्क्करस्य॥
अन्यमस्म्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु॥६२॥
नमःसु॥ नमःसुतेनिर्ऋतेतिग्ग्मतेजोयस्म्मयंव्विचृताबन्धमेतम्॥ य
मेनत्त्वंय्यम्म्यासंव्विदानोत्तमेनाकेऽअधिरोहयैनम्॥६३॥ यस्यां

स्स्ते । घोरऽआ॒सञ्जु॒हो॒म्म्ये॒षांम्ब॒न्धाना॑मव॒सर्ज्ज॑नाय ॥ यान्त्वा॒जनो॒
भू॒मि॒रिति॑प्प्र॒मन्द॑ते॒निर्ऋ॑तिन्त्वा॒हम्परि॑वेदव्वि॒श्वतः॑ ॥६४॥ यन्ते॑ । दे॒
वीनिर्ऋ॑तिराब॒बन्ध॒पाशं॑ग्री॒वास्व॑विचृ॒त्त्यम् ॥ तन्ते॒व्विष्ष्या॒म्म्यायु॑षो॒
नम॒द्ध्याद॒थैतम्पि॒तुम॑द्धि॒प्प्रसू॑तः ॥ न॒मो॒भू॒त्त्यै॒येदञ्च॒कार॑ ॥ ६५ ॥ नि॒
वेश॑नःस॒ङ्गम॑नः ॥ नि॒वेश॑नःस॒ङ्गम॑नो॒व्वसू॑नांव्विश्वा॑रू॒पाभि॒च॑ष्ट्टे॒शची॑
भिः ॥ दे॒वऽइ॑वसवि॒तास॒त्त्यध॒र्म्मे॑न्द्रो॒नत॑स्त्थौसम॒रेप॑थी॒नाम् ॥ ६६ ॥
सीरा॑युञ्जन्ति । क॒वयो॑यु॒गाव्वित॑न्वते॒पृथ॑क् ॥ धीरा॑दे॒वेषु॑सुम्न॒या

॥ ६७ ॥ युनक्तसीरा ॥ युनक्तसीराव्वियुगातनुद्ध्वङ्कृतेयोनौव्वपतेहबी
जम् ॥ गिराचश्रुष्टिःसभराऽअसन्नोनेदीयऽइत्सृण्य÷पक्वमेयात्
॥ ६८ ॥ शुनꣳसु । फालाव्विकृषन्तुभूमिꣳशुनङ्कीनाशाऽअभियन्तु
व्वाहैः ॥ शुनासीराहविषातोशमानासुपिप्पलाऽओषधीᳵकर्त्तनास्म्मे
॥ ६९ ॥ घृतेनसीता ॥ घृतेनसीतामधुनासमज्ज्यतांव्विश्वैर्द्देवैरनुम
तामरुद्भिः÷ ॥ ऊर्ज्जस्वतीपयसापिन्वमानास्म्मान्त्सीतेपयसाऽभ्या
ववृत्स्व ॥ ७० ॥ लाङ्गलम्पवीरवत् ॥ लाङ्गलम्पवीरवत्सुशेवꣳसो

मपित्त्संरु ॥ तदुद्वंपतिगामविंम्प्रफर्व्यंञ्चपीवंरीम्प्रस्त्थावंद्द्रथवाहंण
म् ॥ ७१ ॥ कामंङ्कामदुघे । धुक्ष्वमित्रायव्वरुंणायच ॥ इन्द्रांयाश्वि
ब्भ्यांम्पूष्णेप्प्रजाब्भ्यऽओषंधीब्भ्यः॥ ७२ ॥ व्विमुंच्यद्ध्वम् ॥ व्विमुंच्य
द्ध्वमघ्न्यादेवयानाऽअगंन्मतमंसस्पारमस्य ॥ ज्योतिंरापाम ॥ ७३ ॥
सजूरब्दंः ॥ सजूरब्दोऽअयंवोभिःसजूरुषाऽअरुंणीभिः ॥ सजोषं
साव्वाश्विनादꣳसोंभिःसजूःसूरऽएतंशेनसजूर्व्वैश्वानरऽइडंयाघृतेन
स्वाहां ॥ ७४ ॥ [ १३ ] याऽओषंधीः ॥ याऽओषंधीःपूर्व्वांजा

तादे॒वेभ्य॑स्त्रियु॒गम्पु॒रा ॥ मनै॒नुब॒भ्रूणा॑म॒हꣳश॒तन्धामा॑निस॒प्तच॑
॥ ७५ ॥ श॒तंव्व॑÷ ॥ श॒तंव्वो॑ऽअम्ब॒धामा॑निस॒हस्र॑मु॒तवो॒रुह॑÷ ॥
अधा॑शतक्क्रत्वोयू॒यमि॒मम्मे॑ऽअग॒दङ्कृ॑त ॥ ७६ ॥ ओष॑धी॒ःप्प्रति॑ ।
मोद॒द्ध्वम्पुष्प॑वतीःप्प्र॒सूव॑रीः ॥ अश्वा॑ऽइवस॒जित्त्व॑रीर्व्वी॒रुध॑÷पारयि॒
ष्ण्व॒÷ ॥ ७७ ॥ ओष॑धी॒रिति॑ । मात॒रस्तद्वो॑देवी॒रुप॑ब्रुवे ॥ स॒नेय॒
म॒श्व॒ङ्गांव्वास॑ऽआ॒त्मान॒न्तव॑पूरुष ॥ ७८ ॥ अ॒श्व॒त्थेव॑÷ ॥ अ॒श्व॒त्थे
वो॑नि॒षद॑नम्प॒र्ण्णेवो॑व्वस॒तिष्कृ॒ता ॥ गो॒भाज॒ऽइत्त्किला॑सथ॒यत्स॒नव॑

थपूरुषम् ॥ ७९ ॥ यत्रौषधीः । समग्मन्तराजानःसमिताविव ॥
विप्रःसऽउच्यतेभिषग्रक्षोहामीवचातनः ॥ ८० ॥ अश्वावतीꣳ
सोमावतीम् ॥ अश्वावतीꣳसोमावतीमूर्ज्जयन्तीमुदोजसम् ॥ आ
वित्सिसर्व्वाऽओषधीरस्म्माऽअरिष्टतातये ॥ ८१ ॥ उच्छुष्माः ॥
उच्छुष्म्माऽओषधीनाङ्गावोगोष्ठादिवेरते ॥ धनꣳसनिष्ष्यन्तीनामा
त्त्मानन्तवपूरुष ॥ ८२ ॥ इष्कृतिर्न्नाम । वोमाताथोयूयꣳस्थनि
ष्कृतीः ॥ सीराःपतत्रिणीस्थनयदामयतिनिष्कृथ ॥ ८३ ॥ अति

विश्वाः । परिष्ठास्तेनऽइवव्व्रजमक्रमुः ॥ ओषधीः प्प्राचुच्च्यवुर्य्यत्कि
ञ्चतन्न्वोरपः ॥ ८४ ॥ यदिमाः ॥ यदिमाव्वाजयन्नहमोषधीर्हस्तऽ
आदधे ॥ आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ ८५ ॥ यस्यौ
षधीः । प्प्रसर्प्पथाङ्गमङ्गम्परुष्परुः ॥ ततोयक्ष्मंव्विबाधध्वऽउग्ग्रो
मध्यमशीरिव ॥ ८६ ॥ साकंय्यक्ष्म ॥ साकंय्यक्ष्मप्प्रपतचाषेणकि
किदीविना ॥ साकंव्वातस्यध्ध्राज्ज्यासाकन्नश्यनिहाकया ॥ ८७ ॥ अ
न्न्यावः ॥ अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ॥ ताः सर्व्वाः

^शतम् ८

॥१०२॥

सं॒वि॒दा॒नाऽइ॒दम्मे॒प्प्राव॑ता॒व्वच॑ः ॥८८॥ याःफ॒लिनी॑ः ॥ याःफ॒लिनी॒
र्य्याऽअ॑फ॒लाऽअ॑पु॒ष्प्पायाश्च॑पु॒ष्प्पिणी॑ः ॥ बृह॒स्प्पति॑प्प्रसूता॒स्तानो॑
मु॒ञ्च॒न्त्वᳫहं॑सः ॥ ८९ ॥ मु॒ञ्चन्तु॑मा । श॒प॒त्थ्या॒दथो॑व्व॒रु॒ण्ण्या॒दु॒त ॥ अ
थो॑य॒मस्य॒पड्वी॑शा॒त्सर्व्व॑स्म्माद्देवकिल्बि॒षात् ॥ ९० ॥ अ॒व॒पत॑न्तीरव
दन् ॥ अ॒व॒पत॑न्तीरवदन्दि॒वऽओष॑धय॒स्प्परि॑ ॥ यञ्जी॒वम॒श्नवा॑महै॒
नसरि॑ष्ष्याति॒पूरु॑षः ॥ ९१ ॥ याऽओष॑धीः ॥ याऽओष॑धी॒ःसोम॑रा
ज्ञीर्ब॒ह्वीःश॒तवि॑चक्षणाः ॥ तासा॑मसि॒त्त्वमु॑त्त॒मार॒ङ्कामा॑य॒शᳫह्वृ॒दे

॥९२॥याऽओषधीः॥याऽओषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु ॥
बृहस्प्पतिप्प्रसूताऽअस्यैसन्दत्तवीर्य्यम्॥९३॥याश्च ॥ याश्चेदमुपशृ
ण्वन्तियाश्चदूरम्परागताः॥सर्व्वाःसङ्गत्त्यवीरुधोस्यैसन्दत्तवीर्य्यम्
॥९४॥मावः॥मावोरिषत्त्खनितायस्मैचाहङ्खनामिवः ॥ द्विपाच्चतु
ष्ष्पादस्म्माकꣳसर्व्वमस्त्वनातुरम् ॥९५॥ ओषधयःसम् ॥ ओषधयः
समवदन्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्त्तꣳराजन्पार
यामसि ॥ ९६ ॥ नाशयित्रीबलासस्य ॥ नाशयित्रीबलासस्यार्शस

ऽउप॒चिता॑मसि॥ अथो॑श॒तस्य॒यक्ष्मा॑णाम्पाक॒रो॑रसि॒नाश॑नी॥९७॥
त्वाङ्ग॑न्ध॒र्व्वाः॑ ॥ त्वाङ्ग॑न्ध॒र्व्वाऽअ॑खनँ॒स्त्वामिन्द्र॒स्त्वाम्बृह॒स्पति॑ः ॥
त्वामो॑षध॒सोमो॒राजा॑व्वि॒द्वान्यक्ष्मा॑दमुच्यत ॥ ९८ ॥ सह॑स्वमे ॥ स
ह॑स्वमे॒ऽअरा॑ती॒ःसह॑स्वपृतनाय॒तः॑ ॥ सह॑स्व॒सर्व्वं॑पा॒प्मान॒ꣳसह॑माना
स्योषधे ॥ ९९ ॥ दी॒र्ग्घायु॑स्ते ॥ दी॒र्ग्घायु॑स्तऽओषधेख॒नि॒तायस्मै॑च
त्वा॒खना॑म्य॒हम् ॥ अथो॒त्वन्दी॒र्ग्घायु॑र्भू॒त्वाश॒तव॑ल्शा॒विरो॑हतात्
॥ १०० ॥ त्वमु॑त्त॒मा । स्यो॑षध॒तव॑वृ॒क्षाऽउप॑स्तयः ॥ उप॑स्तिरस्तु॒सो

स्म्माक॒ꣳयोऽअ॒स्म्माँ२॥ऽअ॑भि॒दास॑ति ॥ १०१ ॥ [२७] मामा॑ ॥
मामा॑हि॒ꣳसीज्जनि॒तायःपृ॑थि॒व्यायोवा॒दि॒व॑ꣳस॒त्त्यध॑र्म्मा॒व्यान॑ट्॥ य
श्चा॒पश्च॒न्द्राःप्र॑थ॒मोज॒जान॒कस्मै॑दे॒वाय॑ह॒विषा॑व्विधेम ॥ १०२॥ अ॒
ब्भ्याव॑र्त्तस्व । पृथिवि य॒ज्ञेन॒पय॑सास॒ह ॥ व्व॒पान्त्ते॑ऽअ॒ग्निरि॑षि॒तोऽअ॑
रोहत् ॥ १०३ ॥ अग्ने॒यत् ॥ अग्ने॒यत्ते॑शु॒क्रꣳय॒च्च॒न्द्रꣳय॒त्पू॒तꣳय॒च्च॑
य॒ज्ञिय॑म् ॥ तद्दे॒वेभ्यो॑भरामसि ॥ १०४ ॥ इ॒षमू॒र्ज्ज॑म् ॥ इ॒षमू॒र्ज्ज॑म॒ ॥१०४॥
ह॒मि॒तऽआद॑मृतस्य॒योनि॑म्मा॒हि॒षस्य॒धारा॑म् ॥ आमा॒गोषु॑व्विश॒त्त्वात॒

नृषु॒जहा॑मिसे॒दिमनि॑रा॒ममी॑वाम् ॥ १०५ ॥ अग्ने॒तव॑ ॥ अग्ने॒तव॒

श्रवो॒व्वयो॒महि॑ब्भ्राजन्ते॑ऽअ॒र्च्चयो॑व्विभावसो ॥ बृह॑द्भानो॒शव॑सा॒व्वाज॑

मु॒क्थ्यु॒न्दधा॑सिदा॒शुषे॑कवे ॥ १०६ ॥ पा॒व॒कव॑र्च्चाःशु॒क्रव॑र्च्चाः ॥ पा॒व॒

कव॑र्च्चाःशु॒क्रव॑र्च्चा॒ऽअनू॑नवर्च्चा॒ऽउदि॑यर्षिभा॒नुना॑ ॥ पु॒त्रोमा॒तरा॑व्वि॒च

र॒न्नुपा॑वासिपृ॒णक्षि॒रोद॑सीऽउ॒भे ॥ १०७ ॥ ऊर्ज्जो॑नपात् ॥ ऊर्ज्जो॑न

पाज्जातवेदःसु॒श॒स्तिभि॒र्म्मन्द॑स्वधी॒तिभि॑र्हि॒तः ॥ त्वेऽइष॒ःसन्द॑धु॒

र्भूरि॑वर्प्पसश्चि॒त्रोतयो॑व्वा॒मजा॑ताः ॥ १०८ ॥ इ॒रज्ज्य॑न्नग्ने । प्प्रथय

स्वज॒न्तुभिं॑र॒स्मेरायोंऽअमर्त्त्यं ॥ सदंर्शु॒तस्य॒व्वपुं॑षो॒व्विरांजसिपू॒ण
क्षिंसान॒सिङ्क्रतुंम् ॥ १०९ ॥ इ॒ष्कृ॒र्त्तारं॑म॒द्ध्व॒रस्यं ॥ इ॒ष्कृ॒र्त्तारं॑म॒द्ध्व॒रस्य॒
प्प्रचे॑तस॒ङ्क्ष॒यंन्त॒ꣳराधं॑सोम॒हः ॥ रा॒तिंव्वा॒मस्यं॑सु॒भगां॒म्म॒हीमि॑ष॒न्द
धांसि॑सान॒सिꣳर॒यिम् ॥ ११० ॥ ऋ॒तावां॑नम्माहि॒षं । व्वि॒श्वदं॑र्शतम॒
ग्निꣳसु॒म्न्नायं॑दधि॒रेपु॒रोजनांꣳ ॥ श्रु॒त्कं॑र्णꣳसु॒प्प्रथं॑स्तमन्त्वा॒गि॒रादैव्य॒
म्मानुं॑षायु॒गा ॥ १११ ॥ आप्प्यांयस्व ॥ आप्प्यांयस्व॒समे॑तुतेव्वि॒श्व
तं॑ःसोम॒व्वृष्ण्यंम् ॥ भवा॒व्वाजं॑स्यसङ्ग॒थे ॥ ११२ ॥ सन्ते॑ ॥ सन्ते॒पयांꣳ

सिसमुयन्तुव्वाजाꣳसंव्वृष्ष्ण्यान्यभिमातिषाह÷ ॥ आप्प्यायमानोऽअमृतायसोमदिविश्श्रवाꣳस्युत्तमानिधिष्ष्व ॥ ११३॥ आंप्प्यायस्व । मदिन्तमसोमविश्श्वेभिरꣳशुभि÷ ॥ भवानꣳसुप्प्रथस्तमꣳसखावृधे॥ ११४॥ आते । व्वत्त्सोमनोयमत्त्परमाच्चित्त्सधस्त्थात् ॥ अग्ग्नेत्त्वाङ्कामयागिरा ॥ ११५ ॥ तुब्भ्यन्ताः ॥ तुब्भ्यन्ताऽअङ्गिरस्तमविश्श्वा÷सुक्षितयꣳपृथक् ॥ अग्ग्नेकामाययेमिरे॥ ११६॥ अग्निःप्प्रियेषु॥ अग्निःप्प्रियेषुधामसुकामोभूतस्यभव्व्यस्य ॥ सम्म्राडेकोव्विराजति

२००४।६।१६।५ मा शुभम्

॥११७॥ [१६] इतिश्रीवाजसनेयसंहितायांद्वादशोऽध्यायः ॥१२॥

श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ मयिगृह्णामिपंचदश,ध्रुवास्येकादश,मधुव्वाताऽएकादश,सम्यक्स्रवंतिनवे,मंमाषड,पांत्वैका,ऽयंपुरःपंच,सप्ताष्टापंचाशत् ॥ हरिःॐ ॥ मयिंगृह्णामि ॥ मयिंगृह्णाम्म्यग्ग्रेंऽअग्निꣳरायस्प्पोषांयसुप्प्रजास्त्वायंसुवीर्य्यांय ॥ मामुंदेवताꣳसचन्ताम् ॥१॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमसियोनिरग्नेःसंमुद्रमभितꣳपिन्वंमानम् ॥ वर्द्धमानोमहाँ२॥ऽआचपुष्क्करेदिवोमात्रं

[ॐ मयिगृह्णामीति जमदग्निऋषिर्वरुणोदेवता त्रिष्टुप् छन्दः, मासोपवासफलप्राप्तिकामः पाठेविनियोगः॥१२॥]

याव्वरिम्म्णाप्प्रथस्व ॥ २ ॥ ब्रह्मयज्ञानम् ॥ ब्रह्मयज्ञानम्प्रथमम्पुर
स्ताद्विसीमतःसुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःस
तश्चयोनिमसतश्चविवः ॥३॥ हिरण्ण्यगर्ब्भःसम् ॥ हिरण्ण्यगर्ब्भःस
मवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुते
माङ्कस्म्मैदेवायहविषाव्विधेम ॥४॥ द्रप्प्सश्चस्कन्द । पृथिवीमनुद्या
मिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समानंय्योनिमनुसञ्चरन्तन्द्रप्प्सञ्जुहो
म्म्यनुसप्तहोत्राः ॥५॥ नमोस्तु । सर्प्पेब्भ्योयेकेचपृथिवीमनु ॥ ये

ऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥६॥ याऽइषवः ॥ याऽइष
वोयातुधानानांऽयेवावनस्प्पतीँ १॥रनु॥ येवावटेषुशेरतेतेभ्यः सर्प्पे
भ्योनमः ॥७॥ येवा ॥ येवामीरोचनेदिवोयेवासूऽर्य्यस्यरश्मिषु ॥
येषामप्प्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः ॥८॥ कृणुष्ष्वपाजः ॥
कृणुष्ष्वपाजःप्प्रसितिन्नपृथ्वींऽयाहिराजेवामवाँ २॥ऽइभेन ॥ तृ
ष्ष्वीमनुप्प्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥ ९ ॥ तवभ्रमा
सः ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः ॥ तपूꣳ

ष्व्यग्नेजुह्वापतङ्गानसंन्दितोविसृंजविष्वंगुल्काः ॥ १० ॥ प्रतिस्प
शं÷ ॥ प्रतिस्पशोविसृंजतूर्ण्णितमोभवांपायुर्विशोऽअस्याऽअद
ब्धः ॥ योनोदूरेऽअघशꣳसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत्
॥ ११ ॥ उदग्ने । तिष्ठप्रत्यातंनुष्वन्यमित्राँ२॥ऽओषतात्तिग्म
हेते ॥ योनोऽअरातिꣳसमिधानचक्रेनीचातन्धक्ष्यतसन्नशुष्कम्
॥१२॥ ऊर्द्ध्वोभव ॥ ऊर्द्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यां
न्यग्ने ॥ अवस्थिरातंनुहियातुजूनांजामिमजामिम्प्रमृणीहिशत्रून्

न् ॥ अ॒ग्नेष्ट्वा॒तेज॑सासादयामि ॥ १३ ॥ अ॒ग्निर्म्मू॒द्धा । दि॒वःक॒कुत्प
ति॑÷पृथि॒व्याऽअ॒यम् ॥ अ॒पाꣳरेता॑ꣳसिजिन्वति ॥ इन्द्र॑स्य॒त्त्वौज॑
सासादयामि ॥ १४ ॥ भु॒वो॑य॒ज्ञस्य॑ ॥ भु॒वो॑य॒ज्ञस्य॒रज॑सश्च॒नेतायत्त्रा॑
नि॒यु॒द्भिः॑सच॑से॒शि॒वाभि॑÷ ॥ दि॒विमू॒र्द्धान॑न्दधिषे॒स्व॒र्षाञ्जि॒ह्वाम॑ग्ने
च॒कृषे॒ह॒व्य॒वाह॑म् ॥ १५ ॥ [१५] ध्रु॒वासि॑ । ध॒रुणास्तृ॑ताऽवि॒श्वक॑र्म्म
णा ॥ मात्त्वा॑समु॒द्रऽउद्व॑धी॒न्मासु॒प॒र्ण्णो॒व्यथ॑मानापृथि॒वीन्दृ॑ꣳह
॥१६॥ प्र॒जाप॑तिष्ट्वा । सादय॑त्त्व॒पाम्पृ॒ष्ठेस॑मु॒द्रस्येम॑न् ॥ व्यच॑स्वती॒म्प्र

थस्वतीम्प्रथस्वपृथिव्यासि॥१७॥भूरसि॥ भूरसिभूमिरस्यदितिरसिवि
श्वधायाविश्वस्यभुवनस्यधर्त्री॥ पृथिवींयच्छपृथिवीन्दृꣳहपृथिवी
म्माहिꣳसीः॥१८॥ विश्वस्मैप्प्राणाय॥ विश्वस्मैप्प्राणायापानाय
व्यानायोदानायप्प्रतिष्ठायैचरित्राय॥ अग्निष्ट्वाभिपातुमह्यास्वस्त्या
च्छर्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीद॥१९॥काण्डात्काण्डा
त्प्ररोहन्ती॥काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि॥एवानोदूर्वे
प्प्रतनुसहस्रेणशतेनच॥२०॥याशतेन। प्प्रतनोषिसहस्रेणविरोहसि॥

तस्यास्तेदेवीष्टकेव्विधेमहविषांव्वयम्॥२१॥यास्ते॥ यास्तेऽअग्नेसूर्य्ये
रुचोदिवमातन्वन्तिरश्म्मिभिः॥ ताभिर्न्नोऽअद्यसर्व्वाभीरुचेजनाय
नस्कृधि॥२२॥ यावः॥ यावोदेवाꣳसूर्य्येरुचोगोष्ष्वश्श्वेषुयारुचः॥
इन्द्राग्नीताभिꣳसर्व्वाभीरुचंन्नोधत्तबृहस्प्पते॥२३॥व्विराड्ज्योतिः॥
व्विराड्ज्योतिरधारयत्त्स्वराड्ज्योतिरधारयत्॥ प्रजापतिष्ट्वासादयतु
पृष्ठेपृथिव्याज्ज्योतिष्म्मतीम्॥ व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानायव्वि
श्श्वञ्ज्योतिर्य्यच्छ ॥ अग्निष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद

॥२४॥ मधुंश्च ॥ मधुंश्चमाधंवश्चव्वासंन्तिकावृतूऽअग्ग्नेरंन्तःश्लेषोसि
कल्प्पैतान्द्यावांपृथिवीकल्प्पंन्तामापऽओषंधयःकल्प्पंन्तामग्ग्नयः
पृथङ्ममज्यैष्ठ्यांयसव्व्रंताः ॥ येऽअग्ग्नयःसमंनसोन्तराद्यावांपृथि
वीऽइमे ॥ व्वासंन्तिकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभि
संव्विंशन्तुतयांदेवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ २५ ॥ अषांढासि ॥ अ
षांढासिसहंमानासहस्वारांतीःसहंस्वपृतनायतः ॥ सहस्रंवीर्य्यांसि
सामांजिन्व ॥२६॥ [११] मधुव्वाताः ॥ मधुव्वाताऽऋतायतेमधुंक्षर

न्ति॒सिन्धंवः॥माध्वीर्न्नःस॒न्त्वोषंधीः॥२७॥ मधु॒नक्तंम्॥ मधु॒नक्तंमु
तोषसो॒मधुंम॒त्पार्थिंव॒ꣳरजं÷॥ मधु॒द्यौरंस्तुनः॒पिता॥२८॥ मधुंमा
न्नः॥ मधुंमान्नो॒व्वन॒स्पति॒र्म्मधुंमाँ२॥ऽअस्तु॒सूर्य्यं÷॥ माध्वी॒र्ग्गावों
भवन्तुनः॥२९॥ अ॒पाङ्गम्भंन्॥ अ॒पाङ्गम्भंन्त्सीद॒मात्त्वा॒सूर्य्यों
भितांप्प्सी॒न्मा॒ग्निर्व्वैश्वान॒रः॥ अच्छिन्नपत्राःप्प्र॒जाऽअंनुवीक्ष॒स्वा
नुंत्त्वादि॒व्व्यावृष्टिं÷सचताम्॥३०॥ त्रीन्त्स॒मुद्रान्॥ त्रीन्त्स॒मु॒द्द्रा
न्त्समंसृपत्त्स्व॒र्ग्गान॒पाम्पति॑र्वृ॒षभऽइष्टंकानाम्॥ पुरीषंव्वसांनःसुकृ

तस्यं॑लो॒केतत्रं॑गच्छ॒यत्र॒पूर्व्वे॑परे॑ताः ॥ ३१ ॥ म॒हीद्यौः । पृं॑थि॒वीचं॑न॒ऽइ॒
मंय॒ज्ञम्मिं॑मिक्षताम् ॥ पि॒पृ॒तान्नो॒भरीं॑मभिः ॥ ३२ ॥ व्विष्णो॒ःक
र्म्माणि । प॒श्यत॒यतों॒व्व्र॒तानिं॑पस्प॒शे ॥ इन्द्रं॑स्य॒युज्य॒ःसखा॑ ॥ ३३ ॥
ध्रु॒वासिं॑ । ध॒रुणे॒तोजं॒ज्ञेप्र॒थम॒मे॒ब्भ्योयोनिं॒ब्भ्यो॒ऽअधिं॒जा॒तवें॑दाः ॥
सगा॑य॒त्र्यात्रि॒ष्टुभा॑नु॒ष्टुभा॑चदे॒वेब्भ्यो॑ह॒व्यंव्वहतु॒प्प्रजा॒नन् ॥ ३४ ॥
इ॒षेरा॒ये । रं॑मस्व॒सहं॑से॒द्युम्न॒ऽऊ॒र्जेंऽअपं॑त्त्याय ॥ स॒म्म्राडं॑सिस्व॒राडं॑सि
सा॒रस्व॒तौत्वोत्त्सौ॒प्प्रावं॑ताम् ॥ ३५ ॥ अग्ग्नें॑यु॒क्ष्व ॥ अग्ग्नें॑यु॒क्ष्वाहि

येतवाश्श्वांसोदेवसाधवं÷॥ अरंव्वहन्तिमन्न्यवें ॥३६॥ सुक्ष्वाहि । देंवहू
तंमाँ२॥ऽअश्वाँ२॥ऽअग्ग्नेरथीरिंव॥ निहोतांपूर्व्यश्सदः॥३७॥[११]
सम्म्यकस्रवन्ति । सरितोनधेनाऽअन्तर्हृदामनंसापूयमांनाः ॥ घृत
स्यधाराऽअभिचाकशीमिहिरण्ण्ययोव्वेतसोमद्ध्येऽअग्ग्नेः॥३८॥ रुचे
त्त्वां । रुचेत्त्वांभासेत्त्वाज्ज्योतिषेत्त्वा ॥ अभूदिदंव्विश्श्वस्यभुवंनस्य
व्वाजिनमग्ग्नेर्व्वैश्श्वानरस्यंच ॥३९॥ अग्निज्ज्योतिषा ॥ अग्निज्ज्योतिषा
ज्ज्योतिष्म्मान्रुक्मोव्वर्चसाव्वर्चस्वान् ॥ सहस्रदाऽअसिसहस्रायत्त्वा

॥४०॥ आदित्यङ्गर्भम् ॥ आदित्यङ्गर्भम्पयसासमङ्धिसहस्रस्यप्र
तिमांव्विश्वरूपम् ॥ परिव्वृङ्धिहरसामाभिमꣳस्थाःशतायुषङ्कृणुहि
चीयमानः ॥४१॥ व्वातस्यजूतिं । व्वरुणस्यनाभिमश्वञ्जज्ञानꣳसरि
रस्यमध्ये ॥ शिशुन्नदीनाꣳहरिमद्रिबुध्नमग्नेमाहिꣳसीःपरमेव्यो
मन् ॥४२॥ अजस्रमिन्दुम् ॥ अजस्रमिन्दुमरुषम्भुरण्युमग्निमी
डेपूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशःकल्पमानोगाम्माहिꣳसी
रदितिंव्विराजम् ॥४३॥ व्वरूत्रीन्त्वष्टुः ॥ व्वरूत्रीन्त्वष्टुर्व्वरुणस्यना

भिमविंज्ञज्ञानाꣳरजसᳶपरस्म्मात् ॥ महीꣳसाहस्त्रीमसुरस्यमा
यामग्नेमाहिꣳसीᳶपरमेव्व्योमन् ॥ ४४ ॥ योऽअग्निः ॥ योऽअग्नि
रग्नेरद्ध्यजायतशोकात्त्पृथिव्व्याऽउतवादिवस्प्परि ॥ येनप्प्रजाव्विश्व
कर्म्माजजानतमग्नेहेडᳶपरितेवृणक्तु ॥४५॥ चित्रन्देवानाम् ॥ चित्र
न्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्यावा
पृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्माजगतस्तस्थुषश्च ॥४६॥ [९] इम
म्मा । हिꣳसीर्द्विपादम्पशुꣳसहस्त्राक्षोमेधायचीयमानᳶ॥ मयुम्पशु

म्मेधंमग्नेजुषस्वतेनंचिन्वानस्तन्वोनिषीद ॥ मयुन्तेशुगृंच्छतुय
न्द्विष्मस्तन्तेशुगृंच्छतु॥४७॥ इमम्मा। हिंᳪसीरेकंशफम्पशुङ्कनि
क्रदंवाजिनंवाजिनेषु ॥ गौरमारण्यमनुंतेदिशामितेनंचिन्वानस्त
न्वोनिषीद ॥ गौरन्तेशुगृंच्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४८ ॥
इमᳪसाहस्रम् ॥ इमᳪसाहस्रᳪशतधारमुत्संव्यच्यमानᳪसरिर
स्यमध्ये॥ घृतन्दुहानामदितिञ्जनायाग्नेमाहिंᳪसीःपरमेव्योमन्॥
गवयमारण्यमनुंतेदिशामितेनंचिन्वानस्तन्वोनिषीद ॥ गवयन्ते

शुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ४९ ॥ इममूर्णायुं । वरुणस्य
नाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम् ॥ त्वष्टु÷प्प्रजानाम्प्रथमञ्ज
नित्रमग्ग्नेमाहिꣳसीꣳपरमेव्व्योमन् ॥ उष्ट्रमारण्ण्यमनुतेदिशामिते
नचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृ
च्छतु ॥ ५० ॥ अजोहि ॥ अजोह्यग्ग्नेरजनिष्ट्टशोकात्त्सोऽअपश्यज्ज
नितारमग्ग्रे ॥ तेनदेवादेवतामग्ग्रमायँस्तेनरोहमायन्नुपमेद्ध्यासꣳ ॥
शरभमारण्ण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ शरभन्ते

शुगृंच्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ५१ ॥ त्वंय्यंविष्ठ । दाशुषो
नॄँःऽपांहिशृणुधीगिरं÷ ॥ रक्षांतोकमुतत्क्मनां ॥ ५२ ॥ [ ६ ]
अपान्त्वां ॥ अपान्त्वेमंन्त्सादयाम्म्युपान्त्वोद्मंन्त्सादयाम्म्युपा
न्त्वाभस्म्मंन्त्सादयाम्म्युपान्त्वाज्ज्योतिंषिसादयाम्म्युपान्त्वायंनेसा
दयाम्म्यर्ण्णवेत्त्वासदंनेसादयाम्मिसमुद्रेत्त्वासदंनेसादयाम्मिसरिरे
त्त्वासदंनेसादयाम्म्युपान्त्वाक्षयैंसादयाम्म्युपान्त्वासधिंषिसादया
म्म्युपान्त्वासदंनेसादयाम्म्युपान्त्वांसधस्त्थैंसादयाम्म्युपान्त्वायो

नौ॑सादयाम्म्यु॒पान्त्वा॒पुरी॑षेसादयाम्म्यु॒पान्त्वा॒पाथ॑सिसादयामिगा
य॒त्रेण॑त्त्वा॒च्छन्द॑सासादयामि॒त्रैष्टु॑भेनत्त्वा॒च्छन्द॑सासादयामि॒जाग॑
तेनत्त्वा॒च्छन्द॑सासादया॒म्म्यानु॑ष्टुभेनत्त्वा॒च्छन्द॑सासादयामि॒पाङ्क्ते॑
नत्त्वा॒च्छन्द॑सासादयामि ॥ ५३ ॥ [ १ ] अ॒यम्पुरः ॥
अ॒यम्पु॒रोभु॒व॒स्तस्य॑प्प्रा॒णोभौ॑वाय॒नोव॑स॒न्तःप्प्रा॑णाय॒नोगा॑य॒त्रीव्वा॑
स॒न्तीगा॑य॒त्र्यैगा॑य॒त्रङ्गा॑य॒त्रादु॑पा॒ꣳ॒शुरु॑पा॒ꣳ॒शोस्त्रि॒वृत्त्रि॒वृ॒तो॑रथन्त॒
रंव्वासि॑ष्ठ॒ऽऋषि॑÷प्प्र॒जाप॑तिगृहीतया॒त्त्वया॑प्प्रा॒णङ्गृ॑ह्णामिप्प्र॒जाभ्य॑÷

॥ ५४ ॥ अ॒यन्द॑क्षि॒णा । वि॒श्वक॑र्म्मा॒तस्य॒मनो॑वैश्वकर्म्म॒ण
ङ्ग्रीष्मोमा॑न॒सस्त्रि॒ष्टुब्ग्रैष्मी॑त्रि॒ष्टुभ॑ः स्वा॒रꣳस्वा॒राद॑न्तर्या॒मो॑न्त
र्या॒मात्प॑ञ्चद॒शः प॑ञ्चद॒शाद्बृ॒हद्भ॒रद्वा॑ज॒ऽऋषि॑ः प्र॒जाप॑तिगृहीतया॒
त्वया॒मनो॑गृह्णामिप्र॒जाभ्य॑ः ॥ ५५ ॥ अ॒यम्प॒श्चात् ॥ अ॒यम्प॒
श्चाद्वि॒श्वव्य॑चा॒स्तस्य॒चक्षु॑र्वैश्वव्यच॒संव॒र्षाश्चा॑क्षु॒ष्यो॒जग॑तीवा॒र्षीज
ग॑त्या॒ऽऋक्स॑म॒मृक्स॑मा॒च्छु॒क्रः शु॒क्रात्स॑प्तद॒शः स॑प्तद॒शाद्वै॑रू॒प
ञ्ज॒मद॑ग्नि॒र्ऋषि॑ः प्र॒जाप॑तिगृहीतया॒त्वया॒चक्षु॑र्गृह्णामिप्र॒जाभ्य॑ः

॥ ५६ ॥ इ॒दमु॑त्त॒रात् ॥ इ॒दमु॑त्त॒रात्त्स्व॒स्तस्य॒श्श्रोत्र॑ꣳसौ॒वꣳश॒रच्छ्रौ
त्र्य॒नुष्टु॒प्श्शा॑र॒द्द्य॒नुष्टु॒भ॑ऽऐ॒डमै॒डान्म॒न्थीम॒न्थिन॑ऽएकवि॒ꣳशऽए॑कवि॒ꣳ
शाद्वैरा॒जंवि॒श्वामि॑त्र॒ऽऋषि॑÷प्प्र॒जाप॑तिगृहीतया॒त्त्वया॒श्श्रोत्र॑ङ्गृह्णा
मिप्प्र॒जाब्भ्य॑÷ ॥ ५७ ॥ इ॒यमु॒परि॑म॒तिस्तस्यै॒व्वाङ्॒मा॒त्त्याहे॑म॒न्तोव्वा॒
च्यः प॒ङ्क्तिर्है॑म॒न्तीप॒ङ्क्त्यैनि॒धन॑वन्नि॒धन॑वत॒ऽआग्ग्र॒य॒णऽआ॑ग्ग्र॒य॒णा ॥११५॥
त्रि॑णवत्त्रयस्त्रि॒ꣳशौत्त्रि॑णवत्त्रयस्त्रि॒ꣳशाब्भ्या॑ꣳशाक्क्वररैव॒तेव्वि॒श्वक॑र्म्म॒

ऽऋषिं॑÷प्प्र॒जाप॑तिगृहीतया॒त्त्वया॒ब्वाचं॑ङ्कृ॒त्त्वामि॒प्प्र॒जाब्भ्योँ॒[1]ल्लो॒कन्ता
ऽइन्द्रं॑म् ॥ ५८ ॥ [ ५ ] इतिश्रीवाजसनेयसंहितायांत्रयोदशोऽ
ध्यायः ॥१३॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ ध्रुवाक्षितिर्षट्,
सजूर्ऋतुभिर्द्विका, मूर्द्धावयोद्विका, इन्द्राग्नीऽअव्यथमानाꣳषडा,
युर्मेषडा, शुस्त्रिवृदेका, ग्नेर्भागोसिचतुष्कै, कयाचतुष्का, ष्टावेकात्रि
ꣳशत् ॥ हरिः ॐ ॥ ध्रुवाक्षितिर्ध्रुवयोनिꣳ ॥ ध्रुवाक्षितिर्ध्रुवयोनिर्ध्रु

---

[1] अध्यायः १२—लोकंपृण. १ । ताऽअस्य. २ । इंद्रंविश्वाः. ३ ॥ इतिप्रतीकानि ॥

५४ ५५ ५६
[ॐ ध्रुवाक्षितिरिति वशिष्ठऋषिरिन्द्रो देवता जगतीच्छन्दः सर्वजनकस्य फलप्राप्तिकामः पाठे—]
विनियोगः॥१४॥

वासिद्ध्रुवꣳस्योनिमासीदसाधुया ॥ उक्ख्यस्यकेतुम्प्रथमञ्जुषाणाश्वि
नाद्ध्वऱ्यूसादयतामिहत्वा ॥ १ ॥ कुलायिनीघृतवती ॥ कुलायिनीघृ
तवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः ॥ अभित्वारुद्द्राव्वसवोगृण
न्त्विमाब्रह्मपीपिहिसौभगायाश्विनाद्ध्वऱ्यूसादयतामिहत्वा ॥ २ ॥
स्वैर्दक्षैः ॥ स्वैर्दक्षैर्दक्षपितेहसीददेवानाꣳसुम्नेबृहतेरणाय ॥ पितेवै
धिसूनवऽआसुशेवास्वावेशातन्वासंव्विशस्वाश्विनाद्ध्वऱ्यूसादयतामि
हत्वा ॥ ३ ॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपुरीषमस्यप्प्सोनामतान्त्वा

व्विश्वे॑ऽअ॒भिगृ॑णन्तुदे॒वाः ॥ स्तोम॑पृष्ठाघृ॒तव॑ती॒हसी॑दप्प्र॒जाव॑द॒स्म्मेद्र
वि॒णाय॑जस्वा॒श्विना॑ध्व॒र्य्यूसा॑दयतामि॒हत्वा॑ ॥ ४ ॥ अदि॑त्यास्त्वा । पृ॒ष्ठे
सा॑दयाम्म्य॒न्तरि॑क्षस्यध॒र्त्रीँव्वि॒ष्टम्भ॑नीन्दि॒शामधि॑पत्नी॒म्भुव॑नाना
म् ॥ ऊ॒र्म्मिर्द्र॒प्प्सोऽअ॒पाम॑सिव्वि॒श्वक॑र्म्मात॒ऽऋषि॑र॒श्विना॑ध्व॒र्य्यूसा॑दय
तामि॒हत्वा॑ ॥ ५ ॥ शु॒क्रश्च॑ ॥ शु॒क्रश्च॒शुचि॑श्चग्ग्रै॒ष्म्मा॑वृ॒तूऽअ॒ग्ग्नेर॑न्तꣳ
श्ले॒षो᳖सि॒कल्प्पे॑ता॒न्द्यावा॑पृथि॒वीकल्प्प॑न्ता॒माप॒ऽओष॑धय॒ꣳकल्प्प॑न्ता
म॒ग्ग्नय॒ꣳपृथ॒ङ्मम॒ज्ज्यैष्ठ्या॑य॒सव्र॑ताꣳ ॥ येऽअ॒ग्ग्नय॒ꣳसम॑नसोन्त॒

संहि. राद्यावा॑पृथि॒वीऽइ॒मे ॥ ग्रैष्म्मा॑वृ॒तूऽअ॑भि॒कल्प्प॑माना॒ऽइन्द्र॑मिवदे॒ पू. अ.
॥११७॥ वाऽअ॑भि॒संव्वि॑शन्तु॒तया॑दे॒वत॑याङ्गि॒र॒स्वद्ध्रु॒वेसी॑दतम् ॥ ६ ॥ [ ६ ] ॥१४॥
स॒जूर्ऋ॒तुभि॑ः । स॒जूर्व्वि॒धाभि॑ः स॒जूर्दे॒वैः स॒जूर्दे॒वैर्व्व॑योना॒धैर॒ग्नये॑त्त्वा
वै॒श्श्वान॒राया॒श्श्विना॑द्ध्व॒र्य्यूसा॑दयतामि॒हत्त्वा॑स॒जूर्ऋ॒तुभि॑ः स॒जूर्व्वि॒धा
भि॑ः स॒जूर्व्वसु॑भिः स॒जूर्दे॒वैर्व्व॑योना॒धैर॒ग्नये॑त्त्वावै॒श्श्वान॒राया॒श्श्विना॑द्ध्व॒
र्य्यूसा॑दयतामि॒हत्त्वा॑स॒जूर्ऋ॒तुभि॑ः स॒जूर्व्वि॒धाभि॑ः स॒जूरु॒द्रैः स॒जूर्दे॒वै ॥११७॥
र्व्व॑योना॒धैर॒ग्नये॑त्त्वावै॒श्श्वान॒राया॒श्श्विना॑द्ध्व॒र्य्यूसा॑दयतामि॒हत्त्वा॑स॒जू

र्ऋतुभि÷सजूर्व्विधाभि÷सजूरादित्यैःसजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावै
श्वानरायाश्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभि÷सजूर्व्विधाभि
÷सजूर्व्विश्वैर्द्देवैःसजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनाद्ध्वर्य्यू
सादयतामिहत्त्वा ॥ ७ ॥ प्प्राणम्मे । पाह्यपानम्मेपाहिव्व्यानम्मे
पाहिचक्षुर्म्मऽउर्व्व्याव्विभाहिश्श्रोत्रम्मेश्श्लोकय ॥ अपःपिन्वौषधी
र्जिन्वद्विपादवचतुष्प्पात्पाहिदिवोव्वृष्टिमेरय ॥ ८ ॥ [ २ ] मू
र्द्धावय÷ प्प्रजापतिश्छन्द÷क्षत्रंव्वयोमयन्दञ्छन्दोव्विष्टम्भोवयो

धि॑पति॒श्छन्दो॑वि॒श्वक॑र्म्मा॒व्वय॑ःपरमे॒ष्ठीच्छन्दो॑ब॒स्तोव्वयो॑विब॒लञ्छ
न्दो॒वृष्णि॒र्व्वयो॑विशा॒लञ्छन्द॒ःपुरु॑षो॒व्वय॑स्त॒न्द्रञ्छन्दो॑व्या॒घ्रोव्वयो
ना॑धृष्टञ्छन्द॑ःसि॒ꣳहोव्वय॑श्छ॒दिश्छन्द॑ःपष्ठवाड्वयो॑बृह॒तीच्छन्द॑ऽउ॒
क्षाव्वय॑ःक॒कुप्छन्द॑ऽऋष॒भोव्वय॑ःस॒तोबृ॑ह॒ती॒च्छन्दो॑न॒ड्वान्व्वय॑ः
॥ ९ ॥ अ॒न॒ड्वान्व्वय॑ः । प॒ङ्क्तिश्छन्दो॑धे॒नुर्व्वयो॒जग॑ती॒च्छन्द॒स्त्र्यवि॒र्व्वय॑
स्त्रि॒ष्टुप्छन्दो॑दित्य॒वाड्वयो॑वि॒राट्छन्द॒ःपञ्चा॑वि॒र्व्वयो॑गाय॒त्रीच्छन्द॑स्त्रि

वत्सोव्वयंऽउष्ष्णिक्क्छन्दस्तुर्य्यवाड्वयोनुष्टुप्प्छन्दो[1]लोकन्ताऽइन्द्रम्
॥ १० ॥ [ २ ] इन्द्राग्ग्नीऽअव्व्यथमानाम् ॥ इन्द्राग्ग्नीऽअव्व्य
थमानामिष्टकान्दृꣳहतंय्युवम् ॥ पृष्ठेनद्यावापृथिवीऽअन्तरिक्षञ्च
व्विबाधसे ॥ ११ ॥ व्विश्श्वकर्म्मात्वा । सादयत्त्वन्तरिक्षस्यपृष्ठेव्व्य
चस्वतीम्प्रथस्वतीमन्तरिक्षंय्यच्छान्तरिक्षन्दृꣳहान्तरिक्षम्माहिꣳ
सीः ॥ व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानायोदानायप्प्रतिष्ठायैचरित्रा

---

१ अध्यायः १२–लोकंपृण. १ ताऽअस्य. २ । इंद्राग्नि विश्वाः. ३ ॥ इतिप्रतीकानि ॥
५४ ५५ ५६

य ॥ वायुष्ट्वाभिपांतुमह्यास्वस्त्याच्छर्द्दिषाशन्तंमेनतयांदेवतंयाङ्गि
रस्वद्ध्रुवासींद ॥ १२ ॥ शतम् ॥ ७०० ॥ राज्ञ्यंसि ॥ राज्ञ्यंसि
प्प्राचींदिग्ग्विराडंसिदक्षिंणादिक्सम्म्राडंसिप्प्रतीचींदिक्स्वराडस्युदीं
चीदिगधिंपत्न्यसिबृहतीदिक् ॥ १३ ॥ विश्वकंर्म्मात्त्वा । सादय
त्वन्तरिंक्षस्यपृष्ठेज्ज्योतिंष्म्मतीम् ॥ विश्वंस्म्मैप्प्राणायांपानायंव्व्या
नायव्विश्वञ्ज्योतिंर्य्यंच्छ ॥ वायुष्टेधिंपतिस्तयांदेवतंयाङ्गिरस्वद्ध्रुवा
सींद ॥ १४ ॥ नभंश्च । नभस्यश्चवार्षिकावृतूऽअग्नेरंन्तःश्लेषोसि

कल्प्पे॑ता॒न्द्यावा॑पृथि॒वीकल्प्प॑न्ता॒माप॒ऽओष॑धय॒ःकल्प्प॑न्ताम॒ग्नय॒ः
पृथ॒ङ्म्म॒ज्ज्यैष्ठ्या॑य॒सव्व्र॑ताः ॥ ये॒ऽअ॒ग्नय॒ःसम॑नसोन्त॒राद्यावा॑पृथि॒वी
ऽइमे॥व्वार्षि॑कावृ॒तूऽअ॑भि॒कल्प्प॑माना॒ऽइन्द्र॑मिवदे॒वाऽअ॑भि॒संव्वि॑शन्तु॒
तया॑दे॒वत॑याङ्गिर॒स्वद्ध्रु॒वेसी॑दतम् ॥१५॥ इ॒षश्च॑ ॥ इ॒षश्चो॒र्ज्जश्च॑शार॒दावृ॒
तू॒ऽअ॒ग्नेर॑न्त॒ःश्ले॒षो॑सि॒कल्प्पे॑ता॒न्द्यावा॑पृथि॒वीऽकल्प्प॑न्ता॒माप॒ऽओ
ष॑धय॒ःकल्प्प॑न्ताम॒ग्नय॒ःपृथ॒ङ्म्म॒ज्ज्यैष्ठ्या॑य॒सव्व्र॑ताः ॥ ये॒ऽअ॒ग्नय॒ः
सम॑नसोन्त॒राद्यावा॑पृथि॒वीऽइमे ॥ शा॒र॒दावृ॒तूऽअ॑भि॒कल्प्प॑माना॒ऽइ

न्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ १६ ॥
[६]आयुर्म्मे । पाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मे
पाहिश्श्रोत्रम्मेपाहिवाचम्मेपिन्वमनोमेजिन्वात्मानम्मेपाहिज्ज्यो
तिर्म्मेयच्छ ॥ १७ ॥ माच्छन्दः । प्प्रमाच्छन्दः प्प्रतिमाच्छन्दोऽअस्री
वयश्छन्दः पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहतीच्छन्दोनुष्टुप्छन्दोवि
राट्छन्दोगायत्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः पृथिवीच्छन्दः
॥ १८ ॥ पृथिवीच्छन्दः ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दँस

माश्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमनश्छन्दःकृषिश्छन्दोहिरं
ण्यञ्छन्दोगौश्छन्दोजाच्छन्दोश्वश्छन्दः॥१९॥ अग्निर्देवता ॥ अ
ग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेव
तादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवता
वरुणोदेवता ॥२०॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसिधर
णी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्यैत्त्वाक्षेमायत्त्वा ॥२१॥ यन्त्रीराट् ॥
यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री ॥ इषेत्त्वोर्ज्जेत्त्वारय्यैत्त्वा

पोषायत्त्वालोकन्ताऽइन्द्रम्॥२२॥[६]आशुस्त्रिवृत्॥आशुस्त्रिवृ
द्भान्तःपञ्चदशोव्योमासप्तदशोधरुणऽएकविꣳशःप्रतूर्त्तिरष्टादश
स्तपोनवदशोऽभीवर्त्तःसविꣳशोवर्च्चोद्वाविꣳशःसम्भरणस्त्रयोविꣳशो
योनिश्चतुर्विꣳशोगर्भाःपञ्चविꣳशऽओजस्त्रिणवःक्रतुरेकत्रिꣳशः
प्रतिष्ठात्रयस्त्रिꣳशोब्रध्नस्यविष्टपञ्चतुस्त्रिꣳशोनाकःषट्त्रिꣳशोविवर्त्तो
ष्टाचत्वारिꣳशोधर्त्रञ्चतुष्टोमः॥२३॥[१]अग्नेर्भागः॥अग्नेर्भागो

---

१ अध्याय १२–लोकंपृण. १–ताऽअस्य. २ । इंद्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥

मंत्रः ५४ ५५ ५६

सि॒दी॒क्षाया॒ऽआधि॑पत्त्य॒म्ब्रह्म॑स्पृ॒तन्त्रि॒वृत्स्तोम॒ऽइन्द्र॑स्य भा॒गो॒सि॒व्वि
ष्णो॒राधि॑पत्य॒ङ्क्ष॒त्रꣳस्पृ॒तम्प॑ञ्च॒द॒शस्तो॒मो॑नृ॒चक्ष॑सा॒म्भा॒गो॒सि॒धा॒तु॒रा
धि॑पत्य॒ञ्ज॒नि॒त्र॑ꣳस्पृ॒तꣳस॑प्त॒द॒शस्तो॒मो॑मि॒त्रस्य॑भा॒गो॒सि॒व्व॒रु॑ण॒स्याधि॑
पत्यन्दि॒वोव्वृ॒ष्टिर्व्वात॑स्पृ॒तऽए॑कवि॒ꣳश॒स्तो॒मो॒व्व॒सू॑नाम्भा॒गः॥२४॥व्व॒सू॑
नाम्भा॒गः ॥ व्व॒सू॑नाम्भा॒गो॒सि॒रु॒द्राणा॒मा॒धि॑पत्य॒ञ्च॒तु॑ष्पात्स्पृ॒तञ्च॑तु
र्व्वि॒ꣳश॒स्तो॒मऽआ॒दि॒त्याना॑म्भा॒गो॒सि॒म॒रु॒ता॒मा॒धि॑पत्य॒ङ्गर्भा॑स्पृ॒ताः
प॑ञ्चवि॒ꣳश॒स्तो॒मोदि॑त्यै भा॒गो॒सि॒पू॒ष्णऽआ॒धि॑पत्त्य॒मोज॑स्पृ॒तन्त्रि॒ण॒व

स्तोमौदेवस्यंसवितुर्भागोसिबृहस्पतेराधिंपत्यꣳसमीचीर्दिशंस्पृ
ताश्चंतुष्टोमस्तोमोयवानाम्भागः॥२५॥यवानाम्भागः॥ यवानाम्भा
गोस्ययंवानामाधिंपत्यम्प्रजास्पृताश्चतुश्चत्वारिꣳशस्तोमंऽऋभूणा
म्भागोसिविश्वेषान्देवानामाधिंपत्यम्भूतꣳस्पृतन्त्रंयस्त्रिꣳशस्तो
मꣳसहंश्च॥२६॥सहंश्च। सहस्यश्चहैमंन्तिकावृतूऽअग्नेरंन्तꣳश्लेषोसि
कल्पेंतान्द्यावांपृथिवीकल्पंन्तामापऽओषंधयꣳकल्पंन्तामग्नयꣳपृ
थङ्ममज्यैष्ठ्यायसव्रंताꣳ॥ येऽअग्नयꣳसमंनसोन्तराद्यावांपृथिवीऽइ

मे॥है॒म॑न्तिकावृ॒तू॒ऽअ॑भि॒कल्प्प॑माना॒ऽइन्द्र॑मिवदे॒वाऽअ॑भि॒संव्वि॑शन्तु॒
तया॑दे॒वत॑याङ्गिर॒स्वद्ध्रु॒वेसी॑दतम् ॥ २७ ॥ [ ४ ] एक॑यास्तुवत । प्प्र॒जा
ऽअ॑धीयन्तप्प्र॒जाप॑ति॒रधि॑पतिरासी॒त्ति॒सृभि॑रस्तुवत॒ब्ब्रह्मा॑सृज्ज्यत॒ब्ब्र
ह्म॑ण॒स्प्पति॒रधि॑पतिरासी॒त्पञ्च॒भि॑रस्तुवतभू॒तान्न्य॑सृज्ज्यन्तभू॒ताना॒
म्पति॒रधि॑पतिरासीत्स॒प्तभि॑रस्तुवतसप्त॒ऽऋ॒षयो॑सृज्ज्यन्तधा॒ताधि॑प
तिरासीन्न॒वभि॑रस्तुवत ॥ २८ ॥ न॒वभि॑रस्तुवत । पि॒तरो॑सृ
ज्ज्य॒न्तादि॑ति॒रधि॑पत्न्यासीदेकाद॒शभि॑रस्तुवतऽऋ॒तवो॑सृज्ज्यन्तार्त्त॒

वाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवतमासाऽअसृज्यन्तसंव्वत्सरोधिपतिरासीत्पञ्चदशभिरस्तुवतक्षत्रमसृज्यतेन्द्रोधिपतिरासीत्सप्तदशभिरस्तुवतग्राम्म्याःपशवोसृज्यन्तबृहस्प्पतिरधिपतिरासीन्नवदशभिरस्तुवत ॥ २९ ॥ नवदशभिरस्तुवत । शूद्रार्य्यावसृज्येतामहोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैकशफाःपशवोसृज्यन्तव्वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षुद्राःपशवोसृज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतारण्याःपश

वौसृज्यन्तव्वायुरधिंपतिरासीत्त्सप्तविꣳशत्यास्तुवतद्यावांपृथिवी
व्यैतांव्वसंवोरुद्राऽआंदित्त्याऽअंनुव्यायँस्तऽएवाधिंपतयऽआसन्नवं
विꣳशत्त्यास्तुवत ॥ ३० ॥ नवंविꣳशत्त्यास्तुवत ॥ नवंविꣳशत्त्यास्तु
वतव्वनस्प्पतंयोसृज्यन्तसोमोधिंपतिरासीदेकंत्रिꣳशतास्तुवतप्र
जाऽअंसृज्यन्तयवाश्चायंवाश्चाधिंपतयऽआसँस्त्रयंस्त्रिꣳशतास्तुवत
भूतान्यंशाम्म्यन्प्रजापंतिःपरमेष्ठ्यधिंपतिरासील्लोकन्ताऽइन्द्रंम्

---

१ अध्यायः १२-लोकंपृण. १-ताऽअंस्य. २ । इंद्रंव्विश्वाः. ३ इति प्रतीकानि ॥
॥ मंत्रः ॥ ५४ ५५ ५६

॥ ३१ ॥ [ ४ ] इतिश्रीवाजसनेयसंहितायांचतुर्द्दशोऽध्यायः ॥१४॥
श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ अग्नेजातान्पंच, रश्मिना
सत्यायचतस्रो, राज्ञ्यसिपंचा, यंपुरःपंचा, ग्निर्मूर्द्धैकोनत्रिꣳश, द्वेनऽ
ऋषयोष्टौ, तपश्चनव, सप्तपंचषाष्ठिः ॥ हरिःॐ ॥ अग्नेजातान् ॥ अग्ने
जातान्प्रणुदानꣳसपत्त्नान्प्रत्त्यजातान्नुदजातवेदꣳ ॥ अधिनोब्रूहिसु
मनाऽअहेडँस्तवंस्यामशर्म्मँस्त्रिवरूथऽउद्भौ ॥ १ ॥ सहंसाजातान् ॥
सहंसाजातान्प्रणुदानꣳसपत्त्नान्प्रत्यजाताञ्जातवेदोनुदस्व ॥ अधि

[ॐ अग्नेजाता नित्यस्य कश्यपऋषि विश्वेदेवा: देवता :अनुष्टुप्छन्दो वाग्देवतासाधने पाठे विनि
योग:॥१५॥]

नोब्ब्रूहिसुमनस्यमानोव्वयꣳस्यामप्प्रणुदानꣳसपत्त्नान् ॥ २ ॥ षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्द्रविणञ्चतुश्चत्वारिꣳशस्तोमोव्वर्च्चोद्द्रविणम् ॥ अग्नेःपुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्रजावदस्म्मेद्द्रविणायजस्व ॥३॥ एवश्छन्दः ॥ एवश्छन्दोव्वरिवश्छन्दःशम्भूश्छन्दःपरिभूश्छन्दऽआच्छच्छन्दोमनश्छन्दोव्यचश्छन्दꣳसिन्धुश्छन्दःसमुद्रश्छन्दःसरिरञ्छन्दःककुप्छन्दस्त्रिककुप्छन्दःकाव्यञ्छन्दोऽअङ्कु

पञ्छन्दो॒क्षरं॑पाङ्क्ति॒श्छन्दं॑÷प॒दपा॑ङ्क्ति॒श्छन्दो॑व्विष्टा॒रपा॑ङ्क्ति॒श्छन्दं॑÷क्षु॒रो
ब्भ्रज॒श्छन्दं॑ऽआ॒च्छच्छन्दं॑÷प्प्र॒च्छच्छन्दं॑÷ ॥ ४ ॥ आ॒च्छच्छन्दं॑÷
प्प्र॒च्छच्छन्दं॑÷ । सं॒य्यच्छन्दो॑व्वि॒यच्छन्दो॑बृ॒हच्छन्दो॑रथन्त॒रञ्छ
न्दो॑निका॒यश्छन्दो॑व्विव॒धश्छन्दो॒गिर॒श्छन्दो॒ब्भ्रज॒श्छन्दं॑÷स॒ꣳस्तु॒
प्प्छन्दो॑नु॒ष्टु॒प्प्छन्द॒ऽए॒व॒श्छन्दो॒व्वरि॑व॒श्छन्दो॒व्वय॒श्छन्दो॑व्वय॒स्कृच्छ
न्दो॒व्विष्प॑र्द्धा॒श्छन्दो॑व्विशा॒लञ्छन्द॒श्छ॒दिश्छन्दो॑दू॒रोह॒णञ्छन्दं॑स्त॒
न्द्र॒ञ्छन्दो॑ऽअङ्का॒ङ्कञ्छन्दं॑÷ ॥ ५ ॥ [ ५ ] र॒श्मिनां॑स॒त्त्यायं॑ । स॒त्त्य

ञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्वान्वित्यादिवादिवञ्जिन्वसन्धि
नान्तरिक्षेणान्तरिक्षञ्जिन्वप्प्रतिधिनापृथिव्यापृथिवीञ्जिन्वव्विष्टम्भे
नव्वृष्ट्याव्वृष्टिञ्जिन्वप्प्रवयाह्नाहर्ज्जिन्वानुयारात्र्यारात्रीञ्जिन्वोशि
जाव्वसुब्भ्योव्वसूञ्जिन्वप्प्रकेतेनादित्त्येब्भ्यऽआदित्त्याञ्जिन्वतन्तु
नारायः ॥६॥ तन्तुनारायः ॥ तन्तुनारायस्प्पोषेणरायस्प्पोषञ्जिन्व
सꣳसर्प्पेणश्श्रुतायश्श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्ज्जिन्वोत्तमेनतनू
भिस्तनूर्ज्जिन्ववयोधसाधीतेनाधीतञ्जिन्वाभिजितातेजसातेजोजि

न्व॒ ॥७॥ प्र॒ति॒पद॑सि । प्प्र॒ति॒पदे॑त्त्वानु॒पद॑स्यनु॒पदे॑त्त्वास॒म्पद॑सिस॒म्पदे॑
त्त्वा॒तेजो॑सि॒तेज॑सेत्त्वात्त्रि॒वृद॑सि॥८॥त्त्रि॒वृद॑सि।त्त्रि॒वृते॑त्त्वाप्प्र॒वृद॑सिप्प्र॒
वृते॑त्त्वाव्वि॒वृद॑सिवि॒वृते॑त्त्वास॒वृद॑सिस॒वृते॑त्त्वाक्क्र॒मो॑स्याक्क्र॒माय॑त्त्वासङ्क्र॒
मो॑सिसङ्क्र॒माय॑त्त्वोत्क्र॒मो॑स्युत्क्र॒माय॒त्त्वोत्क्रा॑न्तिर॒स्युत्क्रा॑न्त्यै॒त्त्वाधि॑
पतिनो॒र्ज्जो॑र्ज्जञ्जिन्व ॥ ९ ॥ [ ४ ] राज्ञ्य॑सि ॥ राज्ञ्य॑सि॒प्प्रा
ची॒दिग्ग्वस॑वस्ते॒दे॒वाऽअधि॑पतयो॒ग्निर्हे॑ती॒नाम्प्र॑तिध॒र्त्ता त्रि॒वृत्त्वा॒स्तो
म॑÷पृथि॒व्याꣳश्र॑युत्त्वाज्ज्य॑मु॒क्थम॒व्यथा॑यैस्त॒भ्नातु॑रथन्त॒रꣳसाम॒

प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्ष॒ऽऋष॑यस्त्वाप्प्रथम॒जादे॒वेषु॑दि॒वोमात्र॑याव्वरि॒
म्म्णाप्प्र॑थन्तुव्विध॒र्त्ता॑चा॒यमधि॑पतिश्च॒तेत्त्वा॒सर्व्वे॑संव्विदा॒नानाक॑स्यपृ॒
ष्ठेस्व॒र्ग्गे॑लो॒केयज॑मानञ्चसादयन्तु ॥ १० ॥ व्वि॒राड॑सि ॥ व्वि॒राड॑
सि॒दक्षि॑णा॒दिग्ग्रु॒द्द्रास्ते॑दे॒वाऽआधि॑पतय॒ऽइन्द्द्रो॑हेती॒नाम्प्र॑तिध॒र्त्ता॑पञ्च
द॒शस्त्वा॒स्तोम॑ः पृथि॒व्याꣳश्र॑यतुप्प्रऽउ॑गमु॒क्थमव्य॑थायैस्तभ्नातु॒
बृ॒हत्त्साम॒प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्ष॒ऽऋष॑यस्त्वाप्प्रथम॒जादे॒वेषु॑दि॒वोमा
त्र॑याव्वरि॒म्म्णाप्प्र॑थन्तुव्विध॒र्त्ता॑चा॒यमधि॑पतिश्च॒तेत्त्वा॒सर्व्वे॑संव्विदा॒ना

नाक॑स्यपृ॒ष्ठेस्व॒र्ग्गे॑लो॒केयज॑मानञ्चसादयन्तु ॥ ११ ॥ स॒म्म्राड॑सि ।
प्प्र॒तीची॒दिगा॑दि॒त्यास्ते॑दे॒वाऽअधि॑पतयो॒व्वरु॑णोहेती॒नाम्प्प्र॑तिध॒र्त्तास॑
प्त॒द॒शस्त्वा॒स्तोम॑÷पृथि॒व्याꣳश्र॑यतुमरु॒त्त्वती॑यमु॒क्थमव्व्य॑थायैस्त
भ्नातु॒व्वैरू॒पꣳसाम॒प्प्रति॑ष्ठित्याऽअ॒न्तरि॑क्ष॒ऽऋष॑यस्त्वाप्प्रथम॒जादे॒
वे॒षु॑दि॒वोमा॒त्रं॑या॒व्वरि॒म्म्णाप्प्र॑थन्तु॒व्विध॒र्त्ताचा॒यमधि॑पतिश्च॒तेत्त्वा॒सर्व्वे॑
सं॑व्विदा॒नानाक॑स्यपृ॒ष्ठेस्व॒र्ग्गे॑लो॒केयज॑मानञ्चसादयन्तु ॥ १२ ॥ स्व॒
राड॑सि ॥ स्व॒राड॒स्युदी॑ची॒दिङ्म॒रुत॑स्ते॒दे॒वाऽअधि॑पत॒यꣳसोमो॑हे॒तीना

म्प्रंतिधर्त्तैकंविꣳशस्त्वास्तोमं÷पृथिव्याꣳश्रंयतुनिष्कैंवल्यमुक्त्थम
व्व्यंथायैस्तभ्नातुव्वैराजꣳसामप्प्रंतिंष्ठित्याऽअन्तरिंक्षऽऋषंयस्त्वा
प्प्रथमजादेवेषुंदिवोमात्त्रंयाव्वरिम्म्णाप्प्रंथन्तुविधर्त्ताचायमधिंपति
श्चतेत्त्वासर्व्वेंसंव्विदानानाकंस्यपृष्ठेस्वर्ग्गेंलोकेयजंमानञ्चसादयन्तु
॥ १३ ॥ अधिंपत्न्यसि । बृहतीदिग्विश्वेंतेदेवाऽअधिंपतयोबृहस्प
तिर्हेतीनाम्प्रंतिधर्त्तात्त्रिंणवत्त्रयस्त्रिꣳशौत्त्वास्तोमौपृथिव्याꣳश्रंयतां
वैश्वदेवाग्निमारुतेऽउक्त्थेऽअव्यंथायैस्तभ्नीताꣳशाक्वररैवतेसामंनी

प्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयावरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ॥ १४ ॥ [५] अयम्पुरः ॥ अयम्पुरोहरिकेशःसूर्य्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेनानीग्ग्रामण्यौ ॥ पुञ्जिकस्स्थलाचक्रतुस्स्थलाचाप्प्सरसौदङ्क्ष्णवःपशवोहेतिःपौरुषेयोव्वधःप्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥१५॥ अयन्दक्षिणा। व्विश्वकर्म्मात

स्यरथस्वनश्चरथेचित्रश्चसेनानीग्ग्रामण्ण्यौ ॥ मेनकाचसहजन्याचा
प्प्सरसौयातुधानाहेतीरक्षाꣳसिप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोव
न्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः॥१६॥
अयम्पश्चात्॥अयम्पश्चाद्विश्वव्यचास्तस्यरथप्प्रोतश्चासमरथश्चसेना
नीग्ग्रामण्ण्यौ ॥ प्रम्म्लोचन्तीचानुम्म्लोचन्तीचाप्प्सरसौव्याग्घ्राहे
तिःसर्प्पाःप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्वि
ष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ १७ ॥ अयमुत्तरात् ॥

अयमुत्तरात्संयद्द्वसुस्तस्यताक्ष्र्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौ ॥
विश्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्तेब्भ्योनमोऽअ
स्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेद्
ध्ध्मः ॥ १८ ॥ अयमुपरि ॥ अयमुपर्य्यर्व्वाग्ग्वसुस्तस्यसेनजिच्च
सुषेणश्चसेनानीग्ग्रामण्यौ ॥ उर्व्वशीचपूर्व्वचित्तिश्चाप्प्सरसाववस्फू
र्ज्जन्हेतिर्व्विद्युत्प्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय
न्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेद्ध्मः ॥ १९ ॥ [ ५ ] अ

ग्निर्म्मू॒र्द्धा । दि॒वःक॒कुत्पति॑÷पृथि॒व्याऽअ॒यम् ॥ अ॒पाꣳरेता॑ꣳसि
जिन्न्व॑ति ॥ २० ॥ अ॒यम॒ग्निः । स॑ह॒स्रिणो॒वाज॑स्यश॒तिन॒स्पति॑÷ ॥
मू॒र्द्धाक॒वीर॑यी॒णाम् ॥ २१ ॥ त्वाम॑ग्ने ॥ त्वाम॑ग्ने॒पुष्क॑रा॒दद्ध्यथ॑र्वा॒
निर॑मन्थत ॥ मू॒र्द्ध्नो॑विश्व॑स्यवा॒घत॑÷ ॥ २२ ॥ भुवो॑य॒ज्ञस्य॑ ॥ भुवो॑य॒
ज्ञस्य॒रज॑सश्चने॒तायत्रा॑नि॒युद्भिः॒सच॑सेशि॒वाभि॑÷ ॥ दि॒विमू॒र्द्धान॑न्द
धिषे॒स्व॒र्षाञ्जि॒ह्वाम॑ग्नेचकृषेहव्य॒वाह॑म् ॥ २३ ॥ अबो॑ध्य॒ग्निः । स॒मि
धा॒जना॑ना॒म्प्रति॑धे॒नुमि॑वाय॒तीमु॒षास॑म् ॥ य॒ह्वाऽइ॑व॒प्प्रव॒यामु॒ज्जि

होनांᳵप्रभानवंःसिस्रतेनाकमच्छं ॥ २४ ॥ अवोचामकवये ॥
अवोचामकवयेमेध्यांयवचोवन्दारुंवृषभायवृष्णे ॥ गविष्ठिरोनमं
सास्तोमंमग्नौदिवीवरुक्ममुरुव्यञ्चंमश्रेत् ॥ २५ ॥ अयमिह । प्रंथ
मोधांयिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यंः ॥ यमप्नवानोभृगं
वोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविंशे ॥ २६ ॥ जनंस्यगोपाः ॥ जनं
स्यगोपाऽअंजनिष्टजागृविरग्निःसुदक्षंःसुवितायनव्यंसे ॥ घृतप्रं
तीकोबृहतादिविस्पृशांद्युमद्विभांतिभरतेभ्यंःशुचिंः ॥ २७ ॥

त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्श्रियाणंव्व
नेवने ॥ सजायसेमथ्यमानꣳसहोमहत्त्वामाहुꣳसहसस्प्पुत्रमङ्गिरꣳ
॥२८॥ सखायꣳसम् ॥ सखायꣳसंव्व÷सम्यञ्चमिषꣳस्तोमञ्चाग्नये ॥ व्व
र्षिष्ठायक्षितीनामूर्ज्जोनप्प्त्रेसहस्वते ॥२९॥ सꣳसमित् ॥ सꣳसमिद्यु
वसेव्वृषन्नग्नेविश्श्वान्यर्यऽआ ॥ इडस्प्पदेसमिध्यसेसनोव्वसून्याभर
॥३०॥त्वाञ्चित्रश्श्रवस्तम॥ त्वाञ्चित्रश्श्रवस्तमहवन्तेव्विक्षुजन्तव÷॥
शोचिष्केशम्पुरुप्प्रियाग्नेहव्व्यायव्वोढवे ॥ ३१ ॥ एनाव÷॥एनावोऽअ

ग्निन्नम॑सो॒ज्जौ॑नपा॑त॒माहु॑वे ॥ प्रि॒यञ्चेति॑ष्ठमर॒तिꣳस्व॑ध्व॒रंव्विश्व॑स्यदू॒तम॒
मृत॑म् ॥ ३२ ॥ व्विश्व॑स्यदू॒तम् ॥ व्विश्व॑स्यदू॒तम॒मृत॒ंव्विश्व॑स्यदू॒तम॒मृत॑म् ॥
सयो॑जतेऽअरु॒षाव्वि॒श्वभो॑जसा॒सदु॑द्रव॒त्त्स्वाहुतꣳ ॥ ३३ ॥ सदु॑द्रवत् ॥
सदु॑द्रव॒त्त्स्वाहु॒तꣳसदु॑द्रव॒त्त्स्वाहुतꣳ ॥ सु॒ब्रह्मा॑य॒ज्ञःसु॒श॒मीव्वसू॑नान्दे॒
वꣳराधो॒जना॑नाम् ॥ ३४ ॥ अग्ने॒व्वाज॑स्य ॥ अग्ने॒व्वाज॑स्य॒गोम॑त॒ऽई
शा॑नꣳसहसोयहो ॥ अ॒स्मेधे॑हिजातवे॒दोमहि॒श्रव॑ः ॥ ३५ ॥ सऽई॑
धा॒नः ॥ सऽई॑धानो॒व्वसु॑ष्क॒विर॒ग्निरी॒डेन्यो॑गि॒रा ॥ रे॒वद॒स्मभ्य॑म्पु

व्वणीकदीदिहि ॥ ३६ ॥ क्षपोराजन् ॥ क्षपोराजन्नुतत्क्मनाग्नेव्वस्तोँरुतोषसं÷ ॥ सतिंग्ग्मजम्भरक्षसोदहप्प्रतिं ॥ ३७ ॥ भद्रोनं÷ ॥ भद्रोनौऽअग्निराहुंतोभद्रारातिःसुभगभद्रोऽअंद्ध्वरः ॥ भद्राऽउतप्प्रशंस्तयः ॥ ३८ ॥ भद्राऽउत । प्प्रशंस्तयोभद्रम्मनं÷कृणुष्ष्वव्वृत्रतूय्यैं ॥ येनासमत्त्सुंसासहं÷ ॥ ३९ ॥ येनासमत्त्सु । सासहोवंस्थिरातंनुहि भूरिशर्द्धंताम् ॥ व्वनेमांतेऽअभिष्टिंभिः ॥ ४० ॥ अग्निन्तम् ॥ अग्निन्तम्मंन्न्येयोव्वसुरस्तंय्यंय्यन्तिधेनवं÷ ॥ अस्तमर्व्वन्तऽआशवोस्तान्नि

त्वांसोव्वाजिनऽइषꣳस्तोतृब्भ्यऽआभर ॥ ४१ ॥ सोऽअग्निः ॥ सोऽ
अग्निर्य्योव्वसुर्ग्गृणेसंय्यमायन्तिधेनवः ॥ समर्व्वन्तोरघुद्द्रुवःसꣳ
सुजातासःसूरयऽइषꣳस्तोतृब्भ्यऽआभर ॥ ४२ ॥ उभेसुश्चन्द्र ।
सर्प्पिषोदर्व्वीश्श्रीणीषऽआसनि ॥ उतोनऽउत्पुपूर्य्याऽउक्त्थेषुशवस
स्पतऽइषꣳस्तोतृब्भ्यऽआभर ॥ ४३ ॥ अग्नेतम् ॥ अग्नेतमद्याश्श्व
न्नस्तोमैःक्रतुन्नभद्रꣳहृदिस्पृशम् ॥ ऋद्ध्यामातऽओहैः ॥ ४४ ॥ अ
धाह्यग्नेक्क्रतोर्ब्भद्रस्यदक्षस्यसाधोः ॥ रथीऽर्ऋतस्यबृह

तोबभृथं ॥ ४५ ॥ एभिर्न्नैंः ॥ एभिर्न्नौंऽअर्क्कैर्भवांनोऽअर्व्वाङ्क्स्वर्ण्णं
ज्ज्योतिंः ॥ अग्नेव्विश्वेभिꣳसुमनाऽअनीकैꣳ ॥ ४६ ॥ अग्निꣳहो
तारम् ॥ अग्निꣳहोतारम्मन्न्येदास्वंन्तंव्वसुंꣳसूनुꣳसहंसोजातवेदसं
व्विप्प्रन्नजातवेदसम् ॥ यऽऊर्द्ध्वयांस्वद्ध्वरोदेवोदेवाच्च्यांकृपा ॥ घृतस्य
व्विभ्राँष्ट्टिमनुंवष्ट्टिशोचिषाजुह्वांनस्यसर्प्पिषंः ॥ ४७ ॥ अग्नेत्त्वम् ॥
अग्नेत्त्वन्नोऽअन्तंमऽउतत्त्राताशिवोभंवावरूत्थ्यः ॥ वसुंरग्निर्व्वसुं
ꣳश्रवाऽअच्छांनाक्षिद्द्युमत्तंमꣳरयिन्दांः ॥ तन्त्वांशोचिष्ठदीदिवꣳसु

म्न्नाये॑न्नू॑नमीं॑महे॒सखि॑ब्भ्यः ॥ ४८ ॥ [ २९ ] येन॒ऽऋष॑यः ॥ येन॒ऽऋ
ष॑य॒स्तप॑सास॒त्रमा॒यन्निन्धाना॑ऽअ॒ग्निꣳस्व॑रा॒भर॑न्तः ॥ तस्मि॑न्न॒ह
न्निदं॑धे॒नाकें॑ऽअ॒ग्निंय्ँयम॒हु॒र्म्मनं॑वस्ती॒र्ण्णब॑र्हिषम् ॥ ४९ ॥ तम्पत्नी
भिः ॥ तम्पत्नी॑भि॒रनु॑गच्छेमदेवाः पु॒त्रैर्ब्भ्रा॑तृ॒भिरु॒तवा॒हिर॑ण्ण्यैः ॥
नाकं॑ङ्गृ॒ब्भ्णाना॒ः सु॑कृ॒तस्य॑लो॒केतृ॒तीये॑पृ॒ष्ठेऽअधि॑रोच॒नेदि॒वः ॥ ५० ॥
आवा॒चः ॥ आवा॒चोमद्ध्यं॑मरु॒हद्भु॒रण्ण्यु॒रय॑म॒ग्निः स॒त्त्पति॒श्चेकि॑ता
नः ॥ पृष्ठेपृ॑थि॒व्व्यानिहि॑तो॒दवि॑द्युतदधस्प॒दङ्कृं॑णु॒तांय्ँयेपृ॑त॒न्न्य॑वः

॥ ५१ ॥ अ॒यम॒ग्निः ॥ अ॒यम॒ग्निर्व्वी॒रत॑मोव्व॒योधाः॑स॑ह॒स्रियो॑द्योत
ता॒मप्प्र॑युच्छन् ॥ वि॒ब्भ्राज॑मानःसरि॒रस्य॒मद्ध्य॒ऽउप॒प्प्रया॑हिदि॒व्व्या
नि॒धाम॑ ॥ ५२ ॥ स॒म्प्रच्य॑वद्ध्व॒मुप॑ । स॒प्प्रया॒ताग्ने॑प॒थोदे॑व॒याना॑
न्कृणुद्ध्वम् ॥ पुन॑ःकृ॒ण्वा॒नापि॒तरा॒युवा॑ना॒न्वाता॑ꣳसी॒त्त्वयि॒तन्तु॑मे॒
तम् ॥ ५३ ॥ उद्बु॑द्ध्यस्व ॥ उद्बु॑द्ध्यस्वाग्ने॒प्प्रति॑जागृहि॒त्त्वमि॑ष्टापू॒र्त्ते
सꣳसृ॑जेथाम॒यञ्च॑ ॥ अ॒स्मिन्त्स॒धस्थे॒ऽअद्ध्युत्त॑रस्मि॒न्विश्वे॑दे॒वाय
ज॑मानश्चसीदत ॥ ५४ ॥ येन॒व्वहा॑सि । स॒हस्र॒ꣳय्येना॑ग्ने॒सर्व्ववेद॒

सम् ॥ तेनेमंऽयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते ॥ अय
न्तेयोनिर्ऋत्त्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहा
थानोवर्द्धयारयिम् ॥ ५६ ॥ [ ८ ] तपश्च ॥ तपश्चतपस्यश्चशै
शिरावृतूऽअग्नेरन्तःश्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽ
ओषधयःकल्प्पन्तामग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः ॥ येऽअ
ग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ शैशिरावृतूऽअभिकल्प्प
मानाऽइन्द्रमिवदेवाऽअभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीद

तम् ॥ ५७ ॥ परमेष्ठीत्त्वा । सादयतुदिवस्पृष्ठेज्ज्योतिष्म्मतीम् ॥
व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानायव्विश्श्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्ते
धिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण । च्छिद्र
म्पृणाथोसीदद्ध्रुवात्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनावसी
षदन् ॥ ५९ ॥ ताऽअस्य ॥ ताऽअस्यसूददोहसःसोमꣳश्रीणन्तिपृश्न्न
यः ॥ जन्म्मन्देवानांव्विशस्त्रिष्ष्वारोचनेदिवः ॥ ६० ॥ इन्द्रंव्विश्श्वाः ॥
इन्द्रंव्विश्श्वाऽअवीवृधन्त्समुद्रव्व्यचसङ्गिरः ॥ रथीतमꣳरथीनांव्वाजा

नाꣳसत्त्पतिम्पतिम् ॥ ६१ ॥ प्रोथदश्वं÷ ॥ प्रोथदश्वोनयवंसेविष्ष्य
न्न्यदामहःसंव्वरणाद्व्यस्त्थात् ॥ आदस्यव्वातोऽअनुवातिशोचिरध
स्म्मतेव्व्रजनङ्कृष्णमस्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदनेसाद
याम्म्यवतश्छायायाꣳसमुद्द्रस्यहृदये ॥ रश्म्मीवतीम्भास्वतीमा
याद्याम्भास्यापृथिवीमोर्व्वन्तरिक्षम् ॥ ६३ ॥ परमेष्ठीत्त्वा । सादयतु
दिवस्पृष्ठेव्व्यचस्वतीम्प्रथस्वतीन्दिवंऽयच्छदिवन्दृꣳहदिवम्माहिꣳ
सीः ॥ व्विश्वस्म्मैप्प्राणायापानायव्व्यानायोदानायप्प्रतिष्ठायैच

रित्रांय ॥ सूर्य्यस्त्वाभिपांतुमह्याखुस्त्याच्छुर्द्दिषाशन्तंमेनतयां
देवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ ६४ ॥ सहस्त्रंस्यप्प्रमासिं । सहस्त्रंस्य
प्प्रतिमासिंसहस्त्रंस्योन्मासिंसाहस्त्रोंसिसहस्त्रांयत्त्वा ॥ ६५ ॥ [९]
इतिश्रीवाजसनेयसंहितायांपञ्चदशोऽध्यायः ॥१५॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ नमस्तेषोडश, हिरण्यबाहव,-ऽउष्णीषिणे,-
तक्षभ्यो,-ज्येष्ठायपंचकाः, स्रुत्यायचतस्रः, शंभवायैका, पार्य्यायपं
च, द्रापेऽअंधसोविꣳशति, नवषट्षष्टिः ॥ हरिः ॐ ॥ नमंस्ते ॥ नमंस्ते

[ॐ नमस्ते रुद्र मन्यवइति, अघोर ऋषिः, रुद्रो देवता गायत्री छन्दः सुपुत्र फलप्राप्ति कामः पाठेविनियोगः
॥१६॥

रुद्र म॒न्यव॑ऽउ॒तोत॒ऽइष॑वे॒नमः॑ ॥ बा॒हुभ्या॑मु॒तते॒नमः॑ ॥ १ ॥ याते॑ ।
रुद्र शि॒वात॒नूरघो॒रापा॑पकाशिनी॥ तया॑नस्त॒न्वा॒शन्त॑मया॒गिरि॑शन्ता॒
भिचा॑कशीहि ॥ २ ॥ यामि॒षु॑म् ॥ यामि॒षुङ्गि॑रिशन्त॒हस्ते॑बि॒भर्ष्य॑
स्तवे॑ ॥ शि॒वाङ्गि॑रित्र॒ताङ्कु॑रु॒माहि॑ꣳसी॒ःपुरु॑षञ्ज॒गत् ॥ ३ ॥ शि॒वेन॒
व्वच॑सा । त्त्वा॒गिरि॒शाच्छा॑व्वदामसि ॥ यथा॑न॒ःसर्व्व॒मिज्जग॑द॒यक्ष्मꣳ
सु॒मना॒ऽअस॑त् ॥ ४ ॥ अध्य॑वोचत् ॥ अध्य॑वोचदधिव॒क्ताप्प्र॑थ॒मोदै॒
व्यो॑भि॒षक् ॥ अहीँ॑श्च॒सर्वा॑ञ्ज॒म्भय॒न्त्सर्वा॑श्चयातु॒धा॒न्यो॒धरा॒ची॒ःप

रांसुव ॥ ५ ॥ असौयः ॥ असौयस्ताम्म्रोऽअंरुणऽउतबभ्रुःसुंम
ङ्गलंः ॥ येचैनꣳरुद्राऽअभितोंदिक्षुश्रिताःसंहस्रशोवैषाꣳहेडऽई
महे ॥६॥ असौयः ॥ असौयोंवसर्प्पतिनीलंग्ग्रीवोव्विलोंहितः ॥ उतैनं
ङ्गोपाऽअंदृश्श्रन्नदृंश्श्रन्नुदहार्य्यःसदृष्टोमृंडयातिनः ॥ ७ ॥ नमों
स्तु ॥ नमोंस्तुनीलंग्ग्रीवायसहस्राक्षायंमीढुषें ॥ अथोयेऽअंस्यसत्त्वां
नोहन्तेभ्भ्योंकरन्नमंः ॥ ८ ॥ प्रमुंञ्च ॥ प्रमुंञ्चधन्न्वंनस्त्वमुभयोरा
त्न्योंर्ज्ज्याम् ॥ याश्चंतेहस्तऽइषंवःपराताभंगवोव्वप ॥ ९ ॥ व्विज्ज्य

न्धनु÷। कपर्द्दिनोव्विशंल्ल्योबाणवाँ२॥ऽउत॥ अनेशन्नस्ययाऽइषंवऽ
आभुरंस्यनिषङ्गधिः ॥ १० ॥ यातें । हेतिम्मींढुष्टमहस्तेंबभूवंते
धनुं÷ ॥ तयास्म्मान्विश्श्वतस्त्वमंयक्ष्ममयापरिंभुज ॥ ११ ॥ परिंते ॥
परिंतेधन्न्वंनोहेतिरस्म्मान्वृंणक्तुविश्श्वतं÷ ॥ अथोयऽइंषुधिस्तवारे
ऽअस्म्मन्निधेंहितम् ॥ १२ ॥ अवतत्यधनुं÷ ॥ अवतत्यधनुष्ट्वꣳ
सहंस्राक्षशतेंषुधे ॥ निशीर्य्यंशल्ल्यानाम्मुखांशिवोनं÷सुमनांभव
॥ १३ ॥ नमंस्ते ॥ नमंस्तऽआयुंधायानांततायधृष्णवें ॥ उभा

ब्भ्या॑मु॒तते॒नमो॑बा॒हुब्भ्या॒न्तव॒धन्व॑ने ॥ १४ ॥ मानः॑ ॥ मानो॑
म॒हान्त॑मु॒तमानो॑ऽअर्ब्भ॒कम्मान॒ऽउक्षन्त॑मु॒तमान॑ऽउक्षि॒तम् ॥ मानो॑
व्वधीः॑पि॒तर॒म्मोतमा॒तर॒म्मानः॑प्रि॒यास्त॒न्वो॑रुद्ररीरिषः ॥ १५ ॥
मान॑स्तो॒के । तन॑ये॒मान॒ऽआयु॑षि॒मानो॒गोषु॒मानो॒ऽअश्वे॑षुरीरिषः ॥
मानो॑व्वी॒रान्रु॑द्रभा॒मिनो॑व्वधीर्ह॒विष्म॑न्तःस॒दमित्त्वा॑हवामहे ॥ १६ ॥
[ १६ ] शतम् ॥ ८०० ॥ नमो॒हिर॑ण्यबाहवे । सेना॒
न्ये॒दि॒शाञ्च॒पत॑ये॒नमो॒नमो॑व्वृ॒क्षेब्भ्यो॒हरि॑केशेब्भ्यःपशू॒नाम्पत॑ये॒नमो॒

नमः॑श॒ष्पिञ्ज॑राय॒त्त्विषी॑मतेप॒थी॒नाम्पत॑ये॒नमो॒नमो॒हरि॑केशायो
पवी॒तिने॑पु॒ष्टाना॒म्पत॑ये॒नमो॒नमो॑बभ्लु॒शाय॑ ॥ १७ ॥ नमो॑बभ्लु
शाय॑ । व्या॒धिने॒न्नाना॒म्पत॑ये॒नमो॒नमो॑भ॒वस्य॑हे॒त्त्यैजग॑ता॒म्पत॑
ये॒नमो॒नमो॑रु॒द्राया॑तता॒यिने॒क्षेत्त्रा॑णा॒म्पत॑ये॒नमो॒नमः॑सू॒ताया॒ह॑न्त्यै॒
व्वना॑ना॒म्पत॑ये॒नमो॒नमो॒रोहि॑ताय ॥ १८ ॥ नमो॒रोहि॑ताय ।
स्त्थ॒पत॑ये॒व्वृ॒क्षाणा॒म्पत॑ये॒नमो॒नमो॑भु॒वन्तये॑व्वारिवस्कृ॒तायौष॑धीना॒म्प
त॑ये॒नमो॒नमो॑म॒न्त्रिणे॑व्वाणि॒जाय॒कक्षा॑णा॒म्पत॑ये॒नमो॒नमः॑ऽउ॒च्चैग्घो॑षा

याक्र॒न्दय॑तेपत्ती॒नाम्पत॑ये॒नमो॒नम॑ःकृत्स्नाय॒तया॑ ॥ १९ ॥ नम॑ः
कृत्स्नाय॒तया॑ ॥ नम॑ःकृत्स्नाय॒तया॒धाव॑ते॒सत्त्व॑ना॒म्पत॑ये॒नमो॒नम॒ꣳस
ह॑मानायनिव्या॒धिन॑ऽआव्या॒धिनी॑ना॒म्पत॑ये॒नमो॒नमो॑निष॒ङ्गिणे॑ककु॒
भाय॑स्ते॒नाना॒म्पत॑ये॒नमो॒नमो॑निचे॒रवे॑परि॒चराया॒र॑ण्यना॒म्पत॑ये॒न
मो॒नमो॒वञ्च॑ते ॥ २० ॥ नमो॒वञ्च॑ते । परि॒वञ्च॑तेस्तायू॒नाम्पत॑ये॒नमो॒
नमो॑निष॒ङ्गिण॑ऽइषुधि॒मते॒तस्क॑राणा॒म्पत॑ये॒नमो॒नम॑ःसृका॒यिभ्यो॒
जिघा॑ꣳसद्भ्योमुष्ण॒ताम्पत॑ये॒नमो॒नमो॑ऽसिमद्भ्यो॒नक्त॒ञ्चर॑द्भ्योविकृ॒

न्ताना॒म्पत॑ये॒नम॑ः ॥ २१ ॥ [५] नम॑ऽउष्णी॒षिणे॑ । गि॒रि॒च॒राय॑कु
लु॒ञ्चाना॒म्पत॑ये॒नमो॒नम॑ऽइषु॒मद्भ्यो॑धन्वा॒यिभ्य॑श्च वो॒नमो॒नम॑ऽआत
न्वा॒नेभ्य॑ःप्रति॒दधा॑नेभ्यश्च वो॒नमो॒नम॑ऽआ॒यच्छ॒द्भ्योस्य॑द्भ्यश्च वो॒न
मो॒नमो॑विसृ॒जद्भ्य॑ः ॥ २२ ॥ नमो॑विसृ॒जद्भ्य॑ः ॥ नमो॑विसृ॒जद्भ्यो॒वि
ध्य॑द्भ्यश्च वो॒नमो॒नम॑ःस्व॒पद्भ्यो॒जाग्र॑द्भ्यश्च वो॒नमो॒नम॒ꣳशया॑नेभ्य॒ऽआ
सी॑नेभ्यश्च वो॒नमो॒नम॒स्तिष्ठ॑द्भ्यो॒धाव॑द्भ्यश्च वो॒नमो॒नम॑ःस॒भाभ्य॑ः
॥ २३ ॥ नम॑ःस॒भाभ्य॑ः । स॒भाप॑तिभ्यश्च वो॒नमो॒नमोश्वे॒भ्योश्व॑

पतिब्भ्यश्चवोनमोनमःऽआव्याधिनीब्भ्योविविध्यन्तीब्भ्यश्चवोनमो
नमऽउगणाब्भ्यस्तृꣳहतीब्भ्यश्चवोनमोनमोगणेब्भ्यः ॥ २४ ॥
नमोगणेब्भ्यो । गणपतिब्भ्यश्चवोनमोनमोव्रातेब्भ्योव्रातपतिब्भ्य
श्चवोनमोनमोगृत्सेब्भ्योगृत्सपतिब्भ्यश्चवोनमोनमोविरूपेब्भ्यो
विश्वरूपेब्भ्यश्चवोनमोनमꣳसेनाब्भ्यꣳ ॥ २५ ॥ नमꣳसेनाब्भ्यꣳ ।
सेनानिब्भ्यश्चवोनमोनमो रथिब्भ्योऽअरथेब्भ्यश्चवोनमोनमः
क्षत्तृब्भ्यःसङ्ग्रहीतृब्भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेब्भ्यश्चवोन

मः ॥ २६ ॥ [ ५ ] नमस्तक्षभ्यः ॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्चवोनमोनमःश्वभ्यः॥२७॥नमःश्वभ्यः॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमःशर्व्वायचपशुपतयेचनमोनीलग्रीवायचशितिकण्ठायचनमःकपर्द्दिने॥ २८॥ नमःकपर्द्दिने। चव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेचनमोगिरिशयायचशि

पिवि॒ष्टायंच॒नमो॑मी॒ढुष्टंमाय॒चेषुंमते॒च॒नमो॑ह्र॒स्वायं ॥ २९ ॥ नमो॑ह्र॒स्वायं । चव्वाम॒नायंच॒नमो॑बृह॒तेच॒व्वर्षी॑यसेच॒नमो॑वृद्धायंचस॒वृधेंच॒नमोग्र्यांयचप्प्रथ॒मायंच॒नमंऽआ॒शवें ॥ ३० ॥ नमंऽआ॒शवें । चाजि॒रायंच॒नम॒ःशीग्घ्यांयच॒शीब्भ्यांयच॒नम॒ऽऊर्म्म्यी॑यचावस्व॒न्न्या॒यच॒नमो॑नादे॒यायंच॒द्वीप्प्यांयच ॥ ३१ ॥ [ ५ ] नमो॑ज्ज्ये॒ष्ठायं । चकनि॒ष्ठायंच॒नमंःपूर्व्व॒जायंचापर॒जायंच॒नमो॑मद्ध्य॒मायंचापग॒ल्ब्भायंच॒नमो॑जघ॒न्न्या॒यचबु॒ध्न्या॒यच॒नम॒ःसोब्भ्यांय ॥ ३२ ॥ नम॒ःसोब्भ्यां

य । चप्प्रतिसर्र्यायचनमोयाम्म्यायचक्षेम्म्यायचनमःश्लोक्क्या
यचावसान्न्यायचनमऽउर्व्वर्र्यायचखल्ल्यायचनमोव्वन्न्याय ॥ ३३ ॥
नमोव्वन्न्याय । चकक्ष्यायचनमःश्श्रवायचप्प्रतिश्श्रवायचनमऽ
आशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्म्मिने
॥ ३४ ॥ नमोबिल्म्मिने । चकवचिनेचनमोव्वर्म्मिणेचव्वरूथिनेच
नमःश्श्रुतायचश्श्रुतसेनायचनमोदुन्दुभ्भ्यायचाहनन्न्यायचनमो
धृष्णवे ॥ ३५ ॥ नमोधृष्णवे । चप्प्रमृशायचनमोनिषङ्गिणेचेषु

धि॒मते॑च॒नम॑स्ती॒क्ष्णेष॑वेचायु॒धिने॑च॒नम॑ःस्वायु॒धाय॑चसु॒धन्व॑नेच
॥ ३६ ॥ [५] नम॑ःस्रु॒त्या॑य। च॒पथ्या॑यच॒नम॑ःका॒ट्या॑यच॒नीप्या॑
यच॒नम॑ःकु॒ल्या॑यचसर॒स्या॑यच॒नमो॑नादे॒या॑यचव्वैश॒न्ताय॑च॒नम॑ःकू
प्या॑य ॥ ३७ ॥ नम॑ःकू॒प्या॑य। चाव॒ट्या॑यच॒नमो॒व्वीध्र्या॑यचात॒
प्या॑यच॒नमो॒मेघ्या॑यचाव्विद्यु॒त्या॑यच॒नमो॒व्वर्ष्या॑यचाव॒र्ष्याय॑च॒न
मो॒व्वात्या॑य ॥ ३८ ॥ नमो॒व्वात्या॑य। च॒रेष्म्या॑यच॒नमो॑व्वास्त॒व्या
यचव्वास्तु॒पाय॑च॒नम॒ःसोमा॑यचरु॒द्राय॑च॒नम॑स्ता॒म्राय॑चारु॒णाय॑च॒न

म॑ःश॒ङ्गवे॑ ॥ ३९ ॥ नम॑ःश॒ङ्गवे॑ । चपशु॒पत॑येच॒नम॑ऽउ॒ग्ग्राय॑चभी॒
माय॑च॒नमो॑ग्ग्रेव॒धाय॑चदूरेव॒धाय॑च॒नमो॑ह॒न्त्रेच॒हनी॑यसेच॒नमो॑वृ॒क्षे
भ्यो॒ह॒रि॑केशेभ्यो॒नम॑स्ता॒राय॑ ॥ ४० ॥ [ ४ ] नम॑ःशम्भ॒वाय॑ ।
चमयोभ॒वाय॑च॒नम॑ःशङ्क॒राय॑चमयस्क॒राय॑च॒नम॑ःशि॒वाय॑चशि॒व
त॑रायच ॥ ४१ ॥ [ १ ] नम॒ःपार्य्या॑य । चावा॒र्य्या᳖यच॒नम॑ःप्प्र॒तर॑
णायचो॒त्तर॑णायच॒नम॒स्तीर्त्थ्या॑यच॒कूल्ल्या॑यच॒नम॒ःशष्प्या॑यच॒फे
न्या॑यच॒नम॑ःसिक॒त्त्या᳖य ॥ ४२ ॥ नम॑ःसिक॒त्त्या᳖य । चप्रवा॒ह्या᳖

यच॒नमः॑किꣳशि॒लाय॑चक्ष॒यणा॑यच॒नमः॑कप॒र्दिने॑चपुल॒स्तये॑च॒नम॑
ऽइरि॒ण्या॑यचप्रप॒थ्या॑यच॒नमो॒व्रज्या॑य ॥ ४३ ॥ नमो॒व्रज्या॑य ।
चगो॒ष्ठ्या॑यच॒नम॒स्तल्प्या॑यच॒गेह्या॑यच॒नमो॑हृद॒य्या॑यचनिवे॒ष्प्या॑
यच॒नम॒ःकाट्या॑यचगह्वरे॒ष्ठाय॑च॒नम॒ःशुष्क्या॑य ॥ ४४ ॥ नम॒ः
शुष्क्या॑य । चहरि॒त्या॑यच॒नमः॑पाꣳस॒व्या॑यचरज॒स्या॑यच॒नमो॒लो
प्प्या॑यचोल॒प्प्या॑यच॒नम॒ऽऊर्व्या॑यच॒सूर्व्या॑यच॒नमः॑प॒र्ण्णा॑य ॥
॥ ४५ ॥ नमः॑प॒र्ण्णा॑य । चपर्ण्णश॒दाय॑च॒नम॑ऽउद्गु॒रमा॑णायचाभि

घ्नतेचनमंऽआखिदुतेचप्प्रखिदुतेचनमंऽइषुकृद्भ्योंधनुष्कृद्भ्यंश्चवोन
मोनमोंवꣳकिरिकेब्भ्योंदेवानाꣳहृदयेब्भ्योनमोंव्विचिन्वत्त्केब्भ्योन
मोंव्विक्षिणत्त्केब्भ्योनमंऽआनिर्हतेब्भ्यंः ॥ ४६ ॥ [ ५ ] द्रापेऽअ
न्धसꣳ ॥ द्रापेऽअन्धसस्प्पतेदरिद्रनीलंलोहित ॥ आसाम्प्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचंनꣳकिञ्चनामंमत् ॥ ४७ ॥ इमारुद्राय ।
तवसैकपर्द्दिनेंक्षयद्वीरायप्प्रभंरामहेमतीः ॥ यथाशमसद्द्विपदेच
तुंष्पदेव्विश्श्वंम्पुष्टङ्ग्रामेंऽअस्स्मिन्ननातुरम् ॥ ४८ ॥ यातें । रुद्र

शि̱वात̱नूःशि̱वाव्वि̱श्श्वाहा॑भेष̱जी ॥ शि̱वारु̱तस्य॑भेष̱जीतया॑नोमृड
जी̱वसे॑ ॥ ४९ ॥ परि॑नꣳ ॥ परि॑नोरु̱द्रस्य॑हे̱तिर्व्वृ॑णक्तु̱परि॑त्त्वे̱षस्य॑दु̱र्म्म̱
ति॑रघा̱योः ॥ अव॑स्थि̱राम̱घव॑द्भ्यस्तनु̱ष्ष्व̱मीढ्व॑स्तो̱काय̱तन॑यायमृड
॥ ५० ॥ मीढु॑ष्टम̱शिव॑तम । शि̱वोनः॑सु̱मना॑भव ॥ प̱र̱मेव्वृ̱क्षऽआयु॑
धन्नि̱धाय̱कृत्तिं̱व्वसा॑न̱ऽआच॑र̱पिना॑क̱म्बिभ्र̱दाग॑हि ॥ ५१ ॥ व्विकि॑
रि̱द्र̱व्विलो॑हित ॥ व्विकि॑रिद्र̱व्विलो॑हित̱नम॑स्तेऽअस्तुभगवꣳ ॥ यास्ते॑
स̱हस्र॑ꣳहे̱तयो̱न्यम̱स्म्मान्नि॑वपन्तु̱ताः ॥५२॥ स̱हस्रा॑णिसहस्र̱शः ॥

सहस्रांणिसहस्रशोबाह्वोस्तवंहेतयः÷ ॥ तासामीशांनोभगवᳲपरा
चीनामुखांकृधि ॥ ५३ ॥ असंङ्ख्यातासहस्राणि ॥ असंङ्ख्यातास
हस्रांणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषांꣳसहस्रयोजनेवधन्वांनित
न्मसि ॥ ५४ ॥ अस्म्मिन्न्मंहति । अस्म्मिन्न्मंहत्त्यर्ण्णवेन्तरिंक्षेभवा
ऽअधिं ॥ तेषांꣳसहस्रयोजनेवधन्वांनितन्मसि ॥ ५५ ॥ नीलंग्ग्री
वाᳲशितिकण्ठां÷॥ नीलंग्ग्रीवाᳲशितिकण्ठादिवंꣳरुद्राऽउपांश्रिताᳲ ॥
तेषांꣳसहस्रयोजनेवधन्वांनितन्मसि ॥ ५६ ॥ नीलंग्ग्रीवाᳲशिति

कण्ठाः॑ । श॒र्वाऽअ॒धःक्ष॑माच॒राः ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥५७॥ येवृ॒क्षेषु॑ । श॒ष्पिञ्ज॑रा॒नील॑ग्रीवा॒विलो॑हिताः ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ५८ ॥ येभू॒ताना॑म् ॥ येभू॒ताना॒मधि॑पतयोवि॒शि॒खासः॑कप॒र्दिनः॑ ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ५९ ॥ येप॒थाम् ॥ येप॒थाम्प॑थि॒रक्ष॑यऽऐलबृ॒दाऽआ॑यु॒र्युधः॑ ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६० ॥ येती॒र्थानि॑ । प्र॒चर॑न्तिसृ॒काह॑स्तानिष॒ङ्गिणः॑ ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑

नितन्मसि ॥ ६१ ॥ येन्ने॑षु । व्वि॒विद्ध्य॑न्ति॒पात्त्रे॑षु॒पिब॑तो॒जना॑न् ॥ तेषा॑ꣳ
सहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६२ ॥ यऽए॒ताव॑न्तः ॥ यऽए॒ताव॑
न्तश्च॒भूया॑ꣳसश्च॒दि॒शो॑रु॒द्द्राव्वि॑तस्त्थि॒रे ॥ तेषा॑ꣳसहस्रयोज॒नेव॒ध
न्वा॑नितन्मसि ॥ ६३ ॥ नमो॑स्तु । रु॒द्द्रेब्भ्यो॒येदि॒वियेषा॑व्व॒र्षमिष॑वः ॥
तेब्भ्यो॒दश॒प्प्राची॒र्दश॑दक्षि॒णादश॑प्प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्द्ध्वाः ॥ ते
ब्भ्यो॒नमो॑ऽअस्तुतेनो॑वन्तुतेनो॑मृडयन्तुतेयन्द्द्वि॒ष्म्मोयश्च॑नो॒द्द्वेष्टित
मे॑षा॒ञ्जम्भे॑दद्ध्मः ॥ ६४ ॥ नमो॑स्तु । रु॒द्द्रेब्भ्यो॒ये॒न्तरि॑क्षे॒येषा॑व्वात॒ऽइष॑

वः ॥ तेब्भ्योदशप्प्राचीर्दशंदक्षिणादशंप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥
तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टि
तमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तु । रुद्द्रेब्भ्योयेपृथिव्व्यांय्येषामन्न
मिषवः ॥ तेब्भ्योदशप्प्राचीर्दशंदक्षिणादशंप्प्रतीचीर्दशोदीचीर्द
शोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय
श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ [ २० ] इतिश्रीवाजसनेय
संहितायांषोडशोऽध्यायः ॥१६॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सू

त्रम् ॥ अश्मन्नूर्ज्जँदश,नमस्तेपंचा,ग्निस्तिग्मेननव, चक्षुषःपिताष्टा, वा
शुःशिशानःसप्तदशो, देनं,-क्रमध्वमग्निनापंचदशकौ, शुक्रज्योतिश्च
सप्ते, मꣳस्तनंत्रयोदश, नवैकोनशतं ॥ हरिः ॐ ॥ अश्म्मन्नूर्ज्जम् ॥ अ
श्म्मन्नूर्ज्जम्पर्व्वतेशिश्रियाणामद्भ्यऽओषधीभ्योव्वनस्प्पतिभ्योऽअ
धिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतꣳसꣳरराणाऽअश्म्मँस्ते
क्षुन्मयितऽऊर्ग्ग्यन्द्विष्म्मस्तन्तेशुगृच्छतु ॥१॥ इमामे।ऽअग्नऽइष्टं
काधेनवःसन्त्वेकाचदशचदशचशतञ्चशतञ्चसहस्रञ्चसहस्रञ्चायुतं

[ॐ अश्मन्नूर्ज्जमित्यस्य वामदेवऋषिरग्निर्देवता गायत्रीछन्दः, धन कामनया पाठे विनियोगः॥ १७॥]

ञ्चा॒यु॒तं॑ञ्चनि॒यु॒तं॑ञ्चप्र॒यु॒त॒ञ्चार्बु॑दञ्च॒न्य॒र्बु॑दञ्चसमु॒द्रश्च॒मध्य॒ञ्चा
न्तं॑श्चपरा॒र्द्धश्चै॒तामे॑ऽअग्न॒ऽइष्ट॑काधे॒नवं॑ःसन्त्व॒मुत्रा॒मुष्मिँ॑ल्लो॒के ॥२॥
ऋ॒तवं॑स्तथ । ऽऋ॒ता॒वृधं॑ऽऋ॒तु॒ष्ठास्थं॑ऽऋ॒ता॒वृधं॑ः ॥ घृ॒त॒श्चुतौं॑म
धु॒श्चुतौं॑वि॒राजो॒नामं॑का॒म॒दु॒घा॒ऽअक्षीं॑यमाणाः ॥ ३ ॥ स॒मु॒द्रस्यं॑
त्त्वा ॥ स॒मु॒द्रस्य॒त्त्वाव॑कु॒याग्ने॒परिं॑व्ययामसि ॥ पा॒व॒कोऽअ॒स्म
भ्यꣳ शि॒वोभ॑व ॥ ४ ॥ हि॒मस्यं॑त्त्वा । ज॒रा॒यु॒णाग्ने॒परिं॑व्ययामसि ॥
पा॒व॒कोऽअ॒स्मभ्यꣳ शि॒वोभ॑व ॥ ५ ॥ उप॒ज्मन् ॥ उप॒ज्मन्नु॒पवे

त॒सेवं॑तरन॒दीष्ष्वा ॥ अ॒ग्ने॑पित्तम॒पाम॑सि॒मण्डू॑कि॒ताभि॒राग॑हि॒सेम
न्नो॑य॒ज्ञम्पा॑व॒कव॑र्ण्णꣳशि॒वङ्कृ॑धि ॥ ६ ॥ अ॒पामि॒दम् ॥ अ॒पामि॒दन्न्य
य॑नꣳसमु॒द्रस्य॑नि॒वेश॑नम् ॥ अ॒न्याँस्ते॑ऽअ॒स्मत्त॑पन्तुहे॒तय॑÷पा॒व
कोऽअ॒स्मभ्य॑ꣳशि॒वोभ॑व ॥ ७ ॥ अग्ने॑पावक । रो॒चिषा॑म॒न्द्रया॑
देवाजि॒ह्वया॑ ॥ आदे॒वान्व॑क्षि॒यक्षि॑च ॥ ८ ॥ सन॑÷पावकदीदि॒वोग्ने॑
दे॒वाँ२॥ऽइ॒हाव॑ह ॥ उप॑य॒ज्ञꣳह॒विश्च॑नः ॥ ९ ॥ पा॒व॒कया॒यः ॥ पा॒व॒
कया॒यश्चि॒तय॑न्त्याकृ॒पाक्षाम॑न्नुरु॒चऽउ॒षसो॒नभा॒नुना॑ ॥ तू॒र्व्वन्नयाम॒

न्नैतंशस्यनूरणऽआयोघृणेनतंतृषाणोऽअजरः ॥१०॥ [ १० ] नम
स्ते ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्याँस्तेऽअस्म
त्तपन्तुहेतयःपावकोऽअस्मब्भ्यꣳशिवोभव ॥ ११ ॥ नृषदेवेट् ॥
नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वनसदेवेट्स्वर्विदेवेट् ॥ १२ ॥ येदेवाः ॥
येदेवादेवानांय्यज्ञियायज्ञियानाꣳसंवत्त्सरीणमुपभागमासते ॥ अ
हुतादोहविषोयज्ञेऽअस्मिन्त्स्वयम्पिबन्तुमधुनोघृतस्य ॥ १३ ॥
येदेवाः ॥ येदेवादेवेष्ष्वधिदेवत्त्वमायन्न्येब्रह्मणःपुरऽएतारोऽअ

स्य ॥ येभ्योनऽऋतेपवंतेधामकिञ्चननतोदिवोनपृंथिव्याऽअधिस्नु
षुं ॥ १४ ॥ प्राणदाऽअंपानदाः ॥ प्राणदाऽअंपानदाव्यांनदाव्वर्च्चोंदा
व्वंरिवोदाः ॥ अन्याँस्तेंऽअस्मत्तंपन्तुहेतयं÷पावकोऽअस्मभ्यंꣳ
शिवोभंव ॥ १५ ॥ [ ५ ] अग्निस्तिग्मेनं । शोचिषायासद्विश्व
न्यत्रिणंम् ॥ अग्निन्नौंव्वनतेरयिम् ॥ १६ ॥ यऽइमा । व्विश्वाभुवंना
निजुह्वदृषिहोंतान्यसींदत्पितानं÷ ॥ सऽआशिषाद्रविंणमिच्छमां
नꣳप्रथमच्छदवंराँ२॥ऽआविंवेश ॥ १७ ॥ किꣳस्वित् ॥ किꣳस्विदा

सी॒द॒धि॒ष्ठान॑मा॒रम्भ॑णङ्कत॒मत्स्वि॑त्क॒थासी॑त् ॥ य॒तो॒भूमि॑ञ्ज॒नय॑न्वि॒श्वक॑र्म्मा॒व्वि॒द्यामौर्ण्णो॑न्मा॒हि॒नाव्वि॒श्वच॑क्षाः ॥ १८ ॥ व्वि॒श्वत॑श्चक्षु॒रु॒त । व्वि॒श्वतो॑मुखोव्वि॒श्वतो॑बाहुरु॒तव्वि॒श्वत॑स्पात् ॥ सम्बा॒हुभ्या॒न्धम॑ति॒सम्पत॑त्रै॒र्द्यावा॒भूमी॑ज॒नय॑न्दे॒वऽएक॑ः ॥ १९ ॥ किꣳस्वि॑त् ॥ किꣳस्वि॒द्वन॒ङ्कऽउ॒सवृ॒क्षऽआ॑स॒यतो॒द्यावा॑पृथि॒वीनि॑ष्टत॒क्षुः ॥ मनी॑षिणो॒मन॑सापृ॒च्छते॒दु॒तद्यद॒ध्यति॑ष्ठ॒द्भुव॑नानिधा॒रय॑न् ॥ २० ॥ याते॑ ॥ याते॒धामा॑निपर॒माणि॒याव॒मायाम॑ध्य॒माव्वि॑श्वकर्म्मन्नु॒तेमा ॥

शिक्षा॒सखि॑भ्योह॒विषि॑स्वधावःस्व॒यंय्य॑जस्वत॒न्वंवृ॑धा॒नः ॥ २१ ॥
विश्व॑कर्म्मन्ह॒विषा॑। वावृधा॒नःस्व॒यंय्य॑जस्वपृथि॒वीमु॒तद्याम् ॥ मुह्य॑
न्त्व॒न्येऽअ॒भितः॑स॒पत्ना॑ऽइ॒हास्म्माकम्म॒घवा॑सू॒रिर॑स्तु ॥२२॥ वा॒च
स्प्पतिं॑ ॥ वा॒चस्प्पतिं॑वि॒श्वक॑र्म्माणमू॒तये॑मनो॒जुवं॒वाजे॑ऽअ॒द्याहु॑वे
म ॥ सनो॒विश्वा॑नि॒हव॑नानिजोषद्वि॒श्वश॑म्भू॒रव॑सेसा॒धुक॑र्म्मा ॥२३॥
विश्व॑कर्म्मन्ह॒विषा॑ ॥ विश्व॑कर्म्मन्ह॒विषा॒वर्द्ध॑नेनत्रा॒तार॒मिन्द्र॑मकृणो
र॒वध्यम् ॥ तस्मै॒विशः॒सम॑नमन्तपू॒र्वीर॒यमु॒ग्ग्रो॒विह॒व्यो॒यथास॑त्

॥२४॥ [९] चक्षु॑षः पि॒ता । मन॑सा॒हिधीरो॑घृ॒तमे॑नेऽअजन॒न्नम्न॑माने ॥
य॒दे॑दन्ता॒ऽअद॑दृहन्त॒पूर्व्व॒ऽआदि॒द्यावा॑पृथि॒वीऽअ॑प्रथेताम् ॥ २५ ॥
वि॒श्वक॑र्म्मा॒विम॑नाः ॥ वि॒श्वक॑र्म्मा॒विम॑ना॒ऽआद्विहा॑याधा॒ताविं॑धा॒
ताप॑र॒मोतस॒न्दृक् ॥ तेषा॑मि॒ष्टानि॒समि॒षाम॑दन्ति॒यत्रा॑सप्तऽऋ॒षी
न्प॒रऽएक॑माहु॒ः ॥ २६ ॥ योनः॑ । पि॒ताज॑नि॒तायोवि॑धा॒ताधामा॑
नि॒वेद॒भुव॑नानि॒विश्वा॑ ॥ योदे॒वानां॑न्नाम॒धाऽए॒क॑ऽए॒वतꣳस॑म्प्र॒श्नम्भु
व॑नायन्त्य॒न्न्या ॥ २७ ॥ तऽआय॑जन्त॒द्रवि॑ण॒ꣳसम॑स्मा॒ऽऋष॑य॒ःपू

वैंजरितारोनभूना ॥ असूर्त्तेंसूर्त्तेरजंसिनिषत्तेयेभूतानिंसमकृण्व
न्निमानिं ॥ २८ ॥ परोदिवा । परऽएनापृंथिव्यापरोदेवेभिरसुरैर्य्य
दस्तिं ॥ कꣳस्विद्गर्भम्प्रथमन्दंध्रऽआपोयत्रंदेवाःसमपंश्यन्तपूर्व्वें
॥ २९ ॥ तमित् ॥ तमिद्गर्भम्प्रथमन्दंध्रऽआपोयत्रंदेवाःसमगच्छ
न्तविश्वें ॥ अजस्यनाभावध्येकमर्पिंतंयस्मिन्विश्वांनिभुवंना
नितस्थुः ॥ ३० ॥ नतम् ॥ नतंविंदाथयऽइमाजजानान्यद्युष्मा
कमन्तंरम्बभूव ॥ नीहारेणप्रावृंताजल्प्यांचासुतृपंऽउक्थशासंश्च

रन्ति ॥ ३१ ॥ वि॒श्वक॑र्म्मा॒हि ॥ वि॒श्वक॑र्म्मा ह्य॒ज॑निष्टदे॒वऽआदिद्ग॑न्ध॒
र्वोऽअ॑भवद्द्वि॒तीय॑ः ॥ तृ॒तीय॑ःपि॒ताज॑नि॒तौष॑धीनाम॒पाङ्गर्भँ॒व्यद
धात्त्पुरु॒त्रा ॥ ३२ ॥ [ ८ ] आ॒शुःशिशा॑नः ॥ आ॒शुःशिशा॑नोवृष॒
भोनभी॒मोघ॑नाघ॒नःक्षोभ॑णश्चर्षणी॒नाम् ॥ स॒ङ्क्रन्द॑नोनिमि॒षऽए॑क
वी॒रःश॒तꣳसेना॑ऽअजयत्त्सा॒कमिन्द्र॑ः ॥ ३३ ॥ स॒ङ्क्रन्द॑नेनानिमि॒
षेण॑ । जि॒ष्ष्णुना॑युत्त्का॒रेण॑दुश्च्यव॒नेन॑धृ॒ष्ष्णुना॑ ॥ तदिन्द्रे॑णजयत॒
तत्त्स॑हध्व॒ꣳयुधो॑नर॒ऽइषु॑हस्ते॒नवृष्ष्णा॑ ॥ ३४ ॥ सऽइषु॑हस्तैः ॥ सऽइ

षुहस्तैःसनिषङ्गिभिर्व्वशीसᳪंस्रष्टासयुधऽइन्द्रोगणेन ॥ सᳪंसृष्टजित्सोमपाबाहुशर्द्ध्युग्ग्रधन्वाप्प्रतिहिताभिरस्ता ॥ ३५ ॥ बृहस्पते परि । दीयारथेनरक्षोहामित्राँ २॥ऽअपबाधमानः ॥ प्प्रभञ्जन्त्सेनाः प्प्रमृणोयुधाजयन्नस्म्माकमेद्ध्यवितारथानाम् ॥ ३६ ॥ बलविज्ञायस्त्थविरः ॥ बलविज्ञायस्त्थविरःप्प्रवीरःसहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७॥ गोत्रभिदङ्गोविदम् ॥ गोत्रभिदङ्गोविदंव्वज्ज्रबाहुञ्जयन्तम

ज्ममंप्प्रमृणन्तमोजंसा ॥ इमꣳ संजाताऽअनुवीरयद्ध्वमिन्द्रꣳ सखायो
ऽअनुसꣳरंभद्ध्वम् ॥ ३८ ॥ अभिगोत्राणि ॥ अभिगोत्राणिसहंसागाहंमा
नोदयोव्वीरःशतमंन्न्युरिन्द्रंः ॥ दुश्च्यवनःपृतनाषाडंयुद्ध्योस्म्माकꣳ
सेनांऽअवतुप्प्रयुत्त्सु ॥ ३९ ॥ इन्द्रंऽआसाम् ॥ इन्द्रंऽआसान्नेताबृह
स्पतिर्द्दक्षिणायज्ञःपुरऽएंतुसोमंः ॥ देवसेनानांमभिभञ्जतीनाञ्जयं
न्तीनाम्मरुतोंयन्त्वग्ग्रंम् ॥ ४० ॥ इन्द्रंस्यव्वृष्णंः । इन्द्रंस्यव्वृष्णोव्वरु
णस्यराज्ञंऽआदित्यानांम्मरुताꣳशर्द्धंऽउग्ग्रम् ॥ महामंनसाम्भुवन

च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥ ४१ ॥ उद्धर्षय । मघवन्ना
युधान्युत्सत्त्वनाम्मामकानाम्मनांꣳसि ॥ उद्वृत्रहन्वाजिनांव्वाजि
नान्युद्रथानाञ्जयताऽयन्तुघोषाः ॥ ४२ ॥ अस्म्माकमिन्द्रः ॥
अस्म्माकमिन्द्रःसमृतेषुध्वजेष्ष्वस्म्माकंयाऽइषवस्ताजयन्तु ॥ अ
स्म्माकंव्वीराऽउत्तरेभवन्त्वस्म्माँ२॥ऽउदेवाऽअवताहवेषु ॥ ४३ ॥
अमीषाञ्चित्तम् ॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वे
परेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम्

॥ ४४ ॥ अव॑सृष्टा॒परा॑ । पत॒शर॑व्ये॒ब्रह्म॑सꣳशिते ॥ गच्छा॒मित्रा॒न्प्र
प॑द्यस्व॒मामीषा॒ङ्कञ्च॒नोच्छि॑षः ॥ ४५ ॥ प्रेतं॑ ॥ प्रेता॒जय॑तानर॒ऽइन्द्रो॑
व॒ःशर्म्म॑यच्छतु ॥ उ॒ग्रावः॑सन्तु॒बा॒ह॒वो॑नाधृ॒ष्याय॒थास॑थ ॥ ४६ ॥
अ॒सौया । सेना॑मरुत॒ःपरे॑षाम॒भ्यैति॑न॒ऽओज॑सा॒स्प्पर्द्ध॑माना ॥ ताङ्गू॑
ह॒त॒तम॒साप॑व्रतेन॒यथा॒मीऽअ॒न्योऽअ॒न्यन्नजा॒नन् ॥ ४७ ॥ यत्र॑बा॒
णाः॑ । सम्प॑तन्ति कुमा॒रावि॑शि॒खाऽइ॑व ॥ तन्न॒ऽइन्द्रो॒बृह॒स्प्पति॒रदि॑
ति॒ःशर्म्म॑यच्छतु॒विश्वाहा॒शर्म्म॑यच्छतु ॥ ४८ ॥ मर्म्मा॑णिते ॥ म

र्म्मा॑णिते॒व्वर्म्म॑णाच्छादयामि॒सोम॑स्त्वा॒राजा॒मृते॒नानु॑वस्ताम् ॥ उ॒
रोर्व्वरी॑यो॒व्वरु॑णस्तेकृणोतुजय॑न्त॒न्त्वानु॑दे॒वामद॑न्तु ॥ ४९ ॥ [ १७ ]
उदे॑नम् ॥ उदे॑नमु॒त्तरा॒न्नया॒ग्ने॑घृतेनाहुत ॥ रा॒यस्पोषे॑ण॒सꣳसृ॑ज
प्र॒जया॑चब॒हुङ्कृ॑धि ॥ ५० ॥ शतम् ॥ ९०० ॥ इन्द्रे॒मम् ॥ इन्द्रे॒
मम्प्र॑त॒रान्न॑यसजा॒ताना॑मसद्व॒शी ॥ समे॑न॒व्वर्च्च॑सासृजदे॒वानाम्भा॒ग
दाऽअ॑सत् ॥ ५१ ॥ यस्य॑कुर्म्म॑ः॥ यस्य॑कुर्म्मो॑गृ॒हेह॒विस्तम॑ग्ने॒वर्द्धया॒
त्त्वम् ॥ तस्मै॑दे॒वाऽअधि॑ब्रुवन्न॒यञ्चब्रह्म॑ण॒स्पति॑ः ॥ ५२ ॥ उदु॒

त्वा ॥ उदु॑त्वा॒विश्वे॑दे॒वाऽअग्ने॒भर॑न्तु॒चित्ति॑भिः ॥ सनो॑भवाशि॒वस्त्वꣳसु॒प्रती॑कोवि॒भाव॑सुः ॥५३॥ पञ्च॒दिश॑ः ॥ पञ्च॒दिशो॒दैवी॑र्य॒ज्ञम॑वन्तुदे॒वीरपाम॑तिन्दुर्म्म॒तिम्बाध॑मानाः ॥ रा॒यस्पोषे॑य॒ज्ञप॑तिमा॒भज॑न्तीरा॒यस्पोषे॒ऽआधि॑य॒ज्ञोऽअ॑स्थात् ॥५४॥ समि॑द्धेऽअ॒ग्नौ ॥ समि॑द्धेऽअ॒ग्नावधि॑मामहा॒नऽउ॒क्थप॑त्त्र॒ऽईड्यो॑गृभी॒तः ॥ त॒प्तङ्घ॒र्म्मम्प॑रि॒गृह्या॑यजन्तो॒र्जा॑यद्य॒ज्ञमय॑जन्तदे॒वाः ॥ ५५ ॥ दैव्या॑यध॒र्त्रे । जोष्ट्रे॑देव॒श्रीः श्रीम॑नाःश॒तप॑याः ॥ प॒रि॒गृह्य॑दे॒वाय॒ज्ञमाय॑न्दे॒वादे॒वेभ्यो॑

ऽअद्ध्वर्य्यन्तोऽअस्त्थुः॥५६॥ व्वीतꣳहविः। शमितꣳशमितायजद्ध्यै
तुरीयोयज्ञोयत्रहव्यमेति॥ततोव्वाकाऽआशिषोनोजुषन्ताम्॥५७॥
सूर्य्यरश्मिर्हरिकेशः। पुरस्तात्त्सविताज्ज्योतिरुदयाँ२॥ऽअजस्रम्॥त
स्यपूषाप्प्रसवेयातिव्विद्वान्त्सम्पश्यन्व्विश्वाभुवनानिगोपाः ॥ ५८ ॥
व्विमानऽएषः ॥ व्विमानऽएषदिवोमद्ध्यऽआस्तऽआपप्प्रिवान्रोदसी
ऽअन्तरिक्षम्॥सव्विश्वाचीरभिचष्टेघृताचीरन्तरापूर्व्वमपरञ्चकेतुम् ॥
॥ ५९ ॥ उक्षासमुद्रः ॥ उक्षासमुद्रोऽअरुणःसुपर्ण्णःपूर्व्वस्ययोनिं

म्पि॒तुरावि॑वेश ॥ मद्ध्ये॑दि॒वोनिहि॑त॒ः पृश्नि॒रश्म्मा॒व्वि चं॑क्क्रमे॒रज॑सस्प्पा॒न्त्यन्तौ॑ ॥ ६० ॥ इन्द्रं॒व्विश्श्वा॑÷ ॥ इन्द्रं॒व्विश्श्वा॑ऽअवीवृधन्त्समु॒द्रव्व्यं॑चसङ्गि॒रं÷॥ र॒थीत॑मꣳ र॒थीनां॒व्वाजा॑ना॒ꣳसत्त्प॑ति॒म्पति॑म् ॥ ६१ ॥ दे॒वहू॒र्य॒ज्ञः ॥ दे॒वहू॒र्य॒ज्ञऽआच॑व्वक्षत्त्सु॒म्नहू॒र्य॒ज्ञऽआच॑व्वक्षत् ॥ यक्ष॑द॒ग्निर्दे॒वोदे॒वाँ२॥ऽआच॑व्वक्षत् ॥ ६२॥ व्वाज॑स्यमा । प्प्र॒सव॒ऽउ॑द्ग्रा॒भेणोद॑ग्ग्रभीत् ॥ अधा॑स॒पत्न्ना॒निन्द्रो॑मे॒निग्ग्रा॒भेणाध॑राँ२॥ऽअकः ॥ ६३॥ उ॒द्ग्रा॒भञ्च॑ । नि॒ग्ग्रा॒भञ्च॒ब्ब्रह्म॑दे॒वाऽअ॑वीवृधन् ॥ अधा॑स॒पत्न्ना॑निन्द्रा॒

ग्रीमेव्विषूचीनान्व्यस्यताम् ॥ ६४ ॥ [ १५ ] क्रमद्ध्वमग्निना ॥ क्रमद्ध्वमग्निनानाकमुक्ख्यꣳहस्तेषुबिब्भ्रतः ॥ दिवस्पृष्ठꣳस्वर्ग्गत्त्वामिश्रादेवेभिराद्ध्वम् ॥ ६५ ॥ प्राचीमनु । प्रदिशम्प्रेहिविद्वानग्नेरग्नेपुरोऽअग्निर्ब्भवेह ॥ विश्वाऽआशादीद्यानोविभाह्यूर्ज्जन्नोधेहिद्विपदेचतुष्प्पदे ॥ ६६ ॥ पृथिव्याऽअहम् ॥ पृथिव्याऽअहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्त्स्वर्ज्ज्योतिरगामहम् ॥ ६७ ॥ स्वर्य्यन्तः ॥ स्वर्य्यन्तोनापेक्षन्तऽआद्याꣳरोहन्तिरोद

सी ॥ यज्ञंय्येविश्वतोधारꣳसुविद्वाꣳसोवितेनिरे ॥ ६८ ॥ अग्नेप्र ॥
अग्नेप्प्रेहिप्प्रथमोदेवयताञ्चक्षुर्द्देवानामुतमर्त्यानाम् ॥ इयंक्षमाणा
भृगुभिꣳसजोषाꣳस्वर्य्यन्तुयजमानाꣳस्वस्ति ॥ ६९ ॥ नक्तोषासा ॥
नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्षा
मारुक्मोऽअन्तर्व्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ ७० ॥ अ
ग्नेसहस्राक्ष । शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्यानाः ॥ त्वꣳसाहस्र
स्यरायऽईशिषेतस्मैतेविधेमवाजायस्वाहा ॥ ७१ ॥ सुपर्णोसि । गरु

त्मान्पृष्ठेपृथिव्याःसीद ॥ भासान्तरिक्षमापृणज्ज्योतिषादिवमुत्त
भानतेजसादिशऽउद्दृꣳह ॥ ७२ ॥ आजुह्वानःसुप्रतीकः । पुरस्ता
दग्नेस्वंयोनिमासीदसाधुया ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मि
न्व्विश्वेदेवायजमानश्चसीदत ॥ ७३ ॥ ताꣳसवितुः ॥ ताꣳसवितु
र्व्वरेण्यस्यचित्रामाहंव्वृणेसुमतींव्विश्वजन्याम् ॥ यामस्यकण्वोऽअदु
हत्प्रपीनाꣳसहस्रधाराम्पयसामहीङ्गाम् ॥ ७४ ॥ व्विधेमते । परमे
जन्मन्नग्नेव्विधेमस्तोमैरवरेसधस्थे ॥ यस्माद्योनेरुदारिथायजेतम्प्र

त्वेह॒वीꣳषि॑जुहु॒रेसमि॑द्धे ॥ ७५ ॥ प्रेद्धो॑ऽअग्ने ॥ प्रेद्धो॑ऽअग्नेदी
दिहिपु॒रोनोजं॑स्रयासू॒र्म्या॑यविष्ठ॥ त्वाꣳशश्वं॑न्त॒ऽउपं॑यन्ति॒वाजाः॑
॥ ७६ ॥ अग्ने॒तम् ॥ अग्ने॒तम॒द्याश्व॒न्नस्तोमैः॒क्रतु॒न्नभ॒द्रꣳहृं॑दि॒स्पृ
शम् ॥ ऋ॒ध्यामा॑त॒ऽओहैः ॥ ७७॥ चित्तिञ्जुहोमि ॥ चित्तिञ्जुहोमि॒
मनं॑साघृ॒तेन॒यथा॑दे॒वाऽइ॒हागमं॑न्वी॒तिहो॑त्राऽऋता॒वृधः॑ ॥ पत्त्ये॒वि
श्वं॑स्य॒भूमं॑नोजु॒होमिं॑वि॒श्वकं॑र्म्मणेवि॒श्वाहादां॑भ्यꣳह॒विः ॥ ७८ ॥
सं. २७ स॒प्तते॑ । ऽअग्ने॒समि॑धः॒स॒प्तजि॒ह्वाःस॒प्तऽऋषं॑यःस॒प्तधामं॑प्प्रि॒या

णि॑ ॥ स॒प्तहो॑त्त्रा॑ꣳसप्त॒धात्त्वा॑यजन्तिस॒प्तयो॑नी॒रापृ॑णस्वघृ॒तेन॒स्वाहा॑
॥ ७९ ॥ [ १५ ] शु॒क्रज्ज्यो॑तिश्च । चि॒त्रज्ज्यो॑तिश्चस॒त्यज्ज्यो॑तिश्च॒
ज्ज्योति॑ष्माँश्च ॥ शु॒क्रश्च॑ऽऋत॒पाश्चात्य॑ꣳहाः ॥ ८० ॥ ई॒दृङ्च॑ ॥ ई॒दृ
ङ्चा॑न्या॒दृङ्च॑स॒दृङ्च॒प्प्रति॑सदृङ्च ॥ मि॒तश्च॒सम्मि॑तश्च॒सभ॑राः ॥ ८१ ॥
ऋ॒तश्च॑स॒त्त्यश्च॑ध्रु॒वश्च॑ध॒रुण॑श्च ॥ ध॒र्त्ता च॑वि॒धर्त्ता च॑विधार॒यः ॥ ८२ ॥
ऋ॒ता॒जिच्च॑ । सत्त्य॒जिच्च॑सेन॒जिच्च॑सु॒षेण॑श्च ॥ अन्ति॑मित्त्रश्चदू॒रेऽअ॑मि
त्त्रश्चग॒णः ॥ ८३ ॥ ई॒दृक्षा॑सऽएता॒दृक्षा॑सः ॥ ई॒दृक्षा॑सऽएता॒दृक्षा॑स

ऽऊषुणःसद्दक्षासःप्प्रतिंसद्दक्षासऽएतंन ॥ मितासंश्चसम्मिंतासोनो
ऽअद्यसभंरसोमरुतोयज्ञेऽअस्मिन् ॥ ८४ ॥ स्वतंवाँश्च । प्प्रघासीचं
सान्तपनश्चंगृहमेधीचं ॥ क्रीडीचंशाकीचोंज्जेषी ॥ ८५ ॥ इन्द्रन्दै
वींः ॥ इन्द्रन्दैवीर्व्विशोंमरुतोनुंवर्त्मानोभवन्यथेन्द्रन्दैवीर्व्विशोम
रुतोनुंवर्त्मानोभंवन् ॥ एवमिमंयजंमानन्दैवींश्चविशोंमानुषीश्चा
नुंवर्त्मानोभवन्तु ॥ ८६ ॥ [ ७ ] इमꣳस्तनंम् ॥ इमꣳस्तनमूर्ज्जं
स्वन्तन्धयापाम्प्रपींनमग्नेसरिरस्यमद्ध्यें ॥ उत्संञ्जुषस्वमधुंमन्तमर्व्व

न्तस॒मु॒द्रि॒यꣳसद॑न॒मावि॑शस्व ॥ ८७ ॥ घृ॒तम्मि॑मिक्षे । घृ॒तम॑स्य॒योनि॑
र्घृ॒तेश्श्रि॒तोघृ॒तम्म्व॑स्य॒धाम॑ ॥ अ॒नु॒ष्व॒धमाव॑हमा॒दय॑स्व॒स्वाहा॑कृतंवृ॒
षभ॒व्वक्षि॑ह॒व्यम् ॥ ८८ ॥ स॒मु॒द्राद्दू॒र्म्मिः ॥ स॒मु॒द्राद्दू॒र्म्मिर्म्मधु॑माँ॒२॥
ऽउदा॑र॒दु॒पा॒ꣳशुना॒सम॑मृत॒त्त्वमा॑नट् ॥ घृ॒तस्य॒नाम॒गुह्यं॒यद॑स्ति॒जि॒
ह्वादे॒वाना॑म॒मृत॑स्य॒नाभि॑ः ॥ ८९ ॥ व्व॒यन्नाम॑ ॥ व्व॒यन्नाम॒प्रब्र॑वामा
घृ॒तस्या॒स्म्मिन्य॒ज्ञेधा॑रयामा॒नमो॑भिः ॥ उप॑ब्र॒ह्माश्शृ॑णवच्छ॒स्यमा॑
न॒ञ्च॒तु॑ःश्शृ॒ङ्गो॑वमीद्गौ॒रऽए॒तत् ॥ ९० ॥ च॒त्वारि॒श्शृ॒ङ्गा॑ ॥ च॒त्वारि॒श्शृ

ङ्गा॒त्त्रयो॑ऽअस्य॒पादा॒द्द्वेशी॒र्षेस॒प्तहस्ता॑सोऽअस्य ॥ त्रिधा॑ब॒द्धोवृ॑ष॒भोरो॑रवीतिम॒होदे॒वोमर्त्याँ॒२॥ ऽआवि॑वेश ॥ ९१ ॥ त्रिधा॑हि॒तम् ॥ त्रिधा॑हि॒तम्प॒णिभि॑र्गु॒ह्यमा॑नङ्ग॒वि॑दे॒वासो॑घृ॒तमन्व॑विन्दन् ॥ इन्द्र॒ऽएक॒ꣳसू॒र्य॒ऽएकं॑ज्ज॒जानव्वे॒नादेक॑ꣳस्व॒धया॒निष्ट॑तक्षुः ॥ ९२ ॥ ए॒ताऽअ॑र्षन्ति ॥ ए॒ताऽअ॑र्षन्ति॒हृ॒द्या॑त्स॒मु॒द्राच्छ॒तव्र॑जारि॒पुणा॒नाव॒चक्षे॑ ॥ घृ॒तस्य॒धारा॑ऽअ॒भिचा॑कशीमिहि॒रण्ण्ययो॑व्वे॒त॒सोमध्य॑ऽआसाम् ॥ ॥ ९३ ॥ स॒म्म्यक्स्र॑वन्ति । स॒रितो॒नधेना॑ऽअ॒न्तर्हृ॒दामन॑सापू॒यमा॑

नाꣳ ॥ ए॒तेऽअ॑र्षन्त्यू॒र्म्मयो॑घृ॒तस्य॑मृ॒गाऽइ॑वक्षिप॒णोरीष॑माणाꣳ ॥९४॥
सिन्धो॑रिवप्प्राध्व॒ने । शू॑घ॒नासो॒वातप्प्रमियꣳपतयन्तिय॒ह्वाः ॥ घृ॒त
स्य॒धारा॑ऽअरु॒षोनवा॒जीकाष्ठा॑भि॒न्दन्नू॒र्म्मिभि॒ꣳपिन्व॑मान॒ꣳ ॥ ९५ ॥
अ॒भिप्र॑वन्त ॥ अ॒भिप्र॑वन्त॒सम॑नेव॒योषा॑ꣳकल्या॒ण्ण्यꣳस्स्मय॑माना
सो॒ऽअ॒ग्निम् ॥ घृ॒तस्य॒धारा॑ꣳस॒मिधो॑नसन्त॒ताजु॑षा॒णोह॑र्य्यतिजा॒
तवे॑दाꣳ ॥ ९६ ॥ क॒न्न्याऽइवव्व॒हतुम् ॥ क॒न्न्याऽइवव्व॒हतुमेत॒वाऽ
उ॑ऽअ॒ञ्ज्यञ्जा॒नाऽअ॒भिचा॑कशीमि ॥ यत्र॒सोम॑ꣳसु॒यते॒यत्र॑य॒ज्ञोघृत

स्य॒धारा॑ऽअ॒भितत्त्प॑वन्ते ॥ ९७ ॥ अ॒भ्य॑र्षत । सु॒ष्टु॒तिङ्गव्य॑मा॒जिम॒
स्म्मासु॑भ॒द्राद्रवि॑णानिधत्त ॥ इ॒मंय॒ज्ञन्न॑यतदे॒वतां॑नोघृ॒तस्य॒धारा॒
मधु॑मत्त्पवन्ते ॥ ९८ ॥ धाम॑न्ते ॥ धाम॑न्ते॒विश्व॒म्भुव॑न॒माधि॑श्रि॒
तम॒न्तःस॑मु॒द्रेहृ॒द्य॒न्तरायु॑षि ॥ अ॒पामनी॑केसमि॒थेयऽआभृ॑त॒स्तम॑
श्या॒ममधु॑मन्तन्तऽऊ॒र्म्मिम् ॥ ९९ ॥ [ १३ ] इतिश्रीवाजसनेय
संहितायांसप्तदशोऽध्यायः ॥ १७ ॥ श्रीवेदपुरुषायनमः ॥ अनु
वाक्सूत्रम्॥वाजः,-सत्य,-मूर्क्कचतुष्का,अश्मा,-ऽग्निस्त्रिका,वꣳशुः

[ॐ व्वाजश्चम इति प्रजापतिर्ऋषिर्रुद्रो देवता जगतीछन्दोऽग्निहोत्रफलप्राप्तिकामः पाठे-
विनियोगः ॥१८॥]

पंचै,काचतस्रो,वाजायद्वे,वाजस्यन्वष्टा,ऽऋताषाट्त्रयोदशा,ग्निंसुन
ज्मिसप्त,सदाकूता,-द्वात्रिंहत्यायदशकौ,त्रयोदशसप्तसप्ततिः ॥ हरिः
ॐ ॥ व्वाज॑श्च । मेप्रस॒वश्च॑मे॒प्रय॑तिश्चमे॒प्रसि॑तिश्चमेधी॒तिश्च॑मे॒क्रतु॑श्च
मे॒स्वर॑श्चमे॒श्श्लोक॑श्चमेश्श्र॒वश्च॑मे॒श्श्रुति॑श्चमे॒ज्ज्योति॑श्चमे॒स्व॒श्चमेय॒ज्ञे
नेकल्पन्ताम् ॥ १ ॥ प्रा॒णश्च॑ । मेपा॒नश्च॑मेव्या॒नश्च॒मेसु॑श्चमेचि॒त्तञ्च॑
म॒ऽआधी॑तञ्चमे॒व्वाक्च॑मे॒मन॑श्चमे॒चक्षु॑श्चमे॒श्श्रोत्र॑ञ्चमे॒दक्ष॑श्चमे॒बल॑ञ्च
मेय॒ज्ञेनकल्पन्ताम् ॥ २ ॥ ओज॑श्च । मे॒सह॑श्चमऽआ॒त्मा च॑मेत॒

नूश्चमेशर्म्मंचमेव्वर्म्मंचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरी
राणिचमऽआयुश्चमेजराचंमेयज्ञेनंकल्प्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्च ।
मऽआधिपत्त्यञ्चमेमन्युश्चमेभामंश्चमेमंश्चमेम्भंश्चमेजेमाचंमेम
हिमाचंमेव्वरिमाचंमेप्प्रथिमाचंमेव्वर्षिमाचंमेद्राघिमाचंमेवृद्धञ्चमे
वृद्धिंश्चमेयज्ञेनंकल्प्पन्ताम् ॥४॥ [४] सत्त्यञ्च । मेश्रद्धाचंमेजगच्चमे
धनंञ्चमेविश्वंञ्चमेमहंश्चमेक्रीडाचंमेमोदंश्चमेजातञ्चमेजनिष्यमां
णञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनंकल्प्पन्ताम् ॥ ५ ॥ ऋतञ्च । मेमृतं

ञ्चमेय॒क्ष्मञ्च॒मेना॑मयच्चमेजी॒वातुं॑श्चमेदीर्घायु॒त्त्वञ्चं॑मेनामि॒त्रञ्च॒मेभं॑
यञ्चमेसु॒खञ्चं॑मे॒शयं॑नञ्च॒मेसू॒खाश्चं॑मेसु॒दिनं॑ञ्चमेय॒ज्ञेनं॑कल्पन्ताम्
॥ ६ ॥ य॒न्ताचं॑ । मेध॒र्त्ताचं॑मे॒क्षेमं॑श्चमे॒धृति॑श्चमे॒व्विश्वं॑ञ्चमे॒महं॑श्चमेसं॒
व्विच्चं॑मे॒ज्ञात्रं॑ञ्चमे॒सूश्चं॑मेप्र॒सूश्चं॑मे॒सीरं॑ञ्चमे॒लयं॑श्चमेय॒ज्ञेनं॑कल्पन्ताम्
॥ ७ ॥ शञ्चं॑ । मे॒मयं॑श्चमेप्प्रि॒यञ्चं॑मेनुका॒मश्चं॑मे॒कामं॑श्चमेसौमन॒स
श्चं॑मे॒भगं॑श्चमे॒द्रवि॑णञ्चमेभ॒द्रञ्चं॑मे॒श्रेयं॑श्चमे॒व्वसी॑यश्चमे॒यशं॑श्चमेय॒ज्ञेनं॑
कल्पन्ताम् ॥८॥ [ ४ ] ऊर्क्च ॥ ऊर्क्कं॑मेसू॒नृता॑चमे॒पयं॑श्चमे॒रसं॑श्चमे

घृतञ्चंमेमधुंचमेसग्धिश्चमेसपींतिश्चमेकृषिश्चंमेवृष्टिंश्चमेजैत्रंञ्चम
ऽऔद्भिंद्यञ्चमेयज्ञेनंकल्पन्ताम् ॥ ९ ॥ रयिश्चं । मेरायंश्चमेपुष्टञ्चंमे
पुष्टिंश्चमेविभुचंमेप्रभुचंमेपूर्णञ्चंमेपूर्णतंरञ्चमेकुयंवञ्चमोक्षितञ्चमे
न्नंञ्चमेक्षुंच्चमेयज्ञेनंकल्पन्ताम् ॥ १० ॥ वित्तञ्चं । मेवेद्यंञ्चमेभूत
ञ्चंमेभविष्यच्चंमेसुगञ्चंमेसुपत्थ्यञ्चमऽऋद्धञ्चंमऽऋद्धिंश्चमेक्लृप्तञ्चं
मेक्लृप्तिंश्चमेमतिश्चंमेसुमतिश्चंमेयज्ञेनंकल्पन्ताम् ॥ ११ ॥ व्रीह
यंश्च । मेयवांश्चमेमाषांश्चमेतिलांश्चमेमुद्गाश्चंमेखल्वांश्चमेप्रिय

ङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनकल्प्पन्ताम् ॥ १२ ॥ [ ४ ] अश्म्माच । मेमृत्तिकाचमेगिरयश्चमेपर्व्वताश्चमेसिकताश्चमेव्वनस्प्पतयश्चमेहिरण्ण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम् ॥ १३ ॥ अग्निश्च । मऽआपश्चमेव्वीरुधश्चमऽओषधयश्चमेकृष्टपच्च्याश्चमेकृष्टपच्च्याश्चमेग्राम्म्याश्चमेपशवऽआरण्ण्याश्चमेव्वित्तञ्चमेव्वित्त्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्प्पन्ताम् ॥ १४ ॥ व्वसुच । मेव्वसातिश्चमेकर्म्मच

मे॒शक्ति॑श्च॒मेत्थै॑श्चम॒ऽएम॑श्चमऽइ॒त्त्याच॑मे॒गति॑श्चमेय॒ज्ञेन॑कल्पन्ताम्
॥ १५ ॥ [ ३ ] अ॒ग्निश्च॑ । म॒ऽइन्द्र॑श्चमे॒सोम॑श्चम॒ऽइन्द्र॑श्चमेसवि॒ता
च॑म॒ऽइन्द्र॑श्चमे॒सर॑स्वतीचम॒ऽइन्द्र॑श्चमेपू॒षाच॑म॒ऽइन्द्र॑श्चमे॒बृह॒स्प्पति॑
श्चम॒ऽइन्द्र॑श्चमेय॒ज्ञेन॑कल्पन्ताम् ॥ १६ ॥ मि॒त्रश्च॑ । म॒ऽइन्द्र॑
श्चमे॒व्वरु॑णश्चम॒ऽइन्द्र॑श्चमेधा॒ताच॑म॒ऽइन्द्र॑श्चमे॒त्त्वष्टा॑चम॒ऽइन्द्र॑श्चमे
म॒रुत॑श्चम॒ऽइन्द्र॑श्चमे॒व्विश्वे॑चमेदे॒वाऽइन्द्र॑श्चमेय॒ज्ञेन॑कल्पन्ताम्
॥१७॥ पृथि॒वीच॑ । म॒ऽइन्द्र॑श्चमे॒न्तरि॑क्षञ्चम॒ऽइन्द्र॑श्चमे॒द्यौश्च॑म॒ऽइन्द्र॑

श्चमेसमाश्चमऽइन्द्रंश्चमेनक्षंत्राणिचमऽइन्द्रंश्चमेदिशंश्चमऽइन्द्रं
श्चमेयज्ञेनंकल्पन्ताम् ॥ १८ ॥ [ ३ ] अꣳशुश्चं । मेरश्मिश्च
मेदाभ्यश्चमेधिंपतिश्चमऽउपाꣳशुश्चंमेन्तर्य्यामश्चंमऽऐन्द्रवायव
श्चंमेमैत्रावरुणश्चंमऽआश्विनश्चंमेप्प्रतिप्प्रस्थानंश्चमेशुक्रश्चंमेमन्थी
चंमेयज्ञेनंकल्पन्ताम् ॥ १९ ॥ आग्रयणश्चं । मेवैश्वदेवश्चंमे
ध्रुवश्चंमेवैश्वानरश्चंमऽऐन्द्राग्नश्चंमेमहावैश्वदेवश्चमेमरुत्त्वतीयांश्च
मेनिष्क्केवल्ल्यश्चमेसावित्रश्चंमेसारस्वतश्चंमेपात्नीवतश्चंमेहारियोज

न॒श्च॑मेय॒ज्ञेन॑कल्पन्ताम् ॥२०॥ स्रुच॑श्च । मेचम॒साश्च॑मेवाय॒व्या॒निचमेद्रोणकल॒शश्च॑मे॒ग्ग्रावा॑णश्चमे॒धि॒षव॑णेचमेपूत॒भृच्च॑मऽआधव॒नीय॑श्चमे॒व्वेदि॑श्चमेब॒र्हिश्च॑मेवभृ॒थश्च॑मेस्वगाका॒रश्च॑मेय॒ज्ञेन॑कल्पन्ताम् ॥ २१ ॥ अ॒ग्निश्च॑ । मेघ॒र्म्मश्च॑मे॒र्कश्च॑मे॒सूर्य॑श्चमेप्प्रा॒णश्च॑मेश्श्वमे॒धश्च॑मेपृथि॒वीच॒मेदि॑तिश्चमे॒दिति॑श्चमे॒द्यौश्च॑मे॒ङ्गुल॑य॒ꣳशक्क॑रयो॒दिश॑श्चमेय॒ज्ञेन॑कल्पन्ताम् ॥ २२ ॥ व्र॒तञ्च॑ । मऽऋ॒तव॑श्चमे॒तप॑श्चमेसंव्वत्स॒रश्च॑मेहोरा॒त्रेऽऊ॑र्व॒ष्ठीवे॑बृ॑हद्रथन्त॒रेच॑मेय॒ज्ञेन॑कल्पन्ताम्॥२३॥[५]

एका॑च । मेति॒स्रश्च॑मेति॒स्रश्च॑मे॒पञ्च॑चमे॒पञ्च॑चमेस॒प्तच॑मेस॒प्तच॑मे॒नव॑चमे॒नव॑चम॒ऽएका॑दशचम॒ऽएका॑दशचमे॒त्रयो॑दशचमे॒त्रयो॑दशचमे॒पञ्च॑दशचमे॒पञ्च॑दशचमेस॒प्तद॑शचमेस॒प्तद॑शचमे॒नव॑दशचमे॒नव॑दशचम॒ऽएक॑विꣳशतिश्चम॒ऽएक॑विꣳशतिश्चमे॒त्रयो॑विꣳशतिश्चमे॒त्रयो॑विꣳशतिश्चमे॒पञ्च॑विꣳशतिश्चमे॒पञ्च॑विꣳशतिश्चमेस॒प्तवि॑ꣳशतिश्चमेस॒प्तवि॑ꣳशतिश्चमे॒नव॑विꣳशतिश्चमे॒नव॑विꣳशतिश्चम॒ऽएक॑त्रिꣳशच्चम॒ऽएक॑त्रिꣳशच्चमे॒त्रय॑स्त्रिꣳशच्चमेय॒ज्ञेन॑कल्पन्ताम् ॥२४॥ च

तस्रश्च । मेष्टौचमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमे
व्विꣳशतिश्चमेव्विꣳशतिश्चमेचतुर्व्विꣳशतिश्चमेचतुर्व्विꣳशतिश्चमेष्टा
विꣳशतिश्चमेष्टाविꣳशतिश्चमेद्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳ
शच्चमेषट्त्रिꣳशच्चमेचत्त्वारिꣳशच्चमेचत्त्वारिꣳशच्चमेचतुश्चत्त्वारिꣳ
शच्चमेचतुश्चत्त्वारिꣳशच्चमेष्टाचत्त्वारिꣳशच्चमेयज्ञेनकल्पन्ताम्
॥ २५ ॥ त्र्यविश्च । मेत्र्यवीचमेदित्त्यवाट्चमेदित्यौहीचमेपञ्चा
विश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीच

मेय॒ज्ञेन॑कल्प्पन्ताम् ॥ २६ ॥ प॒ष्ठ॒वाट्च॑ ॥ प॒ष्ठ॒वाट्च॑मेपष्ठौ॒हीच॑मऽउ॒
क्षाच॑मेव्व॒शाच॑मऽऋष॒भश्च॑मेव्वे॒हच्च॑मेन॒ड्वाँश्च॑मेधे॒नुश्च॑मेय॒ज्ञेन॑कल्प्प
न्ताम् ॥ २७ ॥ [ ४ ] व्वाजा॑य॒स्वाहा॑ । प्प्रस॒वाय॒स्वाहा॑पि॒जा
य॒स्वाहा॒क्क्रत॑वे॒स्वाहा॒व्वस॑वे॒स्वाहा॑ह॒र्प्पत॑ये॒स्वाहा॒न्हे॑मु॒ग्ग्धाय॒स्वाहा॑मु॒
ग्ग्धाय॑व्वैनꣳशि॒नाय॒स्वाहा॑व्विन॒ꣳशिन॑ऽआन्त्याय॒नाय॒स्वाहा॒न्त्या॑
यभौव॒नाय॒स्वाहा॒भुव॑नस्य॒पत॑ये॒स्वाहाधि॑पतये॒स्वाहा॑प्प्र॒जाप॑तये॒स्वा
हा॑ ॥ इ॒यन्ते॒राण्म्मि॒त्राय॑य॒न्तासि॒यम॑नऽऊ॒र्ज्जे॑त्वावृ॒ष्ट्यै॑त्वाप्प्र॒जाना॒

न्त्वाधिपत्त्याय॥२८॥ आयुर्य्यज्ञेनं। कल्पताम्प्राणोयज्ञेनंकल्पता
ञ्चक्षुर्य्यज्ञेनंकल्पताꣳश्श्रोत्त्रंयज्ञेनंकल्पतांव्वाग्ग्यज्ञेनंकल्पता
म्मनोयज्ञेनंकल्पतामात्मायज्ञेनंकल्पताम्ब्रह्मायज्ञेनंकल्प
ताञ्ज्योतिर्य्यज्ञेनंकल्पताꣳस्वर्य्यज्ञेनंकल्पताम्पृष्ठंय्यज्ञेनंकल्प
तांयज्ञोयज्ञेनंकल्पताम् ॥ स्तोमश्चयजुश्चऽऋक्चसामचबृहच्च
रथन्तरञ्च ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेᳶप्प्रजाऽअभू
मव्वेट्स्वाहा॥२९॥ [२] व्वाजस्यनु। प्प्रसवेमातरम्महीमदितिन्ना

मुव्वचसाकरामहे ॥ यस्यामिदंव्विश्श्वम्भुवनमाविवेशतस्यान्नोदेवःस
विताधर्म्मसाविषत् ॥ ३० ॥ व्विश्श्वेऽअद्य । मरुतोव्विश्श्वऽऊतीव्विश्श्वेभ
वन्त्वग्नयꣳसमिद्धाꣳ ॥ व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्वमस्तुद्रवि
णंव्वाजोऽअस्म्मे ॥ ३१ ॥ व्वाजोनꣳ । सप्तप्प्रदिशश्चतस्स्रोवापराव
तः ॥ व्वाजोनोव्विश्श्वैर्द्देवैर्द्धनसाताविहावतु ॥ ३२ ॥ व्वाजोनꣳ ॥ व्वा
जोनोऽअद्यप्प्रसुवातिदानंव्वाजोदेवाँ२ ॥ऽऋतुभिःकल्प्पयाति ॥ व्वा
जोहिमासर्व्ववीरञ्जजानव्विश्श्वाऽआशाव्वाजपतिर्ज्जयेयम् ॥ ३३ ॥

व्वाज÷पुरस्तात् ॥ व्वाज÷पुरस्तादुतमध्यतोनोव्वाजोदेवान्हविषावर्द्ध
याति ॥ व्वाजोहिमासर्व्ववीरञ्चकारसर्व्वाऽआशाव्वाजपतिर्भवेयम्
॥ ३४ ॥ सम्मा । सृजामिपयसापृथिव्याःसम्मासृजाम्म्यद्भिरोष
धीभिः ॥ सोहव्वाजꣳसनेयमग्ने ॥ ३५ ॥ पय÷पृथिव्याम् ॥ पय÷
पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीःप्प्र
दिश÷सन्तुमह्यम् ॥ ३६ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्श्विनोर्बाहुभ्या
म्पूष्णोहस्ताभ्याम् ॥ सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेःसाम्म्राज्ये

ना॒भिषि॑ञ्चामि॥३७॥ [८] ऋ॒ता॒षाडृ॒तधा॑मा ॥ ऋ॒ता॒षाडृ॒तधा॑मा॒ग्नि
र्ग॑न्ध॒र्वस्तस्यौष॑धयोप्प्स॒रसो॒मुदो॒नाम॑ ॥ सन॑ऽइ॒दम्ब्रह्म॑क्ष॒त्रम्पा॑तु॒त
स्म्मै॒स्वाहा॒वाट्ता॒भ्य॒ःस्वाहा॑॥३८॥स॒ꣳहि॒तोव्वि॒श्वसा॑मा॥स॒ꣳहि॒तोव्वि॒
श्वसा॑मा॒सूर्य्यौ॑गन्ध॒र्वस्तस्य॒मरी॑चयोप्प्स॒रस॑ऽआ॒यु॒वो॒नाम॑ ॥ सन॑ऽइ॒
दम्ब्रह्म॑क्ष॒त्रम्पा॑तु॒तस्म्मै॒स्वाहा॒वाट्ता॒भ्य॒ःस्वाहा॑ ॥ ३९ ॥ सु॒षु॒म्म्णः
सूर्य्य॑रश्मि॒ः ॥ सु॒षु॒म्म्णःसूर्य्य॑रश्मि॒श्चन्द्र॒मा॑गन्ध॒र्वस्तस्य॒नक्ष॑त्रा
ण्यप्प्स॒रसो॑भे॒कुर॑यो॒नाम॑ ॥ सन॑ऽइ॒दम्ब्रह्म॑क्ष॒त्रम्पा॑तु॒तस्म्मै॒स्वाहा॒

व्वाट्ताब्भ्यꣳस्वाहा ॥४०॥ इषिरोव्विश्श्वव्व्यंचाꣳ ॥ इषिरोव्विश्श्वव्व्यंचाव्वा
तोगन्धर्व्वस्तस्यापोऽअप्प्सरसऽऊर्ज्जोनामं ॥ सनंऽइदम्ब्ब्रह्मंक्षत्त्रम्पां
तुतस्म्मैस्वाहाव्वाट्ताब्भ्यꣳस्वाहां ॥ ४१ ॥ भुज्युःसुंपर्ण्णः ॥ भुज्युःसु
पर्ण्णोयज्ञोगंन्धर्व्वस्तस्यदक्षिंणाऽअप्प्सरसंस्तावानामं ॥ सनंऽइदम्ब्ब्र
ह्मंक्षत्त्रम्पांतुतस्म्मैस्वाहाव्वाट्ताब्भ्यꣳस्वाहां ॥४२॥ प्प्रजापंतिर्व्विश्श्वकं
र्म्मा ॥ प्प्रजापंतिर्व्विश्श्वकंर्म्मामनोगन्धर्व्वस्तस्यंऽऋक्सामान्यंप्प्सरस
ऽएष्टंयोनामं॥ सनंऽइदम्ब्ब्रह्मंक्षत्त्रम्पांतुतस्मैस्वाहाव्वाट्ताब्भ्यꣳस्वाहा

॥ ४३ ॥ सन॑÷ ॥ सनो॑भुवनस्यपतेप्प्रजापते॒यस्य॑तऽउ॒परि॑गृ॒हायस्य॑
वे॒ह ॥ अ॒स्मैब्रह्म॑णे॒स्मैक्ष॒त्त्राय॒महि॒शर्म्म॑यच्छ॒स्वाहा॑॥४४॥समु॒द्रो
सि ॥ समु॒द्रोसि॒नभ॑स्वाना॒र्द्रदा॑नुꣳश॒म्भूर्म्म॑यो॒भूर॒भिमा॑वाहि॒स्वाहा॑
मारु॒तो॑सिम॒रुता॑ङ्ग॒णःश॒म्भूर्म्म॑यो॒भूर॒भिमा॑वाहि॒स्वाहा॑व॒स्यूर॑सि॒दुव॑
स्वाञ्छ॒म्भूर्म्म॑यो॒भूर॒भिमा॑वाहि॒स्वाहा॑ ॥४५॥ यास्ते॑ ॥ यास्ते॑ऽअग्ग्ने॒
सूर्य्ये॑रु॒चो॒दिव॑मात॒न्वन्ति॑र॒श्मिभि॑÷ ॥ ताभि॑र्न्नो॑ऽअ॒द्यसर्व्वा॑भीरु॒चे
जना॑यनस्कृधि ॥ ४६ ॥ याव॑÷ ॥ यावो॑देवा॒ꣳसूर्य्ये॒रुचो॒गोष्वश्वे॑षु

यारुचं÷ ॥ इन्द्राग्ग्नीताभिꣳसर्व्वाभीरुचंन्नोधत्तबृहस्प्पते ॥ ४७ ॥
रुचंन्नꣳ॥ रुचंन्नोधेहिब्राह्मणेषुरुचꣳराजंसुनस्कृधि ॥ रुचंव्विश्येषुशू
द्द्रेषुमयिंधेहिरुचारुचंम् ॥४८॥ तत्त्वां। यामिब्रह्मंणाव्वन्दंमानस्तदा
शांस्तेयजंमानोहविर्ब्भि÷ ॥ अहेडमानोव्वरुणेहबोध्युरुंशꣳसमानऽ
आयुꣳप्रमोषीꣳ ॥ ४९ ॥ स्वर्ण्णं ॥ स्वर्ण्णघर्म्मःस्वाहास्वर्ण्णार्क्कःस्वाहा
स्वर्ण्णशुक्रःस्वाहास्वर्ण्णज्ज्योतिꣳस्वाहास्वर्ण्णसूर्य्यꣳस्वाहां ॥ ५० ॥
सं. २९ [ १३ ] अग्निंस्युंनज्मि ॥ अग्निंस्युंनाज्मिशवंसाघृतेनंदिव्यꣳसु

प॒र्ण्णँव्वय॑साबृ॒हन्त॑म् ॥ तेन॑व्व॒यङ्ग॑मेमब्र॒ध्नस्य॑व्वि॒ष्टप॒ꣳस्वो॒रुहा॑णा॒ऽअ
धि॒नाक॑मु॒त्त॒मम् ॥ ५१ ॥ शतम् ॥ १००० ॥ इ॒मौते । प॒क्षाव॒जरौ॑प
त॒त्रिणौ॒याभ्या॒ꣳ॒रक्षा॑ꣳ॒स्यप॒हꣳस्य॑ग्ने ॥ ताभ्या॑म्पतेमसु॒कृता॑मु
लो॒कंय्य॒त्रऽऋष॑योज॒ग्मुःप्र॑थम॒जाःपु॑रा॒णाः ॥ ५२ ॥ इ॒न्दु॒र्दक्ष॑÷ ।
श्ये॒नऽऋ॒तावा॒हिर॑ण्ण्यपक्षःशकु॒नोभु॑र॒ण्ण्युः ॥ म॒हान्त्स॒धस्थे॑ध्रुवऽ
आनिष॑त्तो॒नम॑स्तेऽअस्तुमामा॑हिꣳसीः ॥ ५३ ॥ दि॒वोमू॒र्द्धा॑ । सि॑पृ
थि॒व्यानाभि॒रूर्ग्ग॒पामोष॑धीनाम् ॥ वि॒श्वायुःशर्म्म॑स॒प्प्रथा॒नम॑स्प॒थे

॥५४॥ विश्व॑स्यमू॒र्द्धन्॥ विश्व॑स्यमू॒र्द्धन्नधि॑तिष्ठसिश्श्रि॒तः॒सं॑मु॒द्रेते॒हृ
द॑यम॒प्प्स्वायु॑र॒पोद॑त्तोद॒धिम्भि॑न्त॥ दि॒वस्प॒र्ज्जन्न्या॑द॒न्तरि॑क्षात्त्पृथि॒
व्यास्ततो॑नो॒वृष्ट्या॑व॥५५॥ इ॒ष्टोय॒ज्ञः॥ इ॒ष्टोय॒ज्ञोभृगु॑भिराशी॒र्द्दाव
सु॑भिः॥ तस्य॑नऽइ॒ष्टस्य॑प्प्री॒तस्य॒द्रवि॑णे॒हाग॑मेः॥५६॥ इ॒ष्टोऽअ॒
ग्निः॥ इ॒ष्टोऽअ॒ग्निराहु॑तःपिपर्त्तु॒नऽइ॒ष्टꣳह॒विः॥ स्व॒गेदन्दे॒वेभ्यो॒
नमः॑॥५७॥ [७] यदाकू॑तात्॥ यदाकू॑तात्स॒मसु॑स्रोद्धृ॒दोवा॒म
नं॑सोवा॒सम्भृ॑तञ्च॒क्षु॑षोवा॥ तद॑नु॒प्प्रेत॑सुकृ॒तामु॑लो॒कंयत्र॒ऽऋष॑योज॒

ग्ग्मुःप्प्र॑थम॒जाःपु॑रा॒णाः ॥५८॥ ए॒तꣳस॑धस्थ ॥ ए॒तꣳस॑धस्थ॒परि॑तेद॒
दा॒मि॒यमा॒वहा॑च्छे॒व॒धिञ्जातवे॑दाः ॥ अ॒न्वा॒ग॒न्ताय॒ज्ञप॑ति॒र्व्वो॒ऽअत्र॒तꣳ
स्म॑ञ्जानीतप॒रमे॒व्व्यो॑मन् ॥ ५९ ॥ ए॒तञ्जा॑नाथ । प॒रमे॒व्व्यो॑म॒न्दे॒वाः॑
सधस्त्था॒व्वि॒द॒रू॒पम॑स्य ॥ य॒दा॒ग॒च्छा॑त्प॒थिभि॑र्द्दे॒व॒यानै॑रिष्टापू॒र्त्ते॑कृ॑ण
वा॒था॒विर॑स्मै ॥६०॥ उद्बु॑ध्यस्व ॥ उद्बु॑ध्यस्वाग्ग्ने॒प्प्रति॑जागृ॒हि॒त्त्वमि॑ष्टा
पू॒र्त्ते॑सꣳसृ॑जेथाम॒यञ्च॑ ॥ अ॒स्मिन्त्स॒धस्थे॒ऽअध्युत्त॑रस्मि॒न्विश्वे॑दे॒वाय
ज॑मानश्चसीदत ॥६१॥ ये॒न॒व्वह॑सि । स॒हस्र॑ँयेना॑ग्नेसर्व्ववे॒दसम् ॥ तेने॒मं

य्यज्ञन्नोनयस्वर्देवेषुगन्तवे ॥ ६२ ॥ प्रस्तरेणपरिधिना । स्रुचावेद्या
चबर्हिषा ॥ ऋचेमंय्यज्ञन्नोनयस्वर्देवेषुगन्तवे ॥ ६३ ॥ यद्दत्तम् ॥
यद्दत्तंय्यत्परादानंय्यत्पूर्त्तंय्याश्चदक्षिणाः ॥ तदग्निर्व्वैश्वकर्म्मणः
स्वर्देवेषुनोदधत् ॥ ६४ ॥ यत्रधाराः ॥ यत्रधाराऽअनपेतामधोर्घृतस्यचयाः
॥ तदग्निर्व्वैश्वकर्म्मणःस्वर्देवेषुनोदधत् ॥ ६५ ॥ अग्निरस्म्मि
॥ अग्निरस्म्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् ॥
अर्कस्त्रिधातूरजसोव्विमानोजस्रोघर्म्मोहविरस्म्मिनाम ॥ ६६ ॥ ऋचो

नामं ॥ ऋचोनामास्मियजूꣳषिनामास्मिसामानिनामास्मि ॥
येऽअग्नयꣳपाञ्चजन्याऽअस्याम्पृथिव्यामधि ॥ तेषामसित्वमुत्त
मःप्प्रनोजीवातवेसुव ॥६७॥[१०] वार्त्रंहत्त्यायशवसे । पृतनाषा
ह्यायच ॥ इन्द्रत्त्वावर्त्तयामसि ॥ ६८ ॥ सहदानुम्पुरुहूत । क्षियन्तं
महस्तमिन्द्रसम्पिणक्कुणारुम् ॥ अभिवृत्रंवर्द्धमानम्पियारुमपादमि
न्द्रतवसाजघन्थ ॥ ६९ ॥ विनः ॥ विनऽइन्द्रमृधोजहिनीचायच्छ
पृतन्यतः ॥ योऽअस्माँ२॥ऽअभिदासत्त्यधरङ्गमयातमः ॥ ७० ॥

मृगोन। भीमःकुचरोगिरिष्ठाःपरावतऽआजगन्थापरस्याः॥ सृकꣳ
सꣳशायपविमिन्द्रतिग्मंव्विशत्रूꣳन्ताड्ढिव्विमृधोनुदस्व॥ ७१॥ व्वैश्वा
नरोनः॥ व्वैश्वानरोनऽऊतयऽआप्प्रयातुपरावतः॥ अग्निर्न्नःसुष्टु
तीरुप॥ ७२॥ पृष्टोदिवि। पृष्टोऽअग्निःपृथिव्यांपृष्टोव्विश्वाऽओष
धीराविवेश॥ व्वैश्वानरःसहसापृष्टोऽअग्निःसनोदिवासरिषस्पातु
नक्तम्॥ ७३॥ अश्यामतम्॥ अश्यामतङ्काममग्नेतवोतीऽअश्या
मरयिꣳरयिवःसुवीरम्॥ अश्यामव्वाजमभिव्वाजयन्तोश्यामद्युम्न

मं॑जरा॒जरं॑न्ते ॥ ७४ ॥ व्व॒यन्ते॑ ॥ व्व॒यन्तें॑ऽअ॒द्यरं॑रि॒माहि॒कामं॑मु॒त्ता॒नहं॑
स्ता॒नमं॑सोप॒सद्द्यं॑ ॥ यजिं॑ष्ठे॒न॒मनं॑सायक्षि॑दे॒वान॑स्रे॑धता॒मन्न्मं॑ना॒व्वि
प्प्रों॑ऽअग्ने ॥ ७५ ॥ धा॒म॒च्छद॒ग्निः ॥ धा॒म॒च्छद॒ग्निरिन्द्रों॑ब्र॒ह्मादे॒
वो॒बृह॒स्प्पति॑÷ ॥ सचें॑तसो॒व्वि॑श्वें॑दे॒वाय॒ज्ञम्प्रावं॑न्तुनꣳशु॒भे ॥ ७६ ॥
त्त्वंय्यं॑विष्ठ । दा॒शुषो॒नॄँःऽपाहि॑शृ॒णु॒धीगिरं॑÷ ॥ रक्षां॑तो॒कमु॒तत्त्मना॑
॥ ७७ ॥ [ १० ] इतिश्रीवाजसनेयसंहितायामष्टादशोऽध्यायः

॥ १८ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ स्वाद्वीन्त्वैकादश,

देवायज्ञंविꣳशतिः,सुरावन्तꣳसप्तदशो,दीरतान्त्रयोदशा,च्याजानुर्द्दश,सोमोराजाष्टौ,सीसेनतन्त्रꣳषोडश,सप्तपंचनवतिः॥हरिःॐ॥ स्वा॒द्वीन्त्वा॑ । स्वा॒दु॒ना॑ती॒व्रान्ती॒व्रेणा॒मृता॑म॒मृते॑न ॥ मधु॑मती॒म्मधु॑मता सृ॒जा॒मि॒सꣳसोमे॑न ॥ सोमो॑स्य॒श्विभ्यां॑पच्यस्व॒सर॑स्वत्यैपच्य॒स्वेन्द्रा॑यसु॒त्राम्णे॑पच्यस्व ॥ १ ॥ परी॒तः ॥ परी॒तोषि॑ञ्चतासु॒तꣳसो॒मो॒यऽउ॑त्त॒मꣳह॒विः ॥ द॒ध॒न्वायोन॒र्यो॑ऽअ॒प्प्स्व॒न्तरासु॒षाव॒सोम॒मद्रि॑भिः ॥ २ ॥ वा॒योःपू॒तः । प॒वित्रे॑णप्र॒त्यङ्क्सोमो॒ऽअति॑द्रुतः ॥

[ॐ स्वाद्वीन्त्वा, इत्यस्य प्रजापतिर्ऋषिरिन्द्रो देवता गायत्री छन्दः सर्वयज्ञफलप्राप्तिकामः –
पाठे विनियोगः॥१९॥]

इन्द्रंस्यसुज्ज्यꣳसखां ॥ व्वायोःपूतःपवित्रेंणप्प्राङ्सोमोऽअतिंद्रुतꣳ ॥
इन्द्रंस्यसुज्ज्यꣳसखां ॥ ३ ॥ पुनातिंते । परिस्रुतꣳसोमꣳसूर्य्यस्यदु
हिता ॥ व्वारेणशश्वंतातनां ॥ ४ ॥ ब्रह्मंक्षत्रम् ॥ ब्रह्मंक्षत्रम्पंवते
तेजंऽइन्द्रियꣳसुरंयासोमंःसुतऽआसुंतोमदांय ॥ शुक्रेणंदेवदेव
ताःपिपृग्ग्धिरसेनान्नंय्ँयजंमानायधेहि ॥ ५ ॥ कुविदुङ्ग । यवंमन्तो
यवंञ्चिद्यथादान्त्यंनुपूर्व्वंव्वियूयं ॥ इहेहैषाङ्कृणुहिभोजंनानियेबर्हिं
षोनमंऽउक्तिंय्ँयजंन्ति ॥ उपयामगृंहीतोस्यश्विभ्यांन्त्वासरंस्वत्त्यै

त्त्वेन्द्रा॑यत्त्वासु॒त्राम्म्ण॑ऽए॒षते॒योनि॒स्तेज॑सेत्त्वाव्वी॒र्य्या॑यत्त्वा॒बला॑य
त्त्वा॥ ६ ॥नाना॒हि।वा॑न्दे॒वहि॑त॒ꣳसद॑स्कृ॒तम्मासꣳसृ॑क्षाथाम्पर॒मेव्यो॑
मन् ॥ सुरा॒त्त्वम॑सिशु॒ष्म्मिणी॒सोम॑ऽए॒षमामा॑हिꣳसी॒ः स्वा॑य्योनि
मावि॒शन्ती॑ ॥ ७ ॥ उ॒प॒या॒मगृ॑हीतो॑सि ॥ उ॒प॒या॒मगृ॑हीतो॑स्याश्वि॒
नन्तेज॑ः सारस्व॒तंव्वी॒र्य्य॑मै॒न्द्रम्बल॑म् ॥ ए॒षते॒योनि॒म्मौदा॑यत्त्वान॒न्दा
य॑त्त्वा॒मह॑सेत्त्वा ॥ ८ ॥ तेजो॑सि ॥ तेजो॑सि॒तेजो॒मयि॑धेहिव्वी॒र्य्य॑म
सिव्वी॒र्य्य॑म्मयि॑धेहि॒बल॑मसि॒बल॒म्मयि॑धे॒ह्योजो॒स्योजो॒मयि॑धेहि

म॒न्युर॑सिम॒न्युम्मयि॑धेहि॒सहो॑सि॒सहो॒मयि॑धेहि ॥९॥ याद्व्या॒ग्घ्रम् ॥
याद्व्या॒ग्घ्रं॑व्विषू॑चिको॒भौ॑व्वृकं॑ञ्च॒रक्षं॑ति ॥ श्ये॒नम्प॑त॒त्रिण॑ꣳ सि॒ꣳह॒ꣳ से
मम्पा॒त्त्वꣳह॑सः ॥१०॥ यदा॑पि॒पेष॑ । मा॒तर॑म्पु॒त्रःप्प्रमु॑दितो॒धय॑न् ॥
ए॒तत्त्तद॑ग्ग्ने॒ऽअनृणो॒भ॑वा॒म्म्यह॑तौपि॒तरौ॒मया॑ ॥ स॒म्पृच॑स्त्थ॒सम्मा॑भ॒
द्रे॒णं॑पृङ्क्त॒व्वि॒पृच॑स्त्था॒व्विमा॑पा॒प्मना॑पृङ्क्त ॥११॥ [११] ॥ दे॒वाय॒ज्ञम् ॥
दे॒वाय॒ज्ञम॑तन्न्वतभेष॒जम्भि॒षजा॒श्विना॑ ॥ व्वा॒चासर॑स्वतीभि॒षगिन्द्रा॑
येन्द्रि॒याणि॒दध॑तः ॥१२॥ दी॒क्षायै॑रू॒पम् ॥ दी॒क्षायै॑रू॒पꣳ शष्पा॑

णिष्प्रायणीयस्यतोक्मानि ॥ क्रयस्यरूपꣳसोमस्यलाजाःसोमाꣳशवोमधु ॥ १३ ॥ आतिथ्यरूपम्मासरम् ॥ आतिथ्यरूपम्मासरम्महावीरस्यनग्नहुः ॥ रूपमुपसदामेतत्तिस्रोरात्रीःसुरासुता ॥ १४ ॥ सोमस्यरूपम् ॥ सोमस्यरूपङ्क्रीतस्यपरिस्रुत्परिषिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳसरस्वत्या ॥ १५ ॥ आसन्दीरूपम् ॥ आसन्दीरूपꣳराजासन्द्यैवेद्यैकुम्भीसुराधानी ॥ अन्तरऽउत्तरवेद्यारूपङ्कारोतरोभिषक् ॥ १६ ॥ वेद्यावेदिः ॥ वेद्यावे

दिःसमाप्प्यतेबर्हिषाबर्हिरिन्द्रियम् ॥ सूपेनसूपऽआप्प्यतेप्प्रणीतोऽ
अग्निरग्निना ॥ १७॥ हविर्द्धानंऽयत् ॥ हविर्द्धानंऽयदश्श्विनाग्नीद्ध्रं
ऽयत्त्सरस्वती ॥ इन्द्रायैन्द्रꣳसदस्कृतम्पत्नीशालङ्गार्हपत्त्यः॥ १८॥
प्प्रैषेभिःप्प्रैषान् ॥ प्प्रैषेभिःप्प्रैषानाप्प्नोत्त्याप्प्रीभिराप्प्रीर्ऽयज्ञस्य ॥
प्प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ॥ १९ ॥ पशुभिःपशून् ॥
पशुभिःपशूनाप्प्नोतिपुरोडाशैर्हवीꣳष्ष्या ॥ च्छन्दोभिःसामिधेनी
ऽर्याज्ज्याभिर्व्वषट्क्कारान् ॥ २० ॥ धानाःकरम्भःसक्क्तवःपरीवापः

पयोदधि ॥ सोमस्यरूपꣳहविषऽआमिक्षाव्वाजिनम्मधु ॥ २१ ॥
धानानाꣳरूपम् ॥ धानानाꣳरूपङ्कुवलम्परीवापस्यगोधूमाः ॥ स
क्तूनाꣳरूपम्बदरमुपवाकाःकरम्भस्य ॥ २२ ॥ पयसोरूपम् ॥ पय
सोरूपंय्यद्यवादध्नोरूपङ्कर्कन्धूनि ॥ सोमस्यरूपंव्वाजिनꣳसौम्म्य
स्यरूपमामिक्षा ॥ २३ ॥ आश्श्रावय ॥ आश्श्रावयेतिस्तोत्रियाः
प्रत्याश्श्रावोऽअनुरूपः ॥ यजेतिधाय्यारूपम्प्रगाथायेयजामहाः
॥ २४ ॥ अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽऋचैरुक्थानाꣳरूपम्पदैरा

प्नोतिनिविदः ॥ प्प्रणवैःशस्त्राणाꣳरूपम्पयसासोमऽआप्प्यते
॥ २५ ॥ अश्विभ्भ्याम्प्रातꣳसवनम् ॥ अश्विभ्भ्याम्प्रातꣳसवनमिन्द्रे
णैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवꣳसरस्वत्त्यातृतीयमाप्प्तꣳसवनम्
॥ २६ ॥ व्वायव्यैर्व्वायव्यानि ॥ व्वायव्यैर्व्वायव्यान्याप्नोतिसतेनद्रो
णकलशम् ॥ कुम्भीभ्भ्याम्मम्भृणौसुतेस्थालीभिस्थालीराप्नोति ॥ २७ ॥
यजुर्भ्भिराप्प्यन्ते ॥ यजुर्भ्भिराप्प्यन्तेग्ग्रहाग्ग्रहैस्तोमाश्चविष्टुतीः ॥
च्छन्दोभिरुक्थाशस्त्राणिसाम्नावभृथऽआप्प्यते ॥ २८ ॥ इडाभिभ्भ

क्षान् ॥ इडा॑भिर्भ॒क्षाना॑प्नोतिसू॒क्तवा॒केना॒शिषः॑ ॥ शं॒युना॑पत्नीसंय्या॒जान्त्स॑मिष्ट॒य॒जुषा॑स॒ꣳस्थाम् ॥ २९ ॥ व्र॒तेन॑दी॒क्षाम् ॥ व्र॒तेन॑दी॒क्षामा॑प्नोतिदी॒क्षया॑प्नोति॒दक्षि॑णाम् ॥ दक्षि॑णाश्श्र॒द्धामा॑प्नोतिश्श्र॒द्धया॑स॒त्त्यमा॑प्प्यते ॥ ३० ॥ ए॒ताव॑द्रू॒पम् ॥ ए॒ताव॑द्रू॒पंय्य॒ज्ञस्य॒यद्दे॒वैर्ब्रह्म॑णाकृ॒तम् ॥ तदे॒तत्त्सर्व्वं॑माप्नोतिय॒ज्ञेसौ॑त्राम॒णीसु॒ते ॥ ३१ ॥ [२०] सुरा॑वन्तम्बर्हि॒षद॑म् ॥ सुरा॑वन्तम्ब॑र्हि॒षद॒ꣳसु॒वीरं॑य्य॒ज्ञꣳहि॑न्वन्तिमहि॒षानमो॑भिः ॥ दधा॑ना॒ःसोम॑न्दि॒विदे॒वता॑सु॒मदे॒मेन्द्रं॒य्यज॑मानाःस्व॒र्क्काः

॥ ३२ ॥ यस्ते ॥ यस्तेरसꣳसम्भृंतऽओषंधीषुसोमंस्यशुष्मꣳसुरंयासुत
स्यं ॥ तेनंजिन्वयजंमानम्मदेंनसरंस्वतीमश्विनाविन्द्रंमग्निम् ॥ ३३ ॥
यमश्विनां ॥ यमश्विनानमुंचेरासुरादधिसरंस्वत्यसुंनोदिन्द्रियायं ॥
इमन्तꣳशुक्रम्मधुंमन्तमिन्दुꣳसोमꣳराजांनमिहभंक्षयामि ॥ ३४ ॥
यदत्रं । रिप्तꣳरसिनंः सुतस्ययदिन्द्रोऽअपिंबच्छचींभिꣳ ॥ अहन्त
दंस्यमनंसाशिवेनसोमꣳराजांनमिहभंक्षयामि ॥ ३५ ॥ पितृब्भ्यंः
स्वधायिब्भ्यंः । स्वधानमंः पितामहेब्भ्यंः स्वधायिब्भ्यंः स्वधा

नमःप्प्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमः ॥ अक्षन्न्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धध्वम् ॥ ३६ ॥ पुनन्तुमा । पितरःसोम्म्यासःपुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषाविश्श्वमायुर्व्यश्श्नवै ॥ ३७ ॥ अग्नऽआयूँषि । पवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ३८ ॥ पुनन्तुमा । देवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्श्वाभूतानिजा

तवेदꣳपुनीहिमा ॥३९॥ पवित्रेणपुनीहि। माशुक्रेणदेवदीद्यत् ॥ अ
ग्नेक्रत्वाक्रतूँ१॥ऽरनु॥४०॥यत्ते। पवित्रमर्च्चिष्यग्नेव्विततमन्तरा ॥
ब्रह्मतेनपुनातुमा ॥ ४१ ॥ पवमानꣳसः ॥ पवमानꣳसोऽअद्यन÷
पवित्रेणव्विचर्षणिꣳ॥ यःपोतासपुनातुमा ॥ ४२ ॥ उभाभ्यान्देव।
सवितꣳपवित्रेणसवेनच ॥ माम्पुनीहिव्विश्वत÷ ॥ ४३ ॥ व्वैश्वदेवी
पुनती। देव्यागाद्यस्यामिमाबह्व्यस्तन्वोव्वीतपृष्ठाꣳ ॥ तयामदन्तꣳ
सधमादेषुव्वयꣳस्यामपतयोरयीणाम् ॥४४॥ येसमानाः। समनसꣳ

पितरोयमराज्ये ॥ तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुकल्प्पताम् ॥४५॥
येसमानाः । समनसोजीवाजीवेषुमामकाः ॥ तेषाꣳश्रीर्म्मयिक
ल्प्पतामस्मिँल्लोकेशतꣳसमाः ॥ ४६ ॥ द्वेसृती ॥ द्वेसृतीऽअ
शृणवम्पितॄणामहन्देवानामुतमर्त्त्यानाम् ॥ ताब्भ्यामिदंविश्वमे
जत्समेतियदन्तरापितरम्मातरञ्च ॥ ४७ ॥ इदꣳहविः ॥ इदꣳह
विःप्रजननम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये ॥ आत्मसनिप्र
जासनिपशुसनिलोकसन्यभयसनि ॥ अग्निःप्रजाम्बहुलाम्मेक

रोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्त ॥४८॥ [१७] उदीरताम् ॥ उदी
रतामवरऽउत्त्परासऽउन्मध्यमाः पितरः सोम्म्यासः ॥ असुंय्यऽ
ईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ ४९ ॥ अङ्गिरसोनः ।
पितरोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्म्यासः ॥ तेषांव्वयꣳसुमतौ
यज्ञियानामपिभद्रेसौमनसेस्याम ॥ ५० ॥ येनः ॥ येनःपूर्व्वेपित
रःसोम्म्यासोनूहिरेसोमपीथंव्वसिष्ठाः ॥ तेभिर्य्यमःसꣳरराणोह
वीꣳष्युशन्नुशद्भिःप्रतिकाममत्तु ॥ ५१ ॥ त्त्वꣳसोम ॥ त्त्वꣳसो

म॒प्प्रचि॑कितोमनी॒षात्त्वꣳरजि॑ष्ठमनु॑नेषि॒पन्था॑म् ॥ तव॒प्प्रणी॑तीपि॒
तरो॑नऽइन्द्रोदे॒वेषु॒रत्न॑मभजन्त॒धीराः॑ ॥ ५२ ॥ त्त्वया॒हि ॥ त्त्वया॒
हिनः॑पि॒तरः॑सोम॒पूर्व्वे॑कर्म्मा॑णिच॒क्रुःप॑वमान॒धीराः॑ ॥ व॒न्वन्नवा॑तः
परि॒धीँ १॥ऽरपो॑र्ण्णुव्वी॒रेभि॒रश्वै॑र्म्म॒घवा॑भवानः ॥ ५३ ॥ त्त्वꣳसो॑म ।
पि॒तृभिः॑संव्विदा॒नोनु॒द्ध्यावा॑पृथि॒वीऽआत॑तन्थ ॥ तस्म्मै॑तऽइन्द्रोह॒
वि॒षा॑व्विधेमव्व॒यꣳस्या॑म॒पत॑योरयी॒णाम् ॥ ५४ ॥ बर्हि॑षदःपितरः ॥
बर्हि॑षदःपितरऽऊ॒त्त्य॒र्व्वागि॒मावो॑ह॒व्याचं॑कृमाजु॒षद्ध्व॑म् ॥ तऽआग॒ता

वंसाशन्तंमेनाथांनꣳशंय्योरंरपोदंधात ॥ ५५ ॥ आहम् ॥ आहम्पि
तॄन्त्सुंविदत्राँ२॥ऽअविंत्त्सिनपांतञ्चविक्क्रमंणञ्चविष्ष्णोंः ॥ बर्हिषदो
येस्वधयांसुतस्यभजंन्तापित्त्वस्तऽइहागंमिष्ठाꣳ ॥ ५६ ॥ उपंहूताꣳ
पितरंः । सोम्म्यासोंबर्हिष्ष्येषुनिधिषुंप्प्रियेषुं ॥ तऽआगंमन्तुतऽइ
हश्श्रुंवन्त्वधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५७ ॥ आयंन्तु । नꣳपितरंः
सोम्म्यासोंग्निष्ष्वात्ताःपथिभिंर्द्देवयानैंः ॥ अस्म्मिन्यज्ञेस्वधयाम
दन्तोधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५८ ॥ अग्निष्ष्वात्ताꣳपितरꣳ ॥

अग्नि॑ष्वात्ताःपितर॒ऽएहग॑च्छत॒सद॑ःसदःसदतसुप्प्रणीतयः ॥ अ॒
त्ताह॒वीꣳषि॒प्प्रय॑तानिब॒र्हि॑ष्य॒था॑र॒यिꣳसर्व्व॑वीरन्द॒धातन ॥ ५९ ॥
येऽअ॑ग्निष्वा॒त्ताः ॥ येऽअ॑ग्निष्वा॒त्तायेऽअन॑ग्निष्वात्ता॒मद्ध्ये॑दि॒
वःस्व॒धया॑मा॒दय॑न्ते ॥ तेभ्य॑ःस्व॒राडसु॑नीतिमे॒तां॑यथा॑व॒शन्त॒न्व॒
ङ्कल्प्पयाति ॥ ६० ॥ अ॒ग्नि॒ष्वा॒त्ता॒न्नृ॑तु॒मत॑ः ॥ अ॒ग्नि॒ष्वा॒त्ता॒न्नृ॑तु॒म
तो॑हवामहेनाराश॒ꣳसेसो॑मपी॒थंयऽआ॒शुः ॥ तेनो॒विप्प्रा॑सꣳसु॒हवा॑
भवन्तुव्व॒यꣳस्या॑म॒पत॑योरयी॒णाम् ॥ ६१ ॥ [ १३ ] आज्ज्या॒जानु॑।

दक्षिणतोनिषद्येमंय्यज्ञमभिगृणीतविश्वे ॥ माहिꣳसिष्टपितरःके
नचिन्नोयद्वऽआगःपुरुषताकराम ॥ ६२ ॥ आसीनासोऽअरुणी
नाम् ॥ आसीनासोऽअरुणीनामुपस्थेरयिन्धत्तदाशुषेमर्त्त्याय ॥ पुत्रे
भ्यःपितरस्तस्यवस्वꣳप्प्रयच्छततऽइहोर्ज्जन्दधात ॥ ६३ ॥ यमग्ने ।
कव्यवाहनत्त्वञ्चिन्मन्यसेरयिम् ॥ तन्नोगीर्भिःश्रवाय्यन्देवत्त्रापन
यायुजम् ॥ ६४ ॥ योऽअग्निः । कव्यवाहनꣳपितॄन्यक्षदृतावृधः ॥
प्रेदुहव्यानिव्वोचतिदेवेभ्यश्चपितृभ्यऽआ ॥६५॥ त्त्वमग्ने ॥ त्त्वम

ग्नऽईडितःकंव्यवाहनावांड्ढव्यानिंसुरभीणिंकृत्त्वी ॥ प्रादांःपितृ
भ्यंःस्वधयातेऽअंक्षन्नाद्धित्त्वन्देंवप्प्रयंताहवीꣳषि ॥६६॥ येचं ॥ ये
चेहपितरोयेचनेहयाँश्चंविद्मयाँ२॥ऽउंचनप्प्रंविद्म ॥ त्त्वंवेंत्त्थयतिते
जांतवेदःस्वधाभिर्य्यंज्ञꣳसुकृंतञ्जुषस्व॥ ६७॥ इदम्पितृभ्यंः ॥ इद
म्पितृभ्योनमोंऽअस्त्वद्ययेपूर्व्वांसोयऽउपंरासऽईयुः ॥ येपार्थिंवेर
जस्यानिषंत्तायेवांनूनꣳसुंवृजनांसुविक्षु॥६८॥अधायथां।नःपितरः
परांसःप्प्रत्नासोंऽअग्नऽऋतमांशुषाणाः ॥ शुचीदंयन्दीधिंतिमुक्थ

शासꣳक्षामांभिन्दन्तौऽअरुणीरपंब्रन् ॥ ६९ ॥ उशन्तंस्त्वा ॥ उशन्तं
स्त्वानिधीमह्युशन्तꣳसमिंधीमहि॥ उशन्नुंशतऽआवंहपितॄन्हविषेऽ
अत्तंवे॥ ७०॥ अपाम्फेनेंन॥ अपाम्फेनेंननमुचेꣳशिरंऽइन्द्रोदंवर्त्तयꣳ ॥
विश्वायदजंयस्पृधं ÷ ॥७१॥ [१०] सोमोराजां ॥ सोमोराजामृतꣳ
सुतऽऋजीषेणांजहान्मृत्त्युम् ॥ ऋतेनंसत्त्यमिंन्द्रियम्विपानꣳशु
क्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७२ ॥ अद्भ्यःक्षीरम् ॥
अद्भ्यःक्षीरंव्यंपिबत्त्कुङ्ङाङ्गिरसोधिया॥ ऋतेनंसत्त्यमिंन्द्रियंविपानꣳ

शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७३॥ सोम॑म॒द्भ्यः ॥
सोम॑म॒द्भ्यो व्य॑पिब॒च्छन्द॑सा ह॒ꣳसः शु॑चि॒षत् ॥ ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यं वि॒
पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥ ७४ ॥ शतम् ॥
शक्र
॥११००॥ अन्ना॑त्परि॒स्रुतः॑ ॥ अन्ना॑त्परि॒स्रुतो॒ रस॒म्ब्रह्म॑णा॒ व्य॑पिब
त्क्ष॒त्रम्पय॒ः सोम॑म्प्र॒जाप॑तिः ॥ ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यं वि॒पान॑ꣳ शु॒क्रम
न्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥ ७५ ॥ रेतो॒ मूत्र॑म् ॥ रेतो॒ मू
त्रं वि ज॑हाति॒ योनि॑म्प्रवि॒शदि॑न्द्रि॒यम् ॥ गर्भो॑ ज॒रायु॒णावृ॑त॒ऽउल्ब॑ञ्ज

हातिजन्मना ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥७६॥ दृष्ट्वारूपे। व्याकरोत्त्सत्त्यानृतेप्र
जापतिः॥ अश्रद्धामनृतेदधाच्छ्रद्धाꣳसत्त्येप्रजापतिः॥ ऋतेनसत्त्य
मिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु
॥७७॥व्वेदेनरूपे। व्यपिबत्त्सुतासुतौप्रजापतिः॥ ऋतेनसत्त्यमिन्द्र
यंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७८ ॥
दृष्ट्वापरिस्रुतः ॥ दृष्ट्वापरिस्रुतोरसꣳशुक्रेणशुक्रंव्यपिबत्त्पयꣳसोमं

म्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रि
यमिदम्पयोमृतम्मधु ॥ ७९ ॥ [८] सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्म
नसामनीषिणऽऊर्ण्णासूत्रेणकवयोव्वयन्ति ॥ अश्विनायज्ञꣳसविता
सरस्वतीन्द्रस्यरूपंव्वरुणोभिषज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳ
शचीभिस्तिस्रोदधुर्द्देवताःसꣳरराणाः ॥ लोमानिशष्पैर्ब्बहुधानतो
क्मभिस्त्वगस्यमाꣳसमभवन्नलाजाः ॥ ८१ ॥ तदश्विना । भिषजा
रुद्रवर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम् ॥ अस्थिमज्जानम्मासरैः

कारोतरेणदधतोगवान्त्वचि ॥ ८२ ॥ सरस्वतीमनसा । पेशलंव्वसुना
सत्याब्भ्यांव्वयतिदर्श्शतंव्वपु÷ ॥ रसम्परिस्रुतानरोहितन्नग्नहुर्द्धीरस्त
सरन्नवेम॥८३॥पयसाशुक्रम्॥ पयसाशुक्रममृतञ्जनित्रꣳसुरयामूत्रा
ज्जनयन्तरेत÷॥अपामतिन्दुर्म्मतिम्बाधमानाऽऊवध्यंव्वातꣳसब्वन्त
दारात्॥८४॥ इन्द्र÷सुत्रामा॥इन्द्र÷सुत्रामाहृदयेनसत्यम्पुरोडाशे
नसविताजजान॥यकृत्क्लोमानंव्वरुणोभिषज्ज्यन्मतस्नेव्वायव्व्यैर्न्नमि
नातिपित्तम् ॥ ८५ ॥ आन्त्राणिस्त्थालीः ॥ आन्त्राणिस्त्थालीर्म्म

धुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः ॥ श्येनस्यपत्रन्नप्लीहाश
चीभिरासन्दीनाभिरुदरन्नमाता ॥ ८६ ॥ कुम्भोव्वनिष्ठुः ॥ कुम्भो
व्वनिष्ठुर्ज्जनिताशचीभिर्य्यस्मिन्नग्ग्रेयोन्न्याङ्गर्भोऽअन्तः ॥ प्लाशि
र्व्यक्तःशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृब्भ्यः ॥ ८७ ॥ मु
खꣳसत् ॥ मुखꣳसदस्यशिरऽइत्त्सतेनजिह्वापवित्रमश्विनासन्त्सर
स्वती ॥ चप्पन्नपायुर्ब्भिषगस्यवालोव्वस्तिर्न्नशेपोहरसातरस्वी ॥ ८८ ॥
अश्विब्भ्याञ्चक्षुः ॥ अश्विब्भ्याञ्चक्षुरमृतङ्ग्रहाब्भ्याञ्छागेनतेजो

हविषांशृतेनं ॥ पक्ष्माणिगोधूमैःकुवलैरुतानिपेशोनशुक्क्रमसितंव्व
साते ॥ ८९ ॥ अविर्न्न । मेषोनासिव्वीर्य्यायप्प्राणस्यपन्थांऽअमृतो
ग्ग्रहाब्भ्याम् ॥ सरंस्वत्त्युपवाकैर्व्व्यानन्नस्यानिबर्हिर्ब्बदरैर्ज्जजान ॥ ९० ॥
इन्द्रंस्यरूपम् ॥ इन्द्रंस्यरूपमृंषभोबलांयकर्ण्णाभ्याꣳश्रोत्त्रंममृतं
ग्रहाब्भ्याम् ॥ यवानबर्हिर्ब्भ्रुविकेसंराणिकर्क्कन्धुंयज्ज्ञेमधुंसारघम्मु
खांत् ॥ ९१ ॥ आत्मन्नुपस्थें ॥ आत्मन्नुपस्थेनव्वृकंस्यलोममु
खेश्म्मश्श्रूंणिनव्व्यांघ्रलोम ॥ केशानशीर्षन्यशंसेश्श्रियैशिखांसिंह

हस्यलोमत्त्विषीरिन्द्रियाणि ॥ ९२॥ अङ्गान्यात्मन् ॥ अङ्गान्या
त्मन्भिषजातदश्विनात्मानमङ्गैःसमधात्सरस्वती ॥ इन्द्रस्यरू
पꣳशतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः ॥ ९३ ॥ सरस्वती
योन्याम् ॥ सरस्वतीयोन्याङ्गर्भमन्तराश्विभ्याम्पत्नीसुकृतम्बि
भर्त्ति ॥ अपाꣳरसेनव्वरुणोनसाम्नेन्द्रꣳश्रियैजनयन्नप्सुराजा
॥ ९४ ॥ तेजःपशूनाम् ॥ तेजःपशूनाꣳहविरिन्द्रियावत्परिस्रु
तापयसासारघम्मधु ॥ अश्विभ्यान्दुग्धम्भिषजासरस्वत्यासुता

सुताब्भ्यांममृतꣳसोमऽइन्दुं÷ ॥ ९५ ॥ [ १६ ] इतिश्रीवाजसनेयसं
हितायांएकोनविंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाक्सूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदश, यद्देवादशा, भ्यादधाम्यष्टौ,
योभूतानाञ्चतस्रः, समिद्धऽइन्द्रऽएकादश, ऽआयात्वष्टौ, समिद्धो
ऽअग्निर्द्वादशा, श्विनाहविस्त्रयोदशा, श्विनातेजसैकादश, नवनवतिः॥
हरिः ॐ॥क्षत्रस्ययोनिं÷॥क्षत्रस्ययोनिंरसिक्षत्रस्यनाभिंरसि॥मात्त्वां
हिꣳसीन्मामांहिꣳसीꣳ ॥१॥ निषंसाद। धृतव्व्रंतोव्वरुंणꣳपस्त्यास्वा ॥

[ॐ क्षत्रस्य योनिरिति वासुदेव ऋषिरिन्द्रो देवता जगती छन्दः सौख्यफल् प्राप्ते कामः पाठे विनियोगः ॥२०]

साम्म्राज्यायसुक्रतुः ॥ मृत्त्योःपाहिविद्योत्त्पाहि ॥ २ ॥ देवस्यत्त्वा ।
सवितुःप्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्ष्णोहस्ताभ्याम् ॥ अश्विनोर्भै
षज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्य्या
यान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिञ्चामि
॥ ३ ॥ कोसि । कतमोसिकस्मैत्त्वाकायत्त्वा ॥ सुश्लोकसुमङ्ग
लसत्त्यराजन् ॥ ४ ॥ शिरोमे ॥ शिरोमेश्रीर्य्यशोमुखन्त्विषिःके
शाश्चश्मश्रूणि ॥ राजामेप्प्राणोऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रं

सं. ३२

म्॥ ५ ॥ जिह्वामे। भद्रंव्वाङ्महोमनोमन्युःस्वराड्भामः ॥ मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्त्रम्मेसहः ॥ ६ ॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मव्वीर्य्यम् ॥ आत्त्माक्षत्त्रमुरोमम ॥७॥ पृष्ठीर्म्मे । राष्ट्रमुदरꣳसौग्ग्रीवाश्श्रोणी । ऊरूऽअरत्त्नीजानुनीविशोमेङ्गानिसर्व्वतः ॥ ८ ॥ नाभिर्म्मे । चित्तंव्विज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आनन्दनन्दावाण्डौमेभगꣳसौभाग्ग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मिविशिराजाप्प्रतिष्ठितः ॥ ९ ॥ प्प्रतिक्षत्त्रे ।

प्प्रति॑तिष्ठामिरा॒ष्ट्रेप्प्रत्त्य॑श्वे॑षुप्प्रति॑तिष्ठामि॒गोषु॑ ॥ प्प्रत्त्यङ्गे॑षुप्प्रति॑ति
ष्ठाम्म्या॒त्त्मन्प्प्रति॑प्प्रा॒णेषुप्प्रति॑तिष्ठामिपुष्टे॒प्प्रति॒द्यावा॑पृथि॒व्योःप्प्र
ति॑तिष्ठामिय॒ज्ञे ॥ १० ॥ त्र॒यादे॒वाः ॥ त्र॒यादे॒वाऽएका॑दशत्र॒यस्त्रि॒ꣳ
शाःसु॒राध॑सः ॥ बृ॒ह॒स्प्पति॑पुरोहितादे॒वस्य॑सवि॒तुःस॒वे ॥ दे॒वादे॒वैर॑
वन्तुमा ॥ ११ ॥ प्र॒थ॒माद्वि॒तीयै॑÷ ॥ प्र॒थ॒माद्वि॒तीयै॑र्द्वि॒तीया॑स्तृ॒तीयै॑
स्तृ॒तीया॑÷स॒त्त्येन॑स॒त्त्यं॑य॒ज्ञेन॑य॒ज्ञोय॒जु॑र्भि॒र्य्यजू॑ꣳषि॒सामा॑भि॒ः सा
मा॑न्यृ॒ग्भि॒र्ऋ॑च÷पुरो॑नुवा॒क्या॒भि॒ःपुरो॑नुवा॒क्या॒या॒ज्या॒भि॒र्य्या

ज्याव्वषट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूः
स्वाहा ॥ १२ ॥ लोमानिप्प्रयतिः ॥ लोमानिप्प्रयतिर्म्ममत्त्वङ्मऽ
आनतिरागतिः ॥ माᳪसम्मऽउपनतिर्व्वस्वास्त्थिमज्जामऽआनतिः
॥ १३ ॥ [ १३ ] यद्देवाः ॥ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम्
अग्निर्म्मातस्म्मादेनसोव्विश्श्वान्मुञ्चत्त्वᳪहसः ॥ १४ ॥ यदिदिवा ॥
यदिदिवायदिनक्तमेनाᳪसिचकृमाव्वयम् ॥ व्वायुर्म्मातस्म्मादेन
सोव्विश्श्वान्मुञ्चत्त्वᳪहसः ॥ १५ ॥ यदिजाग्ग्रत् ॥ यदिजाग्ग्रद्यदि

स्वप्नऽएनांꣳसिचकृमाव्वयम् ॥ सूर्य्योमातस्म्मादेनसोव्विश्श्वान्मु
ञ्चत्त्वꣳहसः ॥१६॥ यद्ग्रामे ॥ यद्ग्रामेयदरण्ण्येयत्त्सभायांयदिन्द्रि
ये॥ यच्छूद्द्रेयदर्य्येयदेनश्चकृमाव्वयंयदेकस्याधिधर्म्मणितस्यावयज
नमसि ॥१७॥ यदापः ॥ यदापोऽअघ्न्याऽइतिव्वरुणेतिशपामहेततो
व्वरुणनोमुञ्च ॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवै
र्द्देवकृतमेनोयक्ष्यवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णोदेवरिषस्प्पाहि ॥१८॥
समुद्रेते ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वाव्विशन्त्वोषधीरुतापः ॥

सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयꣳ सन्तुदुर्म्मि॒त्रि॒यास्तस्मै॑सन्तु॒यो॒
स्मान्द्वेष्टि॒यञ्च॑व॒यन्द्वि॒ष्मः ॥ १९ ॥ द्रु॒प॒दादि॑वमुमुचा॒नः । स्वि॒न्नः
स्ना॒तोमला॑दिव ॥ पू॒तम्प॒वित्रे॑णे॒वाज्य॒माप॑÷शु॒न्धन्तु॒मैन॑सꣳ ॥ २० ॥
उद्वयम् ॥ उद्व॒यन्तम॑स॒स्प्परि॒स्व॒ꣳपश्य॑न्त॒ऽउत्त॑रम् ॥ दे॒वन्दे॑व॒त्रासू
र्य्य॒मग॑न्म॒ज्ज्योति॑रुत्त॒मम् ॥ २१ ॥ अ॒पोऽअ॒द्य ॥ अ॒पोऽअ॒द्यान्व॑
चारिष॒ह्वरसै॑न॒सम॑सृक्ष्महि ॥ पर्य॑स्वानग्न॒ऽआग॑म॒न्तम्मा॒सꣳसृ॑ज॒
वर्च्चै॑सा॒प्प्र॒जया॑च॒धनै॑नच ॥ २२ ॥ एधो॑सि ॥ एधो॑स्येधिषी॒महि॑स॒मि

दंसितेजोंसितेजोमयिंधेहि।।समाववर्त्तिपृथिवीसमुषाःसमुसूर्य्यं÷ ॥
समुविश्वमिदञ्जगत् ॥ वैश्वानरज्ज्योतिर्भूयासंविभून्कामान्व्यश्न
वैभूःस्वाहा ॥ २३ ॥ [ १० ]॥ अब्भ्यादधामि । समिधमग्नेव्व्रतप
तेत्त्वयिं ॥ व्व्रतञ्चश्रद्धाञ्चोपैमीन्धेत्वांदीक्षितोऽअहम् ॥ २४ ॥ य
त्रब्रह्मं । चक्षत्रञ्चसम्म्यञ्चौचरतꣳसह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंऽय
त्रंदेवाःसहाग्निनां ॥ २५ ॥ यत्रेन्द्रं÷ ॥ यत्रेन्द्रश्चव्वायुश्चसम्म्यञ्चौ
चरंतꣳसह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंऽयत्रंसेदिर्न्नविद्यते ॥ २६ ॥ अꣳशु

नाते ॥ अꣳशुनातेऽअꣳशुः पृञ्च्यताम्परुषापरुः ॥ गन्धस्तेसोममवतु
मदायरसोऽअच्युतः ॥ २७ ॥ सिञ्चन्तिपरि । षिञ्चन्त्युत्सिञ्चन्तिपुन
न्तिच ॥ सुरायैबभ्र्वैमदेकिन्त्वोवदतिकिन्त्वः ॥ २८ ॥ धानावन्तङ्क
रम्भिणम् ॥ धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् ॥ इन्द्रप्रात
र्जुषस्वनः ॥ २९ ॥ बृहदिन्द्राय । गायतमरुतोवृत्रहन्तमम् ॥ येन
ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ॥ ३० ॥ अध्वर्योऽअ
द्रिभिः । सुतꣳसोमम्पवित्रऽआनय ॥ पुनाहीन्द्रायपातवे ॥ ३१ ॥

[ ८ ] योभूतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँल्लोकाऽअधिश्रि
ताः ॥ यऽईशेमहतोमहाँस्तेनगृह्णामित्त्वामहम्मयिगृह्णामित्त्वामहम्
॥ ३२ ॥ उपयामगृहीतोसि ॥ उपयामगृहीतोस्यश्श्विब्भ्यान्त्वासरस्व
त्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णऽएषतेयोनिरश्श्विब्भ्यान्त्वासरस्वत्यैत्त्वे
न्द्रायत्त्वासुत्राम्म्णे ॥ ३३ ॥ प्राणपामे ॥ प्राणपामेऽअपानपाश्चक्षुष्पाः
श्श्रोत्त्रपाश्चमे ॥ व्वाचोमेव्विश्श्वभेषजोमनसोसिव्विलायकꣳ ॥ ३४ ॥ अ
श्श्विनंकृतस्यते ॥ अश्श्विनंकृतस्यतेसरस्वतिकृतस्येन्द्रेणसुत्राम्म्णाकृत

स्य॑ ॥ उप॑हूत॒ऽउप॑हूतस्यभक्षयामि॥ ३५॥[४]समि॑द्ध॒ऽइन्द्र॑ः॥समि॑द्ध॒
ऽइन्द्र॑ऽउ॒षसा॒मनी॑केपुरो॒रुचा॑पूर्व॒कृद्वा॑वृधा॒नः ॥ त्रि॒भिर्दे॒वैस्त्रि॒ꣳशता॒
वज्र॑बाहु॒र्जघा॑नवृ॒त्रंवि॒दुरो॑ववार ॥ ३६ ॥ नरा॒शꣳस॒ꣳप्राति॑ ॥ नरा॒
शꣳस॒ꣳप्राति॒शूरो॒मिमा॑न॒स्तनू॒नपा॒त्प्रति॑य॒ज्ञस्य॒धाम॑ ॥ गोभि॑र्व॒पावा॒
न्मधु॑नास॒मञ्जन्हिर॑ण्यैश्च॒न्द्री॑यजति॒प्रचे॑ताꣳ ॥ ३७ ॥ ई॒डि॒तोदे॒
वैः ॥ ई॒डि॒तोदे॒वैर्हरि॑वाँ २ ॥ ऽअ॒भि॒ष्टिरा॒जुह्वा॑नोह॒विषा॒शर्द्ध॑मानꣳ ॥
पु॒र॒न्द॒रोगो॑त्र॒भिद्वज्र॑बाहु॒राया॑तुय॒ज्ञमुप॑नोजु॒षा॒णः ॥ ३८ ॥ जु॒

षा॒णोब॒र्हिः ॥ जु॒षा॒णोब॒र्हिर्हरि॑वान्न॒ऽइन्द्र॑÷प्प्रा॒चीनं॑ꣳसीदत्प्र॒दि
शां॑पृथि॒व्व्याः ॥ उ॒रु॒प्प्रथा॒ःप्प्रथं॑मानꣳस्यो॒नमां॑दि॒त्त्यैर॒क्तंव्व॒सुं॑भिःस॒
जोषां॑÷॥३९॥ इन्द्र॒न्दुरं॑÷। कव॒ष्ष्यो॒धाव॑माना॒व्वृषां॑णंय्य॒न्तु॒जनं॑यः
सु॒पत्नीं॑÷ ॥ द्वारो॑दे॒वीर॒भितो॒व्विश्श्रं॑यन्ताꣳसु॒वीरां॑व्वी॒रम्प्प्रथं॑माना॒म
हो॑भिः ॥ ४० ॥ उ॒षासा॒नक्तां॑ । बृ॒ह॒तीबृ॒हन्त॒म्पयं॑स्वतीसु॒दु॒घे॒शूर
मिन्द्रं॑म् ॥ तन्तुं॑न्त॒तम्पेशं॑सास॒व्वयं॑न्तीदे॒वानां॑न्दे॒वंय्यं॑जतःसु॒रु॒क्मे
॥ ४१ ॥ दैव्व्या॒मिमां॑ना ॥ दैव्व्या॒मिमां॑ना॒मनुं॑षःपु॒रु॒त्त्रा॒होतां॑रा॒विन्द्रं॑

प्प्रथमासुवाचा ॥ मूर्द्धन्न्यज्ञस्यमधुनादधानाप्प्राचीनञ्ज्योतिर्हविषा
वृधात्तꣳ ॥ ४२ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्हविषाव्वर्द्धमानाऽइन्द्र
ञ्जुषाणाजनयोनपत्त्नीः ॥ अच्छिन्नन्तन्तुंपयसासरस्वतीडादेवीभा
रतीविश्श्वतूर्त्तिꣳ ॥ ४३ ॥ त्त्वष्टादधत् ॥ त्त्वष्टादधच्छुष्ममिन्द्रायवृ
ष्णेपाकोचिष्टुर्य्यशसेपुरूणि ॥ वृषायजन्न्वृषणम्भूरिरेतामूर्द्धन्न्यज्ञ
स्यसमनक्तुदेवान् ॥ ४४ ॥ व्वनस्प्पातिरवसृष्टꣳ ॥ व्वनस्प्पातिरवसृष्टो
नपाशैस्त्मन्न्यासमञ्जञ्छमितानदेवः ॥ इन्द्रस्यहव्यैर्ज्जठरम्पृणानः

स्वदा॑तिय॒ज्ञम्मधु॑नाघृ॒तेन॑ ॥ ४५ ॥ स्तो॒काना॒मिन्दु॑म् ॥ स्तो॒काना॒
मिन्दु॒म्प्रति॒शू॒रऽइन्द्रो॑वृषा॒यमा॑णोवृष॒भस्तु॑रा॒षाट् ॥ घृत॒प्प्रुषा॒मन॑सा॒
मोद॑माना॒ꣳस्वाहा॑दे॒वाऽअ॒मृता॑मादयन्ताम् ॥ ४६ ॥ [११] आया॑तु ॥
आया॒त्त्विन्द्रोव॑स॒ऽउप॑नऽइ॒हस्तु॒तःस॑ध॒माद॑स्तु॒शूर॑÷ ॥ वा॒वृ॒धा॒नस्त
वि॑षी॒र्य्यस्य॑पू॒र्व्वीर्द्यौ॑र्न्नक्ष॒त्त्रम॒भिभू॑ति॒पुष्या॑त् ॥ ४७ ॥ आन॑÷ ॥
आन॒ऽइन्द्रो॑दू॒रादान॑ऽआ॒साद॑भिष्टिकृदव॑सेयासदु॒ग्ग्रः ॥ ओजि॑ष्ठेभि
र्नृ॒पति॒र्व्वज्र॑बाहुꣳसङ्गे॒समत्सु॑तु॒र्व्वणि॑÷पृत॒न्यून् ॥ ४८ ॥ आन॑÷ ॥

आन॒ऽइन्द्रो॒हरि॑भि॒र्य्या॒त्त्वच्छा॑र्वा॑ची॒नोव॑से॒राध॑सेच ॥ तिष्ठा॑तिव॒
ज्रीम॒घवा॑व्विर॒प्शीमंय्य॒ज्ञमनु॑नो॒व्वाज॑सातौ ॥ ४९ ॥ त्रा॒तार॒मि
न्द्र॑म् ॥ त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳहवे॑हवेसु॒हव॒ꣳशूर॒मिन्द्र॑म् ॥
ह्वया॑मिश॒क्रम्पु॑रुहू॒तमिन्द्र॑ꣳस्व॒स्तिनो॑म॒घवा॑धा॒त्त्विन्द्र॑ः ॥ ५० ॥
इन्द्र॑ःसु॒त्रामा॑ ॥ इन्द्र॑ःसु॒त्रामा॒स्ववा॒ँ२॥ ऽअवो॑भिःसुमृ॒डी॒कोभ॑वतु
वि॒श्ववे॑दाः ॥ बाध॑ता॒न्द्वेषो॒ऽअभ॑यङ्कृणोतुसु॒वीर्य्य॑स्य॒पत॑यःस्याम
॥ ५१ ॥ तस्य॑व्व॒यम् ॥ तस्य॑व्व॒यꣳसु॑म॒तौय॒ज्ञिय॒स्यापि॑भ॒द्रेसौ॑मन॒से

स्यांम ॥ ससुत्रामास्ववाँ२ऽइन्द्रोऽअस्म्मेऽआराच्चिद्द्वेषःसनुतर्युँयोतु ॥ ५२ ॥ आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिंभिर्याहिमयूरंरोमाभिः ॥ मात्त्वाकेचिन्नियंमन्न्विन्नपाशिनोतिधन्वैवताँ२॥ऽईहि॥ ५३ ॥ एवेत् ॥ एवेदिन्द्रंवृषंणंवज्ज्रंबाहुंव्वसिंष्ठासोऽअभ्यर्च्चन्त्यर्कैः ॥ सनंस्तुतोव्वीरवंद्धातुगोमंद्ध्यम्पांतस्वस्तिभिःसदांनः ॥ ५४ ॥ [ ८ ] समिद्धोऽअग्निः ॥ समिंद्धोऽअग्निरंश्विनातप्तोघर्म्मोविराट्सुतः ॥ दुहेधेनुःसरंस्वतीसोमंꣳशुक्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजा । सुतेश्वि

नोभासरंस्वती ॥ मद्ध्वारजांꣳसीन्द्रियमिन्द्रांयपथिभिर्व्वहान् ॥
॥ ५६ ॥ इन्द्रायेन्दुंम् ॥ इन्द्रायेन्दुꣳसरंस्वतीनराशꣳसेननग्नहुंम् ॥
अधांतामश्विनामधुंभेषजम्भिषजांसुते ॥ ५७ ॥ आजुह्वांनासरंस्व
ती ॥ आजुह्वांनासरंस्वतीन्द्रांयेन्द्रियाणिवीर्य्यम् ॥ इडांभिरश्विना
विषꣳसमूर्ज्जꣳसꣳरयिन्दंधुः ॥ ५८ ॥ अश्विनानमुंचेः । सुतꣳसोमंꣳशु
क्रम्पंरिस्रुतां ॥ सरंस्वतीतमाभंरद्बर्हिषेन्द्रांयपातंवे ॥ ५९ ॥ कवष्योन ।
व्यचंस्वतीरश्विभ्यान्नदुरोदिशंः ॥ इन्द्रोनरोदंसीऽउभेदुहेकामा

न्तसर॑स्वती ॥ ६० ॥ उ॒षासा॒नक्त॑म् ॥ उ॒षासा॒नक्त॑मश्विना॒दि॒वेन्द्र॑ꣳ
सा॒यमि॑न्द्रि॒यैः ॥ स॒ञ्ज्ञा॒ना॒नेसु॒पेश॑सा॒सम॑ञ्ज्ञाते॒सर॑स्वत्त्या ॥ ६१ ॥
पा॒तन्न॑÷ ॥ पा॒तन्नो॑ऽअ॒श्विना॒दिवा॑पा॒हिनक्त॑ꣳसरस्वति ॥ दै॒व्या॑हो
तारा॒भिष॒जापा॒ता॒मिन्द्र॒ꣳसचा॑सुते ॥ ६२ ॥ ति॒स्रस्त्रे॒धा । सर॑स्वत्त्य॒
श्विना॒भार॒तीडा॑ ॥ ती॒व्रम्प॑रि॒स्रु॒ता॒सोम॒मिन्द्रा॑यसुषुवु॒र्म्मद॑म् ॥ ६३ ॥
अ॒श्विना॑भेष॒जम् ॥ अ॒श्विना॑भेष॒जम्मधु॑भेष॒जन्न॒ꣳसर॑स्वती ॥ इन्द्रे॒
त्त्वष्टा॒यश॒ꣳश्रिय॑ꣳरू॒पꣳरू॑पमधु॒ꣳसुते ॥ ६४ ॥ ऋ॒तु॒थेन्द्र॑÷ ॥ ऋ॒तु

थेन्द्रो॒व्वन॒स्प्पति॑ꣳशशमा॒नःप॑रि॒स्स्रुता॑ ॥ की॒लाल॑म॒श्विभ्या॒म्मधु॑दु
हे॒धे॒नुःसर॑स्वती ॥ ६५ ॥ गोभि॒र्न्न । सोम॑म॒श्विना॒मास॑रेणपरि॒स्स्रुता॑ ॥
सम॑धात॒ꣳसर॑स्वत्त्या॒स्वाहेन्द्रे॑सु॒तम्मधु॑ ॥ ६६ ॥ [ १२ ] अ॒श्विना॑ह॒
विः ॥ अ॒श्विना॑ह॒विरि॑न्द्रि॒यन्नमु॑चेर्द्धि॒यासर॑स्वती ॥ आशु॒क्रमा॑सु॒रा
द्वसु॑म॒घमिन्द्रा॑यजभ्रिरे ॥ ६७ ॥ यम॒श्विना॑ ॥ यम॒श्विना॒सर॑स्व
तीह॒विषेन्द्र॒मव॑र्द्धयन् ॥ सबि॑भेद॒ब्ब॒लम्म॒घन्नमु॑चावासु॒रेसचा॑ ॥ ६८ ॥
तमिन्द्र॑म् ॥ तमिन्द्र॑म्प॒शव॒ꣳसचा॒श्विनो॒भासर॑स्वती ॥ दधा॑नाऽअ॒

ब्भ्यनूषतहविषांयज्ञऽइंन्द्रियैः ॥ ६९ ॥ यऽइन्द्रं ॥ यऽइन्द्रंऽइन्द्रि
यन्दधुःसंवितावरुणोभगंः ॥ ससुत्रामांहविष्पंतिर्य्यजंमानायस
श्चत ॥७०॥ सविताव्वरुंणꣳ ॥ सविताव्वरुंणोदधद्यजंमानायदाशुषे ॥
आदंत्तनमुंचेर्व्वसुंसुत्रामाबलंमिन्द्रियम् ॥ ७१ ॥ व्वरुंणꣳक्षत्रम् ॥
व्वरुंणꣳक्षत्रमिंन्द्रियम्भगेनसविताश्रियंम् ॥ सुत्रामायशंसाबलन्द
धांनायज्ञमांशत ॥ ७२ ॥ अश्विनागोभिंः ॥ अश्विनागोभिंरिन्द्रि
यमश्वेभिर्व्वीर्य्यम्बलंम् ॥ हविषेन्द्रꣳसरंस्वतीयजंमानमवर्द्धयन्

॥ ७३ ॥ तानास॑त्त्या । सु॒पेश॑सा॒हिर॑ण्ण्यवर्त्त॑नी॒नरा॑ ॥ सर॑स्वतीह॒
विष्म॒तीन्द्र॒कर्म्मँ॑सुनोवत ॥ ७४ ॥ ताभि॒षजा॑ । सु॒कर्म्मँ॑णा॒सासु॒
दु॒घा॒सर॑स्वती ॥ सवृ॑त्र॒हा॒श॒तक्र॑तु॒रिन्द्रा॑यद॒धु॒रि॒न्द्रि॒यम् ॥ ७५ ॥
यु॒वꣳसु॒राम॑म् ॥ यु॒वꣳसु॒राम॑मश्विना॒नमु॑चावासु॒रेसचा॑ ॥ वि॒पि॒
पा॒ना॒ꣳसर॑स्व॒तीन्द्र॒ङ्कर्म्मँ॑स्वावत ॥ ७६ ॥ पु॒त्रमि॑वपि॒तरौ॑ ॥ पु॒त्र
मि॑वपि॒तरा॑व॒श्विना॒भेन्द्रा॒वथु॒ꣳकाव्यै॑र्द॒ꣳसना॑भिꣳ ॥ यत्त्सु॒राम॑व्य
पि॒ब॒ꣳशची॑भि॒ꣳसर॑स्वती॒त्त्वाम॑घवन्नभि॒ष्णक् ॥ ७७ ॥ यस्म्मि॒न्न

श्वा॑सः ॥ यस्मि॒न्नश्वा॑सऽऋष॒भास॑ऽउ॒क्षणो॑व॒शामे॒षाऽअ॑वसृ॒ष्टास॒ऽ
आहु॑ताः ॥ की॒ला॒ल॒पेसोम॑पृष्ठायवे॒धसे॑हृ॒दाम॒तिञ्ज॑नय॒चारु॑म॒ग्न
ये॑ ॥ ७८ ॥ अहा॑व्यग्ने । ह॒विरा॒स्ये॑तेस्रु॒ची॑वघृ॒तञ्च॒म्म्वी॑व॒सोम॑ः ॥
वा॒ज॒सानिꣳर॒यिम॒स्मेसु॒वीर॑म्प्रश॒स्तन्धे॑हिय॒शस॑म्बृ॒हन्त॑म् ॥ ७९ ॥
[ १३ ] शतम् १२०० ॥ अ॒श्विना॒तेज॑सा ॥ अ॒श्विना॒तेज॑सा॒चक्षु॑ः
प्प्रा॒णेन॒सर॑स्वतीव्वी॒र्य्य॒म् ॥ व्वा॒चेन्द्रो॒बले॒नेन्द्रा॑यदधु॒रिन्द्रि॒यम् ॥ ८० ॥
गोम॑द्दू॒षुणा॑सत्त्या ॥ गोम॑द्दू॒षुणा॑स॒त्त्याश्वा॑वद्यातमश्विना ॥ व्व॒र्त्ती रु॑द्रानृ॒

पा॒य्य॑म्॥८१॥नय॑त्॥नय॑त्त्परो॒नान्त॑रऽआद॒धर्ष॑द्वृ॒ष॑ण्वसू॥दु॒ꣳशꣳ
सो॒मर्त्त्यो॑रि॒पुः ॥ ८२ ॥ तान॑÷ ॥ ता॒न॒ऽआवो॑ढमश्विनार॒यिम्पि॒शङ्ग॑
सन्दृशम् ॥ धिष्ण्या॑व्वरिवो॒विद॑म् ॥ ८३ ॥ पा॒व॒कान॑÷ ॥ पा॒व॒का
न॒ꣳसर॑स्वती॒व्वाजे॑भिर्व्वा॒जिनी॑वती ॥ य॒ज्ञव्व॑ष्टु॒धि॒याव॑सुꣳ ॥ ८४ ॥ चो॒
द॒यि॒त्रीसू॒नृता॑नाम् ॥ चो॒द॒यि॒त्रीसू॒नृता॑ना॒ञ्चेत॑न्तीसुम॒ती॒नाम् ॥ य॒
ज्ञन्द॑धे॒सर॑स्वती ॥ ८५ ॥ म॒होऽअर्ण्ण॑÷ ॥ म॒होऽअर्ण्ण॒ꣳसर॑स्वती॒प्प्र
चे॑तयतिके॒तुना॑ ॥ धियो॒व्विश्वा॒व्विरा॑जति ॥ ८६ ॥ इन्द्रा॒या॑हि । चि

त्रभानोसुताऽइमेत्त्वायवं÷ ॥ अण्वींभिस्तनांपूतासं÷ ॥ ८७ ॥
इन्द्रायांहि । धियेषितोव्विप्प्रंजूतꣳसुतावंतꣳ ॥ उपब्ब्रह्मांणिव्वाघतं÷
॥ ८८ ॥ इन्द्रायांहि ॥ इन्द्रायांहितूतुंजानऽउपब्ब्रह्मांणिहरिवꣳ ॥
सुतेदंधिष्ष्वनश्च्चनं÷ ॥ ८९ ॥ अश्विनांपिबताम् ॥ अश्विनांपिबता
म्मधुसरंस्वत्त्यासजोषंसा ॥ इन्द्रं÷सुत्रामांवृत्रहाजुषतांꣳसोम्म्य
म्मधुं ॥ ९० ॥ [ ११ ] इतिश्रीवाजसनेयसंहितायांविंशतितमोऽ
ध्यायः ॥ २० ॥ ॥ ॥ श्रीवेदपुरुषायनमः ॥ ॥ ॥

इति श्रीवाजसनेयसंहितायां पूर्वविंशतिः समाप्ता ॥

# अथ श्रीवाजसनेयसंहितोत्तरविंशतिप्रारंभः ॥

[ॐ इमम्मे व्वरुण इति गौतमऋषिरग्निर्देवता गायत्री छन्द: सूर्यभक्तिफलप्राप्तिकाम;पाठे
विनियोग:॥२१॥ ]

संहि. ॥ १ ॥ उ. अ. ॥२१॥

॥ श्रीगणेशायनमः ॥ अनुवाक्सूत्रम् ॥ इमम्मे, समिद्धोऽअग्निरेका
दशकौ, व्वसन्तेनऽऋतुनाष, होतायक्षत्त्समिधाग्निंद्वादशा, श्विनौच्छा
गस्यसप्त, देवंबर्हिश्चतुर्दश, षडेकषष्टिः ॥ हरिःॐ ॥ इमम्मे । व्वरुणश्रु
धीहवंमद्याचंमृडय ॥ त्वामंवस्युराचंके ॥ १ ॥ तत्त्वा । यामिब्रह्मंणा
व्वन्दंमानस्तदाशांस्तेयजंमानोहविर्ब्भिंः ॥ अहेंडमानोव्वरुणेहबो
द्ध्युरुंशꣳसमानऽआयुःप्प्रमोषीः ॥ २ ॥ त्वन्नंः ॥ त्वन्नोंऽअग्नेव्वरुं
णस्यविद्वान्देवस्यहेडोऽअवंयासिसीष्ठाः ॥ यजिंष्ठोव्वह्निंतमःशो ॥ १ ॥

शु॑चानो॒व्विश्वा॒द्वेषा॑ꣳसि॒प्रमु॑मुग्ध्य॒स्स्मत् ॥ ३ ॥ सत्त्वम् ॥ सत्त्व
न्नो॑ऽअग्ने॒वमो॑भ॑वो॒तीनेदि॑ष्ठो॒ऽअ॒स्याऽउ॒षसो॒व्युष्टौ ॥ अव॑यक्ष्वनो॒व्व
रु॑ण॒ह्ररा॑णो॒व्वी॒हिमृ॑डी॒कꣳसु॒हवो॑नऽएधि ॥ ४ ॥ म॒हीमू॒षु । मा॒तर॑ꣳ
सु॒व्व्रता॒ना॑मृ॒तस्य॒पत्नी॒मव॑सेहुवेम ॥ तु॒वि॒क्ष॒त्त्रा॒मज॑रन्तीमु॒रू॒चीꣳसु
शर्म्मा॑ण॒मदि॑तिꣳसु॒प्रणी॑तिम् ॥ ५ ॥ सु॒त्रामा॑णम्पृथि॒वीम् ॥ सु॒त्रा
मा॑णम्पृथि॒वीन्द्याम॑ने॒हस॑ꣳसु॒शर्म्मा॑ण॒मदि॑तिꣳसु॒प्रणी॑तिम् ॥ दैवी॒
न्नाव॑ꣳस्वरि॒त्रामना॑गस॒मस्र॑वन्ती॒मारु॑हेमास्व॒स्तये॑ ॥ ६ ॥ सु॒नाव॒मा

रु॑हेयम् ॥ सुनाव॒मारु॑हेय॒मस्र॑वन्ती॒मना॑गसम् ॥ श॒तारि॑त्राꣳस्व॒स्त
ये॑ ॥ ७ ॥ आन॑÷ ॥ आनो॑मित्रावरु॑णाघृ॒तैर्ग्गव्यू॑तिमुक्षतम् ॥ म
ध्वा॒रजा॑ꣳसिसुक्रतू ॥ ८ ॥ प्रबा॒हवा॑ । सि॒सृतञ्जी॒वसे॑न॒ऽआनो॒गव्यू॑
तिमुक्षतङ्घृ॒तेन॑ ॥ आमा॒जने॑श्श्रवयतंयु॒वाना॒श्श्रु॒तम्मे॑मित्रावरुणा॒
हवे॒मा ॥ ९ ॥ शन्न॑÷ ॥ शन्नो॑भवन्तुवा॒जिनो॒हवे॑षुदे॒वता॑तामि॒तद्र॑
वःस्व॒र्काः ॥ जम्भय॒न्तोऽहिं॒वृक॒ꣳरक्षा॑ꣳसि॒सने॑म्म्य॒स्मद्यु॑यव॒न्नमी॑ ॥ २ ॥
वाः ॥ १० ॥ वाजे॑वाजेवत । वा॒जिनो॒नो॒धने॑षुवि॒प्रा॑ऽअमृता॒ऽऋ

तज्ञाः ॥ अ॒स्यम॑द्ध्वः पिबतमा॒दय॑ध्वन्तृ॒प्ताया॑तप॒थिभि॑र्द्दे॒वया॑नैः ॥११॥ [११] समि॑द्धोऽअ॒ग्निः। स॒मिधा॒सुस॑मिद्धो॒वरे॑ण्ण्यः ॥ गा॒य॒त्री च्छन्द॑ऽइन्द्रि॒यन्त्र्य॒वि॒ग्गौर्व्वयो॑दधुः ॥१२॥ तनू॒नपा॒च्छुचि॑व्रतः ॥ तनू॒नपा॒च्छुचि॑व्रतस्तनू॒पाश्च॒सर॑स्वती ॥ उ॒ष्णिहा॒च्छन्द॑ऽइन्द्रि॒यन्दि॑त्त्य॒वाङ्गौर्व्वयो॑दधुः ॥ १३ ॥ इडा॑भिर॒ग्निः ॥ इडा॑भिर॒ग्निरी॒ड्य॒ꣳसोमो॑दे॒वो॑ऽअम॑र्त्त्यः ॥ अ॒नु॒ष्टुप्प्छन्द॑ऽइन्द्रि॒यम्पञ्चा॑वि॒ग्गौर्व्वयो॑दधुः ॥१४॥ सु॒ब॒र्हिर॒ग्निः। पू॒ष॒ण्ण्वान्त्स्ती॒र्ण्णब॑र्हि॒रम॑र्त्त्यः ॥ बृ॒ह॒तीच्छन्द॑ऽइन्द्रि॒य

न्त्रिव॒त्सोगौर्व्वयो॑दधुः ॥ १५ ॥ दु॒रो॑दे॒वीः ॥ दु॒रो॑दे॒वीर्दिशो॑म॒हीर्ब्र॒ह्मा
दे॒वो॑बृह॒स्पति॑ः ॥ प॒ङ्क्तिश्छन्द॑ऽइ॒हेन्द्रि॒यन्तु॑र्य्य॒वाड्गौर्व्वयो॑दधुः
॥ १६ ॥ उ॒षेय॒ह्वी ॥ उ॒षेय॒ह्वीसु॒पेश॑सा॒विश्वे॑दे॒वाऽअम॑र्त्याः ॥ त्रि॒ष्टुप्
छन्द॑ऽइ॒हेन्द्रि॒यम्प॑ष्ठ॒वाड्गौर्व्वयो॑दधुः॥ १७॥ दैव्या॒होता॑रा । भि॒षजे
न्द्रे॑णस॒युजा॑यु॒जा ॥ जग॑ती॒च्छन्द॑ऽइन्द्रि॒यम॑न॒ड्वान्गौर्व्वयो॑दधुः
॥ १८ ॥ ति॒स्रऽइडा॑ ॥ ति॒स्रऽइडा॒सर॑स्वती॒भार॑तीम॒रुतो॒विश॑ः ॥ ॥ ३ ॥
वि॒राट्छन्द॑ऽइ॒हेन्द्रि॒यन्धे॒नुर्गौर्न्नव्वयो॑दधुः ॥ १९ ॥ त्वष्टा॑तु॒रीप॑ः ॥

त्वष्टा॑तु॒रीपो॒ऽअद्भु॑तऽइन्द्रा॒ग्नीपु॑ष्टि॒वर्द्ध॑ना ॥ द्विप॑दा॒च्छन्द॑ऽइन्द्रि॒य
मु॒क्षागौर्न्नव्वयो॑दधुः ॥ २० ॥ श॒मि॒तान॑÷ ॥ श॒मि॒तानो॒ब्व॒न॒स्प्पति॑÷
स॒वि॒ताप्प्र॑सु॒वन्भग॑म् ॥ क॒कुप्प्छन्द॑ऽइ॒हेन्द्रि॒यंव्व॒शाव्वे॒हद्द्वयो॑दधुः
॥ २१ ॥ स्वाहा॑य॒म् ॥ स्वाहा॑य॒ज्ञंव्वरु॑णःसु॒क्ष॒त्रोभे॑ष॒जङ्क॑रत् ॥ अति॑च्छ
न्दा॑ऽइन्द्रि॒यंबृ॒हदृ॑ष॒भोगौर्व्वयो॑दधुः ॥ २२ ॥ [११] ब्व॒स॒न्तेन॑ऽऋ॒तुना॑ ।
दे॒वाव्वस॑वस्त्रि॒वृता॑स्तु॒ताः ॥ र॒थ॒न्त॒रेण॒तेज॑साह॒विरिन्द्रे॒व्वयो॑दधुः
॥ २३ ॥ ग्री॒ष्म्मेण॑ऽऋ॒तुना॑ । दे॒वारु॒द्राःप॑ञ्च॒द॒शेस्तु॒ताः ॥ बृ॒ह॒ताय

शंसाबलꣳहविरिन्द्रेव्वयोदधुः ॥ २४ ॥ व्वर्षाभिर्ऋतुना । दित्त्यास्तो
मेसप्तदशेस्तुताः ॥ व्वैरूपेणव्विशौजसाहविरिन्द्रेव्वयोदधुः ॥ २५ ॥
शारदेनऽऋतुना । देवाऽएकविꣳशऽऋभवस्तुताः ॥ व्वैराजेनश्रि
याश्रियꣳहविरिन्द्रेव्वयोदधुः ॥ २६ ॥ हेमन्तेनऽऋतुना । देवास्त्रि
णवेमरुतस्तुताः ॥ बलेनशक्वरीꣳसहोहविरिन्द्रेव्वयोदधुः ॥ २७ ॥
शैशिरेणऽऋतुना । देवास्त्रयस्त्रिꣳशेमृतास्तुताः ॥ सत्त्येनरेवतीꣳ
क्षत्रꣳहविरिन्द्रेव्वयोदधुः ॥ २८ ॥ [ ६ ] होतायक्षत् ॥ होतायक्ष

त्समिधाग्निमिडस्पदेश्विनेन्द्रꣳसरस्वतीमजोधूम्म्रोनगोधूमैꣳकुव
लैर्भेषजम्मधुशष्पैर्न्नतेजऽइन्द्रियम्पयꣳसोम÷परिस्रुताघृतम्मधु
व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २९ ॥ होतायक्षत्तनूनपात्सरस्वती
म् ॥ होतायक्षत्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमता
भरन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिꣳपयꣳ
सोम÷परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होताय
क्षन्नराशꣳसन्न । नग्नहुम्पतिꣳसुरयाभेषजम्मेषःसरस्वतीभिषग्ग्र

थोनचन्द्र्यश्विनोर्व्वपाऽइन्द्रस्यव्वीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तो
क्मभिꣳपयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज
॥३१॥ होतायक्षदिडेडितः ॥ होतायक्षदिडेडितऽआजुह्वानꣳसरस्व
तीमिन्द्रम्बलेनवर्द्धयन्नृषभेणगवेन्द्रियमश्विनेन्द्रायभेषजंय्यवैꣳ
कर्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वा
ज्ज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाꣳ ॥ होतायक्षद्ब
र्हिरूर्णम्म्रदाभिषङ्नासत्त्याभिषजाश्विनाश्वाशिशुमतीभिषग्धे

नुःसर॑स्वतीभि॒षग्दु॒ह॒ऽइन्द्रा॑यभेष॒जम्पय॒ꣳसोम॑÷परि॒स्रुता॑घृ॒तम्म

धु॒व्यन्त्वाज्य॑स्य॒होत॒र्य्यज॑ ॥ ३३ ॥ होता॑यक्ष॒द्दुरो॒दिश॑÷ । कव॒ष्यो॒

नव्यच॑स्वतीर॒श्विभ्या॒न्नदुरो॒दिश॒ऽइन्द्रो॒नरोद॑सी॒दुघे॑दुहे॒धे॒नुःसर॑

स्वत्य॒श्विनेन्द्रा॑यभेष॒जꣳशु॒क्रंनज्योति॑रिन्द्रि॒यम्पय॒ꣳसोम॑÷परि॒

स्रुता॑घृ॒तम्मधु॒व्यन्त्वाज्य॑स्य॒होत॒र्य्यज॑ ॥ ३४ ॥ होता॑यक्षत्सु॒पेश॑

सो॒षे । नक्त॒न्दिवा॒श्विना॒सम॑ञ्जा॒तेसर॑स्वत्या॒त्त्विषि॒मिन्द्रे॒नभे॑ष॒जꣳ

श्ये॒नोनरज॑साहृ॒दा॒श्रि॒यानमास॑र॒म्पय॒ꣳसोम॑÷परि॒स्रुता॑घृ॒तम्मधु॒व्य

न्त्वाज्ज्यस्यहोतर्य्यज ॥ ३५ ॥ होतायक्षद्दैव्याहोतारा । भिषजा
श्विनेन्द्रन्नजागृविदिवानक्तन्नभेषजैःशूषꣳसरस्वतीभिषक्सीसेन
दुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्य
ज ॥ ३६ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्न्नभेषज
न्त्रयस्त्रिधातवोपसोरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीव्वाचास
रस्वतीमहऽइन्द्रायदुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्य
न्त्वाज्ज्यस्यहोतर्य्यज ॥ ३७ ॥ होतायक्षत्त्सुरेतसमृषभम् ॥ होतायक्ष

त्सुरेतंसमृषभन्नग्र्यांपसुन्त्वष्टारमिन्द्रमश्विनाभिषजन्नसरस्वतीमो
जोनजूतिरिन्द्रियंवृकोनरभसोभिषग्ग्यशꣳसुरयाभेषजꣳश्रियान
मासरम्पयꣳसोमःपरिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोतर्यज॥ ३८॥
होतायक्षद्वनस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमिता
रꣳशतक्रतुम्भीमन्नमन्युꣳराजानंव्याग्घ्रन्नमसाश्विनाभामꣳसरस्व
तीभिषगिन्द्रायदुहऽइन्द्रियम्पयꣳसोमःपरिस्रुताघृतम्मधुव्यन्त्वा
ज्यस्यहोतर्यज ॥ ३९ ॥ होतायक्षदग्निꣳस्वाहा ॥ होता

यक्षदग्निꣳस्वाहाज्ज्यस्यस्तोकानाꣳस्वाहामेदसाम्पृथक्स्वाहाच्छा
गमश्विभ्याꣳस्वाहामेषꣳसरस्वत्त्यैस्वाहऽऋषभमिन्द्रायसिꣳहा
यसहसऽइन्द्रियꣳस्वाहाग्निन्नभेषजꣳस्वाहासोममिन्द्रियꣳस्वाहे
न्द्रꣳसुत्रामाणꣳसवितारंव्वरुणम्भिषजाम्पतिꣳस्वाहाव्वनस्प्पतिं
म्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआज्ज्यपाजुषाणोऽअग्निर्ब्भेषज
म्पयꣳसोमं÷परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ४० ॥
[१२] होतायक्षदश्विनौच्छागस्य। व्वपायामेदसोजुषेताꣳहविर्होत

र्यज॑ ॥ होता॑यक्ष॒त्तसर॑स्वतीम्मे॒षस्य॑व्व॒पाया॒मेद॑सोजु॒षता॑ꣳह॒विर्हो॑त॒
र्यज॑ ॥ होता॑यक्ष॒दिन्द्र॑मृष॒भस्य॑व्व॒पाया॒मेद॑सोजु॒षता॑ꣳह॒विर्हो॑त॒
र्यज॑ ॥ ४१ ॥ होता॑यक्षद॒श्विनौ॒सर॑स्वतीम् ॥ होता॑यक्षद॒
श्विनौ॒सर॑स्वती॒मिन्द्र॑ꣳसु॒त्रामा॑णमि॒मेसोमा॑ःसु॒रामा॑ण॒श्छागै॒र्न्नमे॒षै
र्ऋ॑ष॒भैःसु॒ताःशष्पै॒र्न्नतोक्क्म॑भि॒र्ल्लाजै॒र्म्मह॑स्वन्तो॒मदा॒मास॑रेण॒परि॑ष्कृ
ताःशु॒क्क्राःपय॑स्वन्तो॒मृता॒ःप्प्रस्थि॑तावोमधु॒श्चुत॒स्तान॒श्विना॒सर॑स्व॒
तीन्द्र॑ःसु॒त्रामा॑व्वृत्र॒हाजु॒षन्ता॑ꣳसो॒म्म्यम्मधु॒पिब॑न्तु॒मद॑न्तु॒व्यन्तु॒हो

त॒र्य्यज॑ ॥ ४२ ॥ होता॑यक्षद॒श्विनौ॒च्छाग॑स्य । ह॒विष॒ऽआत्ता॑म॒द्यम॑ध्य॒तोमेद॒ऽउद्भृ॑तम्पु॒राद्वेषो॑भ्यᳶपु॒रापौरु॑षेय्यागृ॒भोघस्ता॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्रा॒णांय्यव॑सप्प्रथमाना॒ꣳसु॒मत्क्ष॑राणा॒ꣳशतरु॒द्द्रिया॑णाम॒ग्निष्ष्वा॒त्ताना॒म्पीवो॑पवसनानाम्पा॒र्श्व॒तःश्श्रो॑णि॒तःशि॑ता॒म॒तऽउ॑त्त्सा द॒तोऽङ्गा॑दङ्गा॒दव॑त्ताना॒ङ्क॑रत॒ऽए॒वाश्विना॑जु॒षेता॑ꣳह॒विर्हो॑त॒र्य्यज॑ ॥४३॥ होता॑यक्ष॒त्त्सर॑स्वतीम्मे॒षस्य॑ । ह॒विष॒ऽआव॑यद॒द्यम॑ध्य॒तोमेद॒ऽउद्भृ॑तम्पु॒राद्वेषो॑ऽभ्यᳶपु॒रापौरु॑षेय्यागृ॒भोघस॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्रा॒णां

य्यव॑सप्प्रथमानाꣳसु॒मत्क्ष॑राणाꣳशतरु॒द्द्रिया॑णामग्निष्ष्वा॒त्ताना॒
म्पीवो॑पवसनानाम्पार्श्व॒तःश्रो॑णि॒तःशि॑ताम॒तऽउ॑त्साद॒तोङ्गा॑दङ्गा॒दव॑
त्ताना॒ङ्कर॑दे॒वꣳसर॑स्वतीजु॒षता॑ꣳह॒विर्हो॑त॒र्य्यज॑ ॥ ४४ ॥ होता॑
यक्ष॒दिन्द्र॑मृष॒भस्य॑ । ह॒विष॒ऽआव॑यद॒द्यम॑ध्य॒तोमेद॒ऽउद्भृ॑तम्पु॒रा
द्वेषो॑ब्भ्यःपु॒रापौरु॑षेय्यागृ॒भोघस॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्राणा॒ंय्यव॑सप्प्रथमा
नाꣳसु॒मत्क्ष॑राणाꣳशतरु॒द्द्रिया॑णामग्निष्ष्वा॒त्ताना॒म्पीवो॑पवसनाना
म्पार्श्व॒तःश्रो॑णि॒तःशि॑ताम॒तऽउ॑त्साद॒तोङ्गा॑दङ्गा॒दव॑त्ताना॒ङ्कर॑दे॒वमि

न्द्रोजुषताꣳहविर्होतर्य्यज ॥ ४५ ॥ होतायक्षद्वनस्प्पतिम
भि । हिपिष्टतमयारभिष्ठयारशनयाधित ॥ यत्राश्विनोश्छागस्यहवि
षःप्प्रियाधामानियत्रसरस्वत्त्यामेषस्यहविषःप्प्रियाधामानियत्रे
न्द्रस्यऽऋषभस्यहविषःप्प्रियाधामानियत्राग्नेःप्प्रियाधामानियत्र
सोमस्यप्प्रियाधामानियत्रेन्द्रस्यसुत्राम्म्णःप्प्रियाधामानियत्रस
वितुःप्प्रियाधामानियत्रव्वरुणस्यप्प्रियाधामानियत्रव्वनस्प्पतेःप्प्रि
यापाथाꣳसियत्रदेवानामाज्ज्यपानाम्प्प्रियाधामानियत्राग्नेर्होतुः

प्रि॒याधामा॑नि॒तत्रै॒तान्प्र॒स्तु॒त्त्यै॑वोप॒स्तु॒त्त्यै॑वो॒पाव॑स्त्रक्षु॒द्रभी॑यसऽइव
कृ॒त्त्वीक॑रद्दे॒वन्दे॒वोव्व॒न॒स्प्पति॑र्जु॒षता॑ᳫंह॒विर्हो॑त॒र्यज॑ ॥ ४६ ॥ होता॑य
क्षद॒ग्निᳫंस्वि॑ष्टकृत॑म् ॥ होता॑यक्षद॒ग्निᳫंस्वि॑ष्टकृत॒मया॑ऽ॒ग्निरा॒श्विनो॒
श्छाग॑स्यह॒विष॑÷प्प्रि॒याधामा॒न्न्यया॒ट्सर॑स्वत्त्यामे॒षस्य॑ह॒विष॑÷प्प्रि॒या
धामा॒न्न्यया॒डिन्द्र॑स्यऽऋष॒भस्य॑ह॒विष॑÷प्प्रि॒याधामा॒न्न्यया॑ऽ॒ग्नेःप्प्रि॒
याधामा॒न्न्यया॒ट्सोम॑स्यप्रि॒याधामा॒न्न्यया॒डिन्द्र॑स्यसु॒त्त्राम्म्ण॑÷प्प्रि॒या
धामा॒न्न्यया॑ट्सवि॒तुःप्प्रि॒याधामा॒न्न्यया॒ड्वरु॑णस्यप्प्रि॒याधामा॒न्न्यया॒ड्वन॒

स्प्पते॑÷ प्प्रि॒यापाथा॒ꣳस्यया॑ड्दे॒वानां॑माज्य॒पानां॑प्प्रि॒याधामां॑नि॒यक्षं॑
द॒ग्नेर्हों॑तु॒÷ प्प्रि॒याधामां॑नि॒यक्ष॒त्स्वम्मं॑हि॒मान॒मायं॑जता॒मेज्या॒ऽइ
षं॑÷ कृ॒णोतु॒सोऽअं॑ध्व॒राजा॒तवें॑दा॒जु॒षतां॑ꣳह॒विर्हों॑तु॒र्य्यजं॑ ॥४७॥ [ ७ ]
दे॒वम्ब॒र्हिः॑। सरं॑स्वतीसुदे॒वमिन्द्रें॑ऽअ॒श्विनां॑ ॥ तेजो॒नचक्षु॑र॒क्ष्यो॒र्ब्ब॒र्हिषां॑
द॒धुरिन्द्रि॒यंव्वं॑सु॒वनैं॑व्वसु॒धेयं॑स्यव्यन्तु॒यजं॑ ॥४८॥ दे॒वीर्द्वारं॑÷ ॥ दे॒वीर्द्वा
रौं॑ऽअ॒श्विनां॑भि॒षजेन्द्रे॒सरं॑स्वती ॥ प्रा॒णन्नव्वी॒र्य्यं॒न्नासि॒द्वारौं॑दधु॒रिन्द्रि॒
यंव्वं॑सु॒वनैं॑व्वसु॒धेयं॑स्यव्यन्तु॒यजं॑॥४९॥ दे॒वीऽउ॒षासौं॑॥ दे॒वीऽउ॒षासां॑व॒

श्विना॑सु॒त्रामेन्द्रे॒सर॑स्वती ॥ बल॒न्नवाच॑मा॒स्य॒ऽउ॒षाभ्या॑न्दधुरिन्द्रि॒यं
व्व॑सु॒वनै॑व्वसु॒धेय॑स्य॒व्यन्तु॒यज॑ ॥५०॥ दे॒वीजोष्ट्री॑ ॥ दे॒वीजोष्ट्री॒सर॑स्वत्य॒
श्विनेन्द्र॑मवर्द्धयन् ॥ श्रोत्र॒न्नकर्ण्ण॑यो॒र्यशो॒जोष्ट्री॑भ्यान्दधुरिन्द्रि॒
यंव्व॑सु॒वनै॑व्वसु॒धेय॑स्य॒व्यन्तु॒यज॑ ॥ ५१ ॥ दे॒वीऽऊ॒र्ज्जाहु॑ती ॥ दे॒वीऽ
ऊ॒र्ज्जाहु॑ती॒दुघे॑सु॒दुघे॒न्द्रे॒सर॑स्वत्य॒श्विना॑भि॒षजा॑वतꣳ ॥ शु॒क्रन्नज्ज्यो
ति॒स्तन॑यो॒राहु॑तीधत्तऽइन्द्रि॒यंव्व॑सु॒वनै॑व्वसु॒धेय॑स्य॒व्यन्तु॒यज॑ ॥ ५२ ॥
दे॒वादे॒वाना॑म् ॥ दे॒वादे॒वाना॑म्भि॒षजा॒होता॑रा॒विन्द्र॑म॒श्विना॑ ॥ व्व॒षट्का॒रैः

सरस्वतीत्त्विषिन्नहृदयेमतिꣳहोतृभ्यान्दधुरिन्द्रियंव्वसुवनेव्वसुधेय
स्यव्यन्तुयज ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर
श्विनेडासरस्वती ॥ शूषन्नमध्येनाभ्यामिन्द्रायदधुरिन्द्रियंव्वसुवने
व्वसुधेयस्यव्यन्तुयज ॥ ५४ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रि
वरूथःसरस्वत्याश्विभ्यामीयतेरथः ॥ रेतोनरूपममृतञ्जनित्रमि
न्द्रायत्त्वष्टादधदिन्द्रियाणिव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥ ५५ ॥
देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हिरण्यपर्ण्णोऽअश्विभ्याꣳसरस्व

त्यासुपिप्पलऽइन्द्रायपच्यतेमधु ॥ ओजोनजूतिर्ऋषभोनभामंव्वन
स्प्पतिर्न्नोदधदिन्द्रियाणिव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥५६॥ देवम्ब
र्हिः ॥ देवम्बर्हिर्व्वारितीनामध्वरेस्तीर्ण्णमश्विभ्यामूर्ण्णम्म्रदाꣳसरस्व
त्यास्योनमिन्द्रतेसदः ॥ ईशायैमन्युꣳराजानम्बर्हिषादधुरिन्द्रियं
वसुवनेव्वसुधेयस्यव्यन्तुयज ॥५७॥ देवोऽअग्निः । स्विष्टकृद्देवान्यक्ष
द्यथायथꣳहोताराविन्द्रमश्विनाव्वाचाव्वाचꣳसरस्वतीमग्निꣳसोमꣳ
स्विष्टकृत्त्स्विष्टऽइन्द्रःसुत्रामासविताव्वरुणोभिषगिष्टोदेवोव्वनस्प

तिᳪस्विष्टादेवाऽआज्यपाःस्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृ
द्यशोनदधदिन्द्रियमूर्ज्जमपचितिᳪस्वधांव्वसुवनेव्वसुधेयस्यव्यन्तु
यज ॥ ५८ ॥ अग्निमद्य । होतारमवृणीतायंय्यजमानᳪपचन्पक्तीᳪ
पचन्पुरोडाशान्बध्नन्नश्विभ्याञ्छागᳪसरस्वत्यैमेषमिन्द्रायऽ
ऋषभᳪसुन्वन्नश्विभ्याᳪसरस्वत्याऽइन्द्रायसुत्राम्णेसुरासोमा
न्त्सूपस्थाऽअद्य ॥ ५९ ॥ सूपस्थाऽअद्य । देवोव्वनस्पतिरभवद
श्विभ्याञ्छागेनसरस्वत्यैमेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मेदस्तःप्र

ति॑पच॒ता॒ग्र॑भीष॒तावी॑वृधन्तपु॒रो॒डाशै॒रपु॑र॒श्विना॒सर॑स्व॒तीन्द्रः॑सु॒त्रा
मा॑सुरा॒सोमाँ॒स्त्वाम॒द्य ॥६०॥ त्वाम॒द्य ॥ त्वाम॒द्यऽऋ॑षऽआर्षे॑यऽऋ
षीणान्नपाद्वृणीता॒यं॑ऽयजं॑मानोब॒हुभ्य॒ऽआसङ्गं॑तेभ्य॒ऽएषमे॑दे॒वेषु॒
वसु॒वाऽर्या॑यक्ष्यत॒ऽइति॒तायादे॒वादे॒वदा॑ना॒न्यदु॒स्तान्यं॑स्मा॒ऽआच॒
शास्वाचं॑गुरस्वेषि॒तश्चं॑होत॒रासि॑भद्र॒वाच्या॑य॒प्रेषि॑तो॒मानु॑षःसू॒क्तवा॒
कायं॑सू॒क्ताब्रू॑हि ॥६१॥ [१४] इतिश्रीवाजसनेयसंहितायांएकविंशो
ऽध्यायः ॥२१॥ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ तेजो

[ॐ तेजोसीति भरद्वाज ऋषिर्वायुर्देवता उष्णिक्छन्दः, सोमयागफल प्राप्तिकामः पाठेविनियोगः॥२२]

सिपंचा, ग्नयऽएका, हिङ्कारायद्वे, तत्त्सवितुर्द्दश, व्विभूर्म्मात्रैका, काय
द्वे, ऽआब्रह्मँस्त्रयोदशशेषादेकैको, नविꣳशतिश्चतुस्त्रिꣳशत् ॥ हरिः
ॐ॥तेजोसि॥तेजोसिशुक्रममृतंमायुष्पाऽआयुंर्म्मेपाहि॥ देवस्यंत्त्वा
सवितुःप्प्रंसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्तांभ्यामाददे ॥ १ ॥ इमामंगृ
ब्भ्णन् ॥ इमामंगृब्भ्णन्नरशनामृतस्यपूर्व्वऽआयुंषिव्विदथेषुकव्या ॥ सा
नोऽअस्म्मिन्त्सुतऽआबंभूवऽऋतस्यसामंन्त्सरमारपंन्ती ॥ २ ॥ अभि ॥ १३ ॥
धाऽअंसि ॥ अभिधाऽअंसिभुवंनमासियन्तासिंधर्त्ता ॥ सत्त्वमग्निंव्वैश्वा

न॒रꣳसप्प्र॑थसङ्ग॑च्छ॒स्वाहा॑कृतः ॥ ३ ॥ स्व॒गात्त्वा॑ । दे॒वेभ्य॑÷प्र॒जाप॑त
ये॒ब्र॒ह्मन्न॒श्व॑म्भ॒न्त्स्यामि॑दे॒वेभ्य॑÷प्प्र॒जाप॑तये॒तेन॑राध्यासम् ॥ तम्ब॑
धानदे॒वेभ्य॑÷प्प्र॒जाप॑तये॒तेन॑राध्नुहि ॥ ४ ॥ प्र॒जाप॑तये॒त्त्वा ॥ प्र॒जाप॑
तये॒त्त्वा॒जुष्ट॑म्प्रोक्षा॑मीन्द्रा॒ग्निभ्यां॑न्त्वा॒जुष्ट॑म्प्रोक्षा॑मिवा॒यवे॑त्त्वा॒जुष्ट
म्प्रोक्षा॑मि॒विश्वे॑भ्यस्त्वादे॒वेभ्यो॒जुष्ट॑म्प्रोक्षा॑मि॒सर्व्वे॑भ्यस्त्वादे॒वे
भ्यो॒जुष्ट॑म्प्रोक्षा॑मि ॥ योऽअर्व्व॑न्त॒ञ्जिघा॑ꣳसति॒तम॒भ्यमी॑ति॒व्वरु॑णः ॥
प॒रोम॑र्त्त÷प॒रःश्वा ॥ ५ ॥ [ ५ ] अ॒ग्नये॒स्वाहा॑ ॥ अ॒ग्नये॒स्वाहा॒सोमा॑

य॒स्वाहा॒पाम्मोदा॑य॒स्वाहा॑सवि॒त्रेस्वाहा॑व्वा॒यवे॒स्वाहा॒व्विष्ण॑वे॒स्वाहेन्द्रा॑
य॒स्वाहा॒बृह॒स्पत॑ये॒स्वाहा॑मि॒त्राय॒स्वाहा॒व्वरु॑णाय॒स्वाहा॑ ॥ ६ ॥ [ १ ]
हि॒ङ्काराय॒स्वाहा॑ ॥ हि॒ङ्काराय॒स्वाहा॒हिङ्कृ॑ताय॒स्वाहा॒क्रन्द॑ते॒स्वाहा॑वक्र॒
न्दाय॒स्वाहा॒प्प्रोथ॑ते॒स्वाहा॑प्प्रप्प्रो॒थाय॒स्वाहा॑ग॒न्धाय॒स्वाहा॑घ्रा॒ताय॒
स्वाहा॒निवि॑ष्टाय॒स्वाहोप॑विष्टाय॒स्वाहा॒सन्दि॑ताय॒स्वाहा॒व्वल्ग॑ते॒स्वाहा
सी॑नाय॒स्वाहा॒शया॑नाय॒स्वाहा॒स्वप॑ते॒स्वाहा॒जाग्र॑ते॒स्वाहा॒कूज॑ते॒स्वा
हा॒प्प्रबु॑द्धाय॒स्वाहा॑व्वि॒जृम्भ॑माणाय॒स्वाहा॒व्विचृ॑ताय॒स्वाहा॒सꣳहा॑ना

य॒स्वाहोप॑स्त्थिताय॒स्वाहाय॑नाय॒स्वाहा॒प्प्राय॑णाय॒स्वाहा॑ ॥ ७ ॥ सु॒ते
स्वाहा॑ ॥ सु॒तेस्वाहा॒धाव॑ते॒स्वाहो॑द्द्रा॒वाय॒स्वाहोद्द्रु॑ताय॒स्वाहा॑शूका॒
राय॒स्वाहा॒शूक्कृ॑ताय॒स्वाहा॒निष॑ण्णाय॒स्वाहोत्त्थि॑ताय॒स्वाहा॑ज॒वाय॒
स्वाहा॒बला॑य॒स्वाहा॑व्वि॒वर्त्त॑मानाय॒स्वाहा॒व्विवृ॑त्ताय॒स्वाहा॑व्विधून्वा॒
नाय॒स्वाहा॒व्विधू॑ताय॒स्वाहा॒शुश्रू॑षमाणाय॒स्वाहा॑शृण्व॒तेस्वाहेक्ष॑मा
णाय॒स्वाहे॑क्षि॒ताय॒स्वाहा॒व्वी॒क्षिताय॒स्वाहा॑निमे॒षाय॒स्वाहा॒यदत्त्ति॒
तस्म्मै॒स्वाहा॒यत्त्पिब॑ति॒तस्म्मै॒स्वाहा॒यन्मूत्र॑ङ्कु॒रोति॒तस्म्मै॒स्वाहा॑कु

वी॒तेस्वाहा॑कृ॒ताय॒स्वाहा॑ ॥ ८ ॥ [ २ ] तत्त्स॑वि॒तुः ॥ तत्त्स॑वि॒तुर्व्वरे॑ण्ण्य॒
म्भर्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योनः॑प्प्रचो॒दया॑त् ॥ ९ ॥ हिर॑ण्ण्य
पाणिमू॒तये॑ । सवि॒तार॒मुप॑ह्वये ॥ सचेत्ता॑दे॒वता॑प॒दम् ॥ १० ॥ दे॒व
स्य॒चेत॑तः ॥ दे॒वस्य॒चेत॑तो॒मही॒म्प्रस॑वि॒तुर्ह॑वामहे ॥ सु॒म॒तिꣳस॒त्त्य
रा॑धसम् ॥ ११ ॥ सु॒ष्टु॒तिꣳसु॑मती॒वृधः॑ ॥ सु॒ष्टु॒तिꣳसु॑मती॒वृधो॑रा॒
तिꣳस॑वि॒तुरी॑महे ॥ प्रदे॒वाय॑मती॒विदे॑ ॥ १२ ॥ रा॒तिꣳसत्त्प॑तिम् ॥
रा॒तिꣳसत्त्प॑तिम्म॒हेस॑वि॒तार॒मुप॑ह्वये ॥ आ॒स॒वन्दे॒ववी॑तये ॥ १३ ॥

दे॒वस्य॑सवि॒तुः ॥ दे॒वस्य॑सवि॒तुर्म्म॒तिमा॑स॒वं॑व्वि॒श्वदे॑व्यम् ॥ धि॒याभ
ग॑म्मनामहे ॥ १४ ॥ अ॒ग्निꣳस्तोमे॑न । बोधयसमिधा॒नोऽअम॑र्त्त्य
म् ॥ ह॒व्यादे॒वेषु॑नोदधत् ॥ १५ ॥ सह॑व्य॒वाट् ॥ सह॑व्य॒वाडम॑र्त्त्यऽ
उ॒शिग्ग्दू॒तश्च॒नो॑हि॒तः ॥ अ॒ग्निर्द्धि॒यास॒मृ॑ण्ण्वति ॥ १६ ॥ अ॒ग्निन्दू॒तम् ॥
अ॒ग्निन्दू॒तम्पु॒रोद॑धेह॒व्य॒वाह॒मुप॑ब्ब्रुवे ॥ दे॒वाँ२॥ऽआसा॑दयादि॒ह ॥ १७ ॥
अजी॑जनो॒हि । प॑वमान॒सूर्य्यं॑व्वि॒धारे॒शक्म॑ना॒पय॑ः ॥ गोजी॑रया॒रꣳह॑
माण॒ःपुर॑न्ध्या ॥ १८ ॥ [१०] व्वि॒भूर्म्मा॒त्रा । प्प्र॒भूःपि॒त्राश्वो॑सि॒हयो॒

स्यत्त्यो॑सि॒मयो॒स्यर्व्वा॑सि॒सप्ति॑रसि॒व्वा॒ज्य॒सि॒व्वृषा॑सिनृ॒मणा॑ऽअसि॥ ययु॒
र्न्नामा॑सि॒शि॒शुर्न्नामा॑स्यादि॒त्त्याना॒म्पत्त्वान्न्वि॑हि॒दे॒वा॑ऽआशापालाऽ
ए॒तन्दे॒वेभ्यो॒ऽश्व॒म्मेधा॑य॒प्प्रोक्षि॑तꣳरक्ष॒तेह॒रन्ति॑रि॒हर॑मतामि॒हधृति॑
रि॒हस्वधृ॑ति॒ःस्वाहा॑ ॥ १९ ॥ [ १ ] काय॒स्वाहा॑ ॥ काय॒स्वा
हा॒कस्मै॒स्वाहा॑कत॒मस्मै॒स्वाहा॒स्वाहा॒धिमाधी॑ताय॒स्वाहा॒मन॑ःप्र॒
जाप॑तये॒स्वाहा॑चि॒त्तंव्वि॒ज्ञा॑ताया॒दि॑त्त्यै॒स्वाहादि॑त्त्यैम॒ह्यै॒स्वाहादि॑त्त्यै
सु॒मृ॒डीका॒यै॒स्वाहा॒सर॑स्वत्त्यै॒स्वाहा॒सर॑स्वत्त्यैपाव॒का॒यै॒स्वाहा॒सर॑स्वत्त्यै

बृ॒ह॒त्यैस्वाहा॑पू॒ष्णेस्वाहा॑पू॒ष्णेप्र॑प॒थ्या॒य॒स्वाहा॑पू॒ष्णेन॒रन्धि॑षा॒य॒स्वा
हा॒त्त्वष्ट्रे॒स्वाहा॒त्त्वष्ट्रे॑तु॒रीपा॑य॒स्वाहा॒त्त्वष्ट्रे॑पु॒रु॒रूपा॑य॒स्वाहा॒व्विष्ण॑वे॒स्वा
हा॒व्विष्ण॑वेनि॒भू॒य॒पा॒य॒स्वाहा॒व्विष्ण॑वेशि॑पिवि॒ष्टा॒य॒स्वाहा॑॥२०॥व्विश्वो॑
दे॒वस्य॑ । ने॒तुर्म्मर्त्तो॑व्वुरीतस॒ख्यम् ॥ व्विश्वो॑रा॒यऽइ॑षुध्यतिद्यु॒म्नं॑वृ॑णी
तपु॒ष्यसे॒स्वाहा॑ ॥ २१ ॥ [ २ ] आब्रह्म॑न् ॥ आब्रह्म॑न्ब्राह्म॒
णोब्र॑ह्मवर्च्च॒सीजा॑यता॒मारा॒ष्ट्रेरा॑ज॒न्य॒ःशूर॑ऽइष॒व्व्योतिव्व्या॒धीम॑हा
॒रथोजा॑यता॒न्दोग्ग्ध्रीधे॒नुर्व्वोढा॑न॒ड्वाना॒शुःसप्ति॒ःपुर॑न्धि॒र्य्योषा॑जि॒

ष्षणूर॑थे॒ष्ठाश्स॒भेयो॒युवास्य॒यज॑मानस्यवी॒रोजा॑यतान्निका॒मेनि॑कामे
नः॑प॒र्ज्जन्यो॑व्वर्षतु॒फल॑वत्त्योन॒ऽओष॑धयःपच्यन्तांय्योगक्षे॒मोन॑ः
कल्पताम् ॥ २२ ॥ [ १ ] प्रा॒णाय॒स्वाहा॑ । पा॒नाय॒स्वाहा॑व्या॒ना
य॒स्वाहा॒चक्षु॑षे॒स्वाहा॒श्श्रोत्रा॑य॒स्वाहा॑व्वा॒चेस्वाहा॒मन॑से॒स्वाहा॑ ॥ २३ ॥
[ १ ] प्राच्यै॑दि॒शे । स्वाहा॒र्व्वाच्यै॑दि॒शेस्वाहा॒दक्षि॑णायैदि॒शेस्वाहा॒
र्व्वाच्यै॑दि॒शेस्वाहा॑प्प्रतीच्यै॑दि॒शेस्वाहा॒र्व्वाच्यै॑दि॒शेस्वाहोदी॑च्यैदि॒शेस्वा
हा॒र्व्वाच्यै॑दि॒शेस्वाहो॒र्ध्वायै॑दि॒शेस्वाहा॒र्व्वाच्यै॑दि॒शेस्वाहावा॑च्यैदि॒शेस्वा

हा॒र्व्वाञ्च्यै॑दि॒शेस्वाहा॑ ॥ २४ ॥ [ १ ] अ॒द्भ्यःस्वाहा॑ । वा॒ब्भ्र्यः
स्वाहो॑द॒काय॒स्वाहा॒तिष्ठ॑न्तीब्भ्य॒ःस्वाहा॒स्रव॑न्तीब्भ्य॒ःस्वाहा॒स्यन्द॑
मा॑नाब्भ्य॒ःस्वाहा॒कूप्प्या॑ब्भ्य॒ःस्वाहा॒सूद्द्या॑ब्भ्य॒ःस्वाहा॒धार्य्या॑ब्भ्य॒ःस्वा
हा॑र्ण्ण॒वाय॒स्वाहा॑समु॒द्राय॒स्वाहा॑सरि॒राय॒स्वाहा॑ ॥ २५ ॥ [ १ ]
व्वाता॑य॒स्वाहा॑ । धू॒माय॒स्वाहा॒ब्भ्राय॒स्वाहा॑मे॒घाय॒स्वाहा॑व्वि॒द्द्यो
त॑मानाय॒स्वाहा॑स्त॒नय॑ते॒स्वाहा॑व॒स्फूर्ज्ज॑ते॒स्वाहा॒व्वर्ष॑ते॒स्वाहा॑व॒वर्ष॑ते
स्वाहो॒ग्ग्रंव्वर्ष॑ते॒स्वाहा॑शी॒घ्रंव्वर्ष॑ते॒स्वाहो॑द्गृ॒ह्ण॒ते॒स्वाहो॑द्गृ॑हीताय॒स्वाहा॑

प्रुष्णतेस्वाहाशीकायतेस्वाहाप्रुष्वाभ्यःस्वाहाह्रादुनीभ्यःस्वा
हानीहारायस्वाहा ॥ २६ ॥ [ १ ] अग्नयेस्वाहा ॥ अग्नयेस्वाहा
सोमायस्वाहेन्द्रायस्वाहापृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहादि
ग्भ्यःस्वाहाशाभ्यःस्वाहोर्व्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा ॥ २७॥
[ १ ] नक्षत्रेभ्यःस्वाहा । नक्षत्रियेभ्यःस्वाहाहोरात्रे
भ्यःस्वाहार्द्धमासेभ्यःस्वाहामासेभ्यःस्वाहऽऋतुभ्यःस्वाहार्त्तवे
भ्यःस्वाहासंवत्त्सरायस्वाहाद्यावापृथिवीभ्याꣳस्वाहाचन्द्रायस्वा

हासूर्य्यायस्वाहांरश्मिभ्यꣳस्वाहाव्वसुंभ्यꣳस्वाहांरुद्रेभ्यꣳस्वा
हांदित्त्येभ्यꣳस्वाहांमरुद्भ्यꣳस्वाहाव्विश्वेभ्योदेवेभ्यꣳस्वाहामूले
भ्यꣳस्वाहाशाखांभ्यꣳस्वाहाव्वनस्प्पतिंभ्यꣳस्वाहापुष्पेभ्यꣳस्वाहा
फलेभ्यꣳस्वाहौषंधीभ्यꣳस्वाहां ॥ २८ ॥ [ १ ] १३००
शतम् ॥ पृथिव्यैस्वाहां ॥ पृथिव्यैस्वाहान्तरिक्षायस्वाहांदिवेस्वाहा
सूर्य्यायस्वाहांचन्द्रायस्वाहानक्षत्रेभ्यꣳस्वाहाद्भ्यःस्वाहौषंधीभ्यꣳ
सं. ३७ स्वाहाव्वनस्प्पतिंभ्यꣳस्वाहांपरिप्लवेभ्यꣳस्वाहांचराचरेभ्यꣳस्वाहांसरी

सृपेभ्य॒ःस्वाहा॑ ॥ २९ ॥ [ १ ] अस॑वे॒स्वाहा॑ ॥ अस॑वे॒स्वाहा॒व्वस॑वे॒
स्वाहा॑व्वि॒भुवे॒स्वाहा॒व्विव॑स्वते॒स्वाहा॑गण॒श्रिये॒स्वाहा॑ग॒णप॑तये॒स्वाहा॑भि॒
भुवे॒स्वाहाधि॑पतये॒स्वाहा॑शू॒षाय॒स्वाहा॑सꣳ॒सर्प्पा॑य॒स्वाहा॑च॒न्द्राय॒स्वा
हा॒ज्ज्योति॑षे॒स्वाहा॑मलिम्लु॒चाय॒स्वाहा॒दिवा॑प॒तय॑ते॒स्वाहा॑ ॥ ३० ॥
[ १ ] मध॑वे॒स्वाहा॑ ॥ मध॑वे॒स्वाहा॒माध॑वाय॒स्वाहा॑शु॒क्राय॒स्वाहा॒शुच॑ये॒
स्वाहा॒नभ॑से॒स्वाहा॑नभ॒स्याय॒स्वाहे॒षाय॒स्वाहो॒र्ज्जा॑य॒स्वाहा॒सह॑से॒स्वाहा॑
सह॒स्याय॒स्वाहा॒तप॑से॒स्वाहा॑तप॒स्याय॒स्वाहा॑ꣳहसस्प॒तये॒स्वाहा॑ ॥ ३१ ॥

[१] व्वाजा॑य॒स्वाहा॑। प्प्रस॒वाय॒स्वाहा॑पि॒जाय॒स्वाहा॒क्क्रत॑वे॒स्वाहा॒स्व॒ः
स्वाहा॑मू॒र्द्ध्नेस्वाहा॑व्व्यश्श्नु॒विने॒स्वाहान्त्या॑य॒स्वाहान्त्या॑यभौव॒नाय॒स्वा
हा॒भुव॑नस्य॒पत॑ये॒स्वाहाधि॑पतये॒स्वाहा॑प्प्र॒जाप॑तये॒स्वाहा॑ ॥३२॥ [१]
आयु॑र्य्य॒ज्ञेन॑। कल्प्पता॒ꣳ॒स्वाहा॑प्प्रा॒णोय॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॑पा॒नो
य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॑व्व्या॒नोय॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहो॑दा॒नोय॒ज्ञेन॑क
ल्प्पता॒ꣳ॒स्वाहा॑समा॒नोय॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॒चक्षु॑र्य्य॒ज्ञेन॑कल्प्प
ता॒ꣳ॒स्वाहा॒श्श्रोत्रं॑य्य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॒व्वाग्ग्य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वा

हा॒मनो॑य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॒त्त्क्मा॑य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॑ब्र॒ह्मा
य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॒ज्ज्योति॑र्य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॒स्व॒र्य॒ज्ञेन॑क
ल्प्पता॒ꣳ॒स्वाहा॑पृ॒ष्ठꣳय॒ज्ञेन॑कल्प्पता॒ꣳ॒स्वाहा॑य॒ज्ञोय॒ज्ञेन॑कल्प्पता॒ꣳ॒
स्वाहा॑॥३३॥[१]एक॑स्मै॒स्वाहा॑॥एक॑स्मै॒स्वाहा॒द्वाभ्या॒ꣳ॒स्वाहा॑श॒
ताय॒स्वाहैक॑शताय॒स्वाहा॒व्युष्ट्यै॒स्वाहा॑स्व॒र्गाय॒स्वाहा॑ ॥ ३४ ॥ [ १ ]
इतिश्रीवाजसनेयसंहितायांद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ हिरण्यगर्भो,-यःप्राणतोद्वि

[ॐ हिरण्यगर्ब्भः समिति विश्वामित्रऋषिः सूर्यो देवता त्रिष्टुप्छन्दः सूर्यभक्तिफलप्राप्तिकामः पाठे -
विनियोगः॥ २३॥]

कौ,युंजंत्यष्टौ,व्वायुश्चापञ्च,प्राणायतिस्र,उत्सक्थ्याद्द्वादश,गायत्री
त्रिष्टुप्,-कस्त्वाषट्कौ,कःस्विदष्टौ,कास्विद्दश,सुभूःस्वयंभूस्तिस्र,ए
कादशपञ्चषष्टिः ॥ हरिःॐ॥हि॒र॒ण्य॒ग॒र्ब्भः॒सम्॥ हि॒र॒ण्य॒ग॒र्ब्भः॒सम॑
व॒र्त्तताग्ग्रे॑भूतस्य॑जा॒तः॒प॒ति॒रेक॑ऽआसीत् ॥ सदा॑धारपृथि॒वीन्द्यामु॒ते
माङ्क॒स्म्मै॑दे॒वाय॑ह॒विषा॑व्विधेम ॥१॥ उ॒प॒या॒मगृ॑हीतोसि । प्प्र॒जाप॑तये
त्त्वा॒जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒योनि॒ꣳसू॒र्य्य॑स्तेमहि॒मा॥ यस्ते॑हन्त्संव्वत्स॒रे॑महि॒
मास॑म्ब॒भूव॒यस्ते॑व्वा॒याव॒न्तरि॑क्षेमहि॒मास॑म्ब॒भूव॒यस्ते॑दि॒विसू॒र्य्ये॑महि॒

मासम्बभूवतस्म्मैतेमहिम्न्नेप्प्रजापतयेस्वाहादेवेब्भ्यः ॥२॥[२] यः
प्प्राणतः ॥ यः प्प्राणतोनिमिषतोमहित्त्वैकऽइद्राजाजगतोबभूव ॥ यऽ
ईशेऽअस्यद्द्विपदश्चतुष्प्पदः कस्म्मैदेवायहविषाव्विधेम ॥ ३ ॥ उपया
मगृहीतोसि । प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिश्चन्द्रमास्तेमहि
मा ॥ यस्तेरात्त्रौसंवत्त्सरेमहिमासम्बभूवयस्तेपृथिव्यामग्नौमहिमा
सम्बभूवयस्तेनक्षत्त्रेषुचन्द्रमसिमहिमासम्बभूवतस्म्मैतेमहिम्न्नेप्प्र
जापतयेदेवेब्भ्यः स्वाहा ॥४॥ [२] युञ्जन्तिब्ब्रध्नम् ॥ युञ्जन्तिब्ब्रध्नम्

रु॒षञ्चर॑न्त॒म्परि॑त॒स्थुष॑ः ॥ रोच॑न्तेरोच॒नादि॒वि ॥ ५॥ युञ्जन्त्य॑स्य ॥
युञ्जन्त्य॑स्य॒काम्म्या॒हरी॒व्विप॑क्षसा॒रथे॑ ॥ शोणा॑धृ॒ष्णूनृ॒वाह॑सा ॥ ६ ॥
यद्वात॑ः ॥ यद्वातो॑ऽअ॒पोऽअग॑नीग॒न्प्रि॒यामिन्द्र॑स्य॒तन्व॒म् ॥ ए॒तꣳ
स्तोत॑र॒नेन॑प॒थापुन॒रश्व॒मावर्त्त॑यासिनः ॥ ७ ॥ व्वस॑वस्त्वा । ञ्जन्तु
गा॒य॒त्रेण॒च्छन्द॑सा॒रुद्रा॒स्त्वा॑ञ्जन्तु॒त्रैष्टु॑भेन॒च्छन्द॑सादि॒त्त्यास्त्वा॑ञ्जन्तु
जाग॑तेन॒च्छन्द॑सा ॥ भूर्भुव॒ःस्व॒र्ल्लाजी३॥ञ्छाँची३॥न्यव्ये॒गव्य॑ऽ
ए॒तद॒न्न॑मत्त॒देवाऽए॒तद॒न्न॑मद्धि॒प्प्रजापते ॥ ८ ॥ कःस्वि॑त् ॥ कः

स्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किꣳस्विद्धिमस्यभेषज
ङ्किम्वावपनम्महत् ॥ ९ ॥ सूर्य्यऽएकाकी । चरतिचन्द्रमाजाय
तेपुनः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥ १० ॥ का
स्वित् ॥ कास्विदासीत्त्पूर्व्वचित्तिः किꣳस्विदासीद्बृहद्वयः ॥ कास्वि
दासीत्त्पिलिप्पिलाकास्विदासीत्त्पिशङ्गिला ॥ ११ ॥ द्यौरासीत् ॥
द्यौरासीत्त्पूर्व्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अविरासीत्त्पिलिप्पिला
रात्रिरासीत्त्पिशङ्गिला ॥ १२ ॥ [ ८ ] वायुष्ट्वा । पचतैरवत्त्वसितग्री

वृ॒श्श्छागैर्न्य॒ग्रोधंश्च॒म॒सैःशंल्म॒लिर्वृंद्ध्यां ॥ ए॒षस्यरा॒त्थ्योवृ॒षांप॒ड्भि
श्च॒तु॒र्भि॒रेदं॒गन्ब्र॒ह्माकृंष्णश्च॒नो॒वतु॒नमो॒ग्नयें ॥ १३ ॥ सꣳशिंतोर॒
श्मिनां ॥ सꣳशिंतोर॒श्मिना॒रथ॒ꣳसꣳशिंतोर॒श्मिना॒हयंः ॥ सꣳ
शिंतोऽअ॒प्स्व॒प्सुजाब्र॒ह्मासोमंपुरोगवꣳ ॥ १४ ॥ स्व॒यंव्वांजिन् ॥ स्व॒यं
व्वांजिँस्त॒न्वृङ्कल्प्पयस्वस्व॒यंऽयंजस्वस्व॒यज्जुंषस्व ॥ म॒हि॒मा॒ते॒न्येन॒नस॒
न्नशें ॥ १५ ॥ नवैं ॥ नवाऽउंऽए॒तन्म्रिं॒यसे॒नारिंष्यसिदे॒वाँ २॥ ऽइदेंषिप॒
थिभिंः सु॒गेभिंः ॥ य॒त्रासंतेसु॒कृतो॒यत्र॒तेय॒युस्तत्र॒त्त्वादे॒वःसंवि॒तादं

धातु॥१६॥ अग्निःपशुः॥ अग्निःपशुरासीत्तेनायजन्तसऽएतंल्लोक
मजयद्यस्मिन्नग्निःसतेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअ
पः ॥ वायुःपशुरासीत्तेनायजन्तसऽएतंल्लोकमजयद्यस्मिन्वायुः
सतेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ सूर्य्य÷पशुरासीत्ते
नायजन्तसऽएतंल्लोकमजयद्यस्मिन्त्सूर्य्यꣳसतेलोकोभविष्यति
तञ्जेष्यसिपिबैताऽअपः॥१७॥[५]प्राणायस्वाहा।पानायस्वाहाव्या
नायस्वाहा॥ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन॥ ससस्त्यश्व

कः॒सु॒भ॑द्रिकाङ्काम्पीलवा॒सिनी॑म्॥ १८॥ ग॒णाना॑न्त्वा। ग॒णप॑तिꣳहवा
म॒हे॒प्प्रि॒याणा॑न्त्वाप्प्रि॒यप॑तिꣳहवामहेनिधी॒नान्त्वा॑निधि॒पति॑ꣳहवा
म॒हेव्वसोमम ॥ आहम॑जानिगर्ब्भ॒धमात्त्वम॑जासिगर्ब्भ॒धम् ॥ १९ ॥
ताऽउ॒भौ । च॒तुर॑÷प॒दः॒सु॒म्प्रसा॑रयावस्व॒र्ग्गे॑लो॒केप्प्रोर्ण्णु॑वा॒थां॑वृषा॑वा॒
जीरे॑तो॒धारेतो॑दधातु ॥ २० ॥ [ ३ ] उत्स॑क्थ्या॒ऽअव॑ । गु॒दन्धे॑हि॒
सम॒ञ्जिञ्चा॑रयावृषन् ॥ यस्त्री॒णाञ्जी॑व॒भोज॑नः ॥ २१ ॥ य॒कास॒कौ।
श॑कुन्ति॒काह॒लगिति॒वञ्च॑ति । आह॑न्तिग॒भेपसो॒निग॑ल्गलीति॒धार॑

का ॥ २२ ॥ यकोसकौ । शकुन्तकऽआहलगितिवञ्चति ॥ विवक्ष
तऽइवतेमुखमध्वर्य्योमानस्त्वमभिभाषथाः ॥ २३ ॥ माताच । ते
पिताचतेग्ग्रेवृक्षस्यरोहतः ॥ प्रतिलामीतितेपितागभेमुष्टिमतꣳस
यत् ॥ २४ ॥ माताच । तेपिताचतेग्ग्रेवृक्षस्यक्रीडतः ॥ विवक्षतऽ
इवतेमुखम्ब्रह्मन्मात्वंवदोबहु ॥ २५ ॥ ऊर्द्ध्वामेनाम् ॥ ऊर्द्ध्वामेना
मुच्छ्रापयगिरौभारꣳहरन्निव ॥ अथास्यैमध्यमेधताꣳशीतेवातेपुन ॥ २४ ॥
न्निव ॥ २६ ॥ ऊर्द्ध्वमेनम् ॥ ऊर्द्ध्वमेनमुच्छ्रयताद्गिरौभारꣳहरन्निव ॥

अथा॑स्य॒मद्ध्य॑मेजतुशी॒तेव्वाते॑पु॒नन्नि॑व ॥ २७ ॥ यद॑स्याꣳ ॥ यद॑स्याऽ
अꣳहु॒भेद्याः॑कृ॒धुस्थू॒लमु॒पात॑सत् ॥ मु॒ष्काविद॑स्याऽएजतोगोश॒फेश॑
कु॒लावि॑व ॥ २८ ॥ यद्दे॒वासः॑ ॥ यद्दे॒वासो॑ल॒लाम॑ङ्गुम्प्रवि॑ष्टीमि॒नमा
वि॒षुꣳ ॥ स॒क्थ्नादे॑दिश्यते॒नारी॑स॒त्त्यस्या॑क्षि॒भुवो॑यथा ॥ २९ ॥ यद्ध॑
रि॒णः ॥ यद्ध॑रि॒णोयव॒मत्ति॒नपु॒ष्टम्प॒शुमन्य॑ते ॥ शू॒द्रायदर्य्य॑जारा॒न
पोषा॑यधनायति ॥ ३० ॥ यद्ध॑रि॒णः ॥ यद्ध॑रि॒णोयव॒मत्ति॒नपु॒ष्टम्ब॒हुम
न्य॑ते । शू॒द्रोयदर्य्या॑यैजा॒रोनपोष॒मनु॑मन्यते ॥ ३१ ॥ द॒धि॒क्राव्णो॑ऽ

संहि. अकारिषम् ॥ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ॥ उ. अ.
॥ २५ ॥ सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत् ॥ ३२ ॥ [ १२ ] गाय ॥ २३ ॥
त्रीत्रिष्टुप् ॥ गायत्रीत्रिष्टुब्जगत्त्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्त्युष्णिहा
ककुप्प्सूचीभिः शम्म्यन्तुत्त्वा ॥ ३३ ॥ द्विपदायाः ॥ द्विपदायाश्च
तुष्पदास्त्रिपदायाश्चषट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाःसूचीभिः
शम्म्यन्तुत्त्वा ॥ ३४ ॥ महानाम्न्योरेवत्त्यः ॥ महानाम्न्योरेवत्त्योवि ॥ २५ ॥
श्वाऽआशाः प्प्रभूवरीः ॥ मैघीर्विद्युतोवाचः सूचीभिः शम्म्यन्तुत्त्वा

॥ ३५ ॥ नाउर्यँस्ते ॥ नाउर्यँस्ते॒पत्न्यो॒लोम॒व्विचिंन्वन्तुमनी॒षयां ॥
दे॒वाना॒म्पत्न्यो॒दिशंः सू॒चीभिंः शम्म्यन्तु॒त्त्वा ॥ ३६ ॥ र॒ज॒ताहरिं
णीः ॥ र॒ज॒ताहरिंणी॒ः सीसा॒युजोंयुज्यन्ते॒कर्म्मभिः ॥ अश्वंस्यव्वा॒जिनं
स्त्व॒चिसिमाः शम्म्यन्तु॒शम्म्यंन्तीः ॥ ३७ ॥ कु॒विद॒ङ्ग । यवंमन्तो॒
यवं॒ञ्चि॒द्यथा॒दान्त्यंनु॒पूर्व्वंव्वि॒यूयं ॥ इ॒हेहैषाङ्कृणु॒हि॒भोजंनानि॒येब॒र्हि
षो॒नमंऽउक्तिं॒यजंन्ति ॥ ३८ ॥ [ ६ ] कस्त्वा ॥ कस्त्वाच्छ्यंति॒
कस्त्वा॒व्विशांस्ति॒कस्ते॒गात्त्रांणिशम्म्यति ॥ कऽउंते॒शमि॒ता॒कविः

॥ ३९ ॥ ऋ॒तव॑स्ते ॥ ऋ॒तव॑स्तऽऋतु॒थाप॒र्व्व॑शामि॒तारो॒व्विशा॑सतु ॥
सं॒व्व॒त्स॒रस्य॒तेज॑सा॒शमी॑भिः॒शम्म्य॑न्तु॒त्त्वा ॥ ४० ॥ अ॒र्द्ध॒मा॒साः॒प
रू॒ꣳषि । ते॒मा॒साऽआच्छ्य॑न्तु॒शम्म्य॑न्तꣳ ॥ अ॒हो॒रा॒त्राणि॑म॒रुतो॒
व्विलि॑ष्टꣳसू॒दय॑न्तुते ॥ ४१ ॥ दै॒व्व्या॑ऽअ॒द्ध्व॒र्य्यव॑ः ॥ दै॒व्व्या॑ऽअ॒द्ध्व॒र्य्यव॒
स्त्वाच्छ्य॑न्तु॒व्विच॑शासतु ॥ गात्त्रा॑णिप॒र्व्व॒शस्ते॒सिमा॑ꣳकृण्व॒न्तु॒शम्म्य॑
न्तीꣳ ॥ ४२ ॥ द्यौस्ते॑ । पृ॒थि॒व्व्यु॒न्तरि॑क्षं॒व्वा॒यु॒श्छि॒द्रं॑पृ॒णातु॒ते ॥ सू॒
र्य्य॑स्ते॒नक्ष॑त्रैꣳस॒ह॒लो॒कङ्कृ॑णोतुसा॒धु॒या ॥ ४३ ॥ शन्ते॑ ॥ शन्ते॒परे॑

भ्यो॒गात्रे॑भ्य॒ᳲशम॒स्त्वव॑रेभ्यᳲ ॥ शम॒स्तथभ्यो॑म॒ज्जभ्य॒ᳲशम्म्व॑स्तुत॒
न्वै॒तव॑ ॥ ४४ ॥ [ ६ ] कᳲस्वि॑त् ॥ कᳲस्वि॑दे॒का॒की च॑रति॒कऽउ॑
स्वि॒ज्जाय॒ते॒पुन॑÷ ॥ किꣳस्वि॒द्धि॒मस्य॑भे॒षज॒ङ्कि॒म्म्वा॒व॒प॑न॒म्म॒हत्॥४५॥
सूर्य्य॑ऽएका॒की । च॑रति॒चन्द्र॒मा॑जाय॒ते॒पुन॑÷ ॥ अ॒ग्निर्हि॒मस्य॑भे॒षज
म्भूमि॑रा॒वप॑न॒म्म॒हत् ॥ ४६ ॥ किꣳस्वि॑त् ॥ किꣳस्वि॒त्त्सूर्य्य॑सम॒
ज्ज्योति॒ᳲकिꣳस॑मु॒द्रस॑म॒ꣳसर॑÷ ॥ किꣳस्वि॑त्पृथि॒व्यै॒व्वर्षी॑य॒ᳲकस्य॒मा
त्रा॒नाव्वि॑द्यते ॥ ४७ ॥ ब्रह्म॒सूर्य्य॑समम् ॥ ब्रह्म॒सूर्य्य॑सम॒ज्ज्योति॒

द्यौःस॑मु॒द्रस॑मꣳ॒सरः॑ ॥ इन्द्रः॑पृथि॒व्यैवर्षी॑या॒न्गोस्तु॒मात्रा॒नवि॑द्यते
॥ ४८ ॥ पृ॒च्छामि॑त्वा । चि॒तये॑दे॒वसख॒यदि॒त्वम॒त्र॒मन॑साज॒गन्थ॑ ॥
ये॒षु॒विष्णु॑स्त्रि॒षु॒प॒देष्वे॒ष्टस्ते॒षु॒विश्व॒म्भुव॑न॒माविवे॑शा३॥ ॥ ४९ ॥ अ
पि॒ते॒षु॑ । त्रि॒षु॒प॒देष्व॑स्मि॒न्ये॒षु॒विश्व॒म्भुव॑न॒मावि॒वेश॑ ॥ स॒द्यःप॑र्य्यै
मिपृथि॒वीमु॒तद्यामेके॑ना॒ङ्गेन॑दि॒वोऽअ॒स्यपृ॒ष्ठम् ॥ ५० ॥ केष्व॒न्तः ।
पु॒रु॑षऽआवि॑वेश॒कान्य॒न्तःपु॒रु॑षे॒ऽअर्पि॑तानि ॥ ए॒तद्ब्र॑ह्म॒न्नु॒प॑वल्हा
मसि॒त्वाकिꣳस्वि॑न्न॒ःप्रति॑वोचा॒स्यत्र॑ ॥ ५१ ॥ प॒ञ्चस्व॒न्तः । पु॒रु॑षऽ

आविवेशतान्यन्तश्पुरुषेऽअर्प्पितानि ॥ एतत्त्वात्रप्प्रतिमन्वानोऽ
अस्मिनमाययाभवस्युत्तरोमत् ॥५२॥[८]कास्वित् ॥ कास्विदासी
प्पूर्व्वचित्तिःकिंस्विदासीद्बृहद्वय÷ ॥ कास्विदासीत्त्पिलिप्पिलाका
स्विदासीत्त्पिशङ्गिला॥५३॥द्यौरासीत्॥ द्यौरासीत्त्पूर्व्वचित्तिरश्श्वऽआ
सीद्बृहद्वय÷ ॥ अविरासीत्त्पिलित्त्पिलारात्रिरासीत्त्पिशङ्गिला ॥५४॥
काऽईम् ॥ काऽईमरेपिशङ्गिलाकाऽईङ्कुरुपिशङ्गिला ॥ कऽईमा
स्कन्दमर्षतिकऽईम्पन्थाविसर्प्पति ॥५५॥ अजारे । पिशङ्गिला

श्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्त्यहिꣳपन्थांविसर्प्प
ति ॥ ५६ ॥ कत्त्यस्य । विष्ठाःकत्त्यक्षराणिकतिहोमासꣳकतिधा
समिद्धꣳ ॥ यज्ञस्यत्त्वाविदथापृच्छमत्त्रकतिहोतारऽऋतुशोयजन्ति
॥ ५७ ॥ षडस्य । विष्ठाःशतमक्षराण्ण्यशीतिर्होमाःसमिधो
हतिस्रः ॥ यज्ञस्यतेविदथाप्प्रब्रवीमिसप्तहोतारऽऋतुशोयजन्ति
॥ ५८ ॥ कोऽअस्य । वेदभुवनस्यनाभिङ्कोद्यावापृथिवीऽअन्तरि
क्षम् ॥ कःसूर्य्यस्यवेदबृहतोजनित्त्रङ्कोवेदचन्द्रमसंय्यतोजाः ॥

॥ ५९ ॥ व्वेदा॒हम् ॥ व्वेदा॒हम॒स्यभुव॑नस्य॒नाभि॒व्वेद॒द्यावा॑पृथि॒वीऽ
अ॒न्तरि॑क्षम् ॥ व्वेद॒सूर्य्य॑स्यबृह॒तोज॒नित्र॒मथो॑व्वेदच॒न्द्रम॑सं॑यतो॒
जाः ॥ ६० ॥ पृच्छामि॑त्त्वा ॥ पृच्छामि॑त्त्वा॒पर॒मन्त॑म्पृथि॒व्याःपृ
च्छामि॒यत्र॒भुव॑नस्य॒नाभिः॑ ॥ पृच्छामि॑त्त्वा॒व्वृष्णो॒ऽअश्व॑स्य॒रेतः॑
पृच्छामि॑व्वा॒चःप॑र॒मं॑व्व्योम ॥ ६१ ॥ इ॒यंव्वेदिः॑ ॥ इ॒यंव्वेदि॒ःपरो॒ऽ
अन्तः॑पृथि॒व्याऽअ॒यं॑य॒ज्ञोभुव॑नस्य॒नाभिः॑ ॥ अ॒यꣳसोमो॒व्वृष्णो॒ऽ
अश्व॑स्य॒रेतो॑ब्र॒ह्मायं॑व्वा॒चःप॑र॒मं॑व्व्योम ॥ ६२ ॥ [ १० ] सु॒भूः

स्वं॑य॒म्भूः॒ । प्रं॑थ॒मो॒न्तम्मँ॑ह॒त्त्य॑र्ण्ण॒वे ॥ द॒धे॒ह॒गर्भँ॑मृ॒त्त्वियं॒य्यतो॑जा॒
तः॒प्र॒जाप॑तिः॒ ॥ ६३ ॥ होता॑यक्षत् ॥ होता॑यक्षत्प्र॒जाप॑ति॒ꣳसोम॑
स्यमहि॒म्म्नः॒ ॥ जु॒षता॒म्पिब॑तु॒सोम॒ꣳहोत॒र्य्यज॑ ॥ ६४ ॥ प्रजा॑पते॒न ।
त्त्वदे॒ता॒न्न्य॒न्न्यो॑व्वि॒श्वा॑रू॒पा॒णि॒प॒रि॒ता॑ब॑भूव॥यत्का॑मास्तेजु॒हु॒मस्त॒न्नो॑ऽ
अस्तुव्व॒यꣳस्या॑म॒पत॑योर॒यी॒णाम् ॥ ६५ ॥ [३] इतिश्रीवाजसनेयसं
हितायांत्रयोविंशोऽध्यायः॥२३॥ ॥श्रीवेदपुरुषायनमः॥ अनुवाक्
सूत्रम्॥ अश्वस्तूपरो,-धूम्रान्वसन्ताय,-समुद्रायशिशुमारान्,-मयुः

[ॐ अश्वस्तूपर॰ इति जमदग्नि ऋषिः प्रजापतिर्देवता बृहती छन्दः श्रेयफलप्राप्तिकामः पाठेविनियोगः ॥२४॥]

प्राजापत्योदशका, श्चत्वारश्चत्वारिꣳशत् ॥ हरिः ॐ ॥ अश्वंस्तूपरः ॥ अश्वंस्तूपरोगोमृगस्तेप्प्राजापत्त्याः कृष्णग्ग्रीवऽआग्ग्नेयोरराटेपुरस्तांत्सारस्वतीमेष्ष्युधस्ताद्धन्न्वोराश्विनावधोरांमौबाह्वोः सौमापौष्ष्णः श्यामोनाब्भ्यांꣳसौर्य्ययामौश्वेतश्चंकृष्णश्चंपार्श्वयोस्त्वाष्ट्रौलोंमशसंक्क्थौसक्क्थ्योर्व्वांयव्व्य ÷ श्वेतः पुच्छऽइन्द्रांयस्वपस्यायव्वेहद्वैष्ष्णवोव्वांमनः ॥ १ ॥ रोहितोधूम्म्ररोंहितꣳ। कर्क्कन्धुरोंहितस्तेसौम्म्याबब्भ्रुरंरुणबंब्भ्रुꣳशुकंबब्भ्रुस्तेव्वांरुणाः शितिरन्ध्रोन्न्यतं÷शितिरन्ध्रꣳ

समन्तशितिरन्ध्रस्तेसावित्त्राःशितिबाहुरन्यत÷शितिबाहुःसमन्त
शितिबाहुस्तेबार्हस्पत्त्याःपृषतीक्षुद्रपृषतीस्त्थूलपृषतीतामैत्त्रावरु
ण्ण्य÷ ॥ २ ॥ शुद्धवालःसर्व्वशुद्धवालः ॥ शुद्धवालःसर्व्वशुद्धवालोम
णिवालस्तऽआश्विनाःश्येत÷श्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्ण्णा
यामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः ॥ ३ ॥ पृश्निस्तिरश्चीनपृ
श्निः।पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्तेमारुताःफल्गूर्ल्लोहितोर्ण्णीपल
क्षीताःसारस्वत्त्य÷प्लीहाकर्ण्ण÷शुण्ठाकर्ण्णोध्यालोहकर्ण्णस्तेत्त्वा

ष्ट्राः कृ॒ष्णग्ग्री॑वः शि॑ति॒कक्षो॑ञ्जिस॒क्थस्तऽऐ॑न्द्रा॒ग्नाः कृ॒ष्णाञ्जि॒र
ल्प्पा॑ञ्जि॒र्म्म॒हा॑ञ्जि॒स्तऽउ॑ष॒स्याः ॥ ४ ॥ शि॒ल्प्पा वै॑श्वदे॒व्यः ॥ शि॒ल्प्पा
वै॑श्वदे॒व्यो॒ रो॑हि॑ण्य॒स्त्र्यव॑यो वा॒चे वि॑ज्ञा॒ताऽअदि॑त्यै॒ सरू॑पा धा॒त्रे व॑त्सत॒
र्य्यो॑ दे॒वाना॒म्पत्नी॑भ्यः ॥५॥ कृ॒ष्णग्ग्री॑वाऽआग्ने॒याः । शि॑ति॒भ्रवो॒
वसू॑ना॒ꣳ रोहि॑ता रु॒द्राणा॑ꣳ श्वे॒ताऽअ॑वरो॒किण॑ऽआदि॒त्याना॒न्नभो॑रू
पाः पा॒र्ज्ज॑न्याः ॥ ६ ॥ उ॒न्न॒तऽऋ॑ष॒भः ॥ उ॒न्न॒तऽऋ॑ष॒भो वा॑म॒नस्तऽऐ
न्द्रावैष्ण॒वाऽउ॑न्न॒तः शि॑तिबा॒हुः शि॑तिपृ॒ष्ठस्तऽऐ॑न्द्राबा॒र्हस्प॒त्याः शु

केरूपाव्वाजिनाःकुल्म्माषांऽआग्ग्निमारुताःश्यामाःपौष्णाः ॥७॥
एताऽऐन्द्राग्ग्नाः ॥ एताऽऐन्द्राग्ग्नाद्विरूपाऽअग्ग्नीषोमीयाव्वाम
नाऽअनड्वाहऽआग्ग्नावैष्णवाव्वशामैत्रावरुण्योन्यतऽएन्योमैत्र्य÷
॥ ८ ॥ कृष्णग्ग्रीवाऽआग्ग्नेयाः ॥ कृष्णग्ग्रीवाऽआग्ग्नेयाबभ्र
व÷सौम्म्याःश्वेताव्वायव्व्याऽअविज्ञाताऽअदित्त्यैसरूपाधात्रेव्वत्सत
र्य्योदेवानाम्म्पत्नीब्भ्यः ॥ ९ ॥ कृष्णाभौमाः ॥ कृष्णाभौ
माधूम्म्राऽआन्तरिक्षाबृहन्तोदिव्व्याःशबलाव्वैद्युताःसिध्ध्मास्तार

काः ॥ १० ॥ [ १० ] धूम्म्रान्वंसन्तायं ॥ धूम्म्रान्वंसन्तायाल
भतेश्वेतान्ग्रीष्मायंकृष्णान्वर्षाभ्योंरुणाञ्छरदेपृषंतोहेमन्तायं
पिशङ्गाञ्छिशिराय ॥ ११ ॥ त्र्यवंयोगायत्र्यै । पञ्चांवयस्त्रिष्टुभें
दित्त्यवाहोजगंत्यैत्रिवत्त्साऽअंनुष्टुभेंतुर्य्यंवाहंऽउष्णिहें ॥ १२ ॥
पृष्ठवाहोंविराजें ॥ पृष्ठवाहोंविराजंऽउक्षाणोंबृहत्त्याऽऋषभाःककु
भेंनड्वाहं÷पङ्क्त्यैधेनवोतिंच्छन्दसे ॥ १३ ॥ कृष्णग्ग्रीवाऽआग्नेयाः ॥
कृष्णग्ग्रीवाऽआग्नेयाबभ्रवं÷सौम्म्याऽउंपद्ध्वस्ताःसांवित्त्राव्वंत्सत

र्य्य÷सारस्वत्य÷श्यामाःपौष्णाःपृश्नयोमारुताबहुरूपावैश्वदेवाव्वशाद्यावापृथिवीयाः ॥ १४ ॥ उक्ताःसञ्चराः ॥ उक्ताःसञ्चराऽएताऽऐन्द्राग्नाःकृष्णाव्वारुणाःपृश्नयोमारुताःकायास्तूपराः ॥ १५ ॥ अग्नयेनीकवते । प्प्रथमजानालभतेमरुद्भ्य÷सान्तपनेब्भ्य÷सवात्त्यान्मरुद्भ्योगृहमेधिब्भ्योबष्किहान्मरुद्भ्य÷क्रीडिब्भ्य÷सꣳसृष्टान्मरुद्भ्यꣳस्वतवद्भ्योनुसृष्टान् ॥ १६ ॥ उक्ताःसञ्चराः ॥ उक्ताःसञ्चराऽएताऽऐन्द्राग्नाःप्प्राशृङ्गामाहेन्द्राबहुरूपावैश्वकर्म्मणाः ॥ १७ ॥ धू

म्म्राब॒भ्रुनी॑काशाᳶ । पि॒तॄणाꣳसोम॑वताम्ब॒भ्रवो॑धूम्म्रनी॑काशाᳶ
पि॒तॄणां॑बर्हि॒षदा॑ङ्कृ॒ष्णाब॒भ्रुनी॑काशाᳶपि॒तॄणाम॑ग्निष्वा॒त्ताना॑ङ्कृ॒
ष्णाःपृष॑न्तस्त्रैयम्ब॒काः ॥ १८ ॥ उ॒क्ताःसं॑ञ्च॒राः ॥ उ॒क्ताःसं॑ञ्च॒राऽ
एता॑ःशु॒नासी॒रीया॑ःश्वे॒ताव्वा॑य॒व्याःश्वे॒ताःसौ॒र्याः ॥ १९ ॥ व्व॒स॒न्ता
य॑क॒पिञ्ज॑लान् ॥ व्व॒स॒न्ताय॑क॒पिञ्ज॑ला॒नाल॑भतेग्ग्री॒ष्माय॑कल॒विङ्का॑
न्व्व॒र्षाभ्य॑स्ति॒त्तिरी॑ञ्छ॒रदे॒व्वर्त्ति॑काहे॒म॒न्ताय॑कक॑रा॒ञ्छिशि॑राय॒व्विक॑क
रान् ॥ २० ॥ [ १० ] स॒मु॒द्राय॑शि॒शु॒मारा॑न् ॥ स॒मु॒द्राय॑शि॒शु॒मा

रानालंभतेपर्ज्जन्न्यायमण्डूकानद्भ्योमत्स्यान्न्मित्रायकुलीपयान्न्वरु
णायनाक्क्रान् ॥ २१ ॥ सोमायहꣳसान् ॥ सोमायहꣳसानालंभतेव्वा
यवेबलाकाऽइन्द्राग्निभ्याङ्कुञ्चान्न्मित्रायमद्गून्न्वरुणायचक्क्रवाकान्
॥ २२ ॥ अग्नयेकुटरून् ॥ अग्नयेकुटरूनालंभतेव्वनस्प्पतिभ्यऽ
उलूकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्न्मित्रावरुणाभ्याङ्क
पोतान् ॥ २३ ॥ सोमायलबान् ॥ सोमायलबानालंभतेत्त्वष्ट्रेकौली
कान्न्गोषादीर्द्देवानाम्पत्नीभ्यꣳकुलीकादेवजामिभ्योग्नयेगृहपतये

पारुष्णान् ॥ २४ ॥ अन्हेपारावतान् ॥ अन्हेपारावतानालभते
रात्र्यैसीचापूरहोरात्रयोःसन्धिभ्योजतूर्मासेभ्योदात्यौहान्त्संव
त्सरायमहतःसुपर्णान् ॥ २५ ॥ भूम्म्याऽआखून् ॥ भूम्म्याऽआ
खूनालभतेन्तरिक्षायपाङ्क्त्रान्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकान
वान्तरदिशाभ्यः ॥ २६ ॥ वसुभ्यऽऋश्यान् ॥ वसुभ्यऽऋश्या
नालभतेरुद्रेभ्योरुरूनादित्येभ्योन्यङ्कून्विश्वेभ्योदेवेभ्यःपृषता
न्त्साध्येभ्यःकुलुङ्गान् ॥ २७ ॥ ईशानायपरस्वतः ॥ ईशाना

यपरंस्वतऽआलंभतेमित्रायंगौरान्वरुंणायमहिषान्बृहस्पतंयेगव
याँस्त्वष्ट्रऽउष्ट्रांन् ॥२८॥ प्रजापंतयेपुरुंषान् ॥ प्रजापंतयेपुरुंषान्ह
स्तिनऽआलंभतेवाचेप्लुषीँश्चक्षुंषेमशकाञ्छ्रोत्रांयभृङ्गाः ॥ २९ ॥
शतम् ॥ १४०० ॥ प्रजापंतयेच । वायवेंचगोमृगोवरुंणायारण्यो
मेषोयमायकृष्णोंमनुष्यराजायंमर्कटःशार्दूलायंरोहिद्दृषभायंग
वयीक्षिंप्रश्येनायवर्त्तिकानीलंङ्गोःक्रिमिंःसमुद्रायंशिशुमारोंहिम
वंतेहस्ती ॥ ३० ॥ [१०] मयुःप्रांजापत्यः ॥ मयुःप्रांजापत्यऽ

उलोहलिक्ष्णणोवृषदꣳशस्तेधात्रेदिशाङ्कङ्कोधुङ्क्षाग्नेयीकलविङ्कोलो
हिताहिःपुष्करसादस्तेत्वाष्ट्रावाचेक्रुञ्च÷ ॥ ३१ ॥ सोमायकुलुङ्गः ॥
सोमायकुलुङ्गऽआरण्ण्योजोनकुलःशकातेपौष्णाःक्रोष्टामायोरि
न्द्रस्यगौरमृगःपिद्वोन्यङ्कु÷कक्कटस्तेनुमत्यैप्रातिश्रुत्कायैचक्रवा
कः ॥ ३२ ॥ सौरीबलाका । शार्ग्गःसृंजयःशयाण्डकस्तेमैत्राःसरस्व
त्यैशारि÷पुरुषवाक्श्वाविद्भौमीशार्दूलोवृकःपृदाकुस्तेमन्यवेसरस्व
तेशुकं÷पुरुषवाक् ॥ ३३ ॥ सुपर्ण्णःपार्ज्जन्यः ॥ सुपर्ण्णःपार्ज्जन्यऽ

आतिर्व्वाहसोदर्व्विदातेव्वायवेबृहस्प्पतयेव्वाचस्प्पतयेपैङ्गराजोलजऽ
आन्तरिक्षःप्लुवोमद्गुर्म्मत्स्यस्तेनदीपतयेद्यावापृथिवीयःकूर्म्मः
॥ ३४ ॥ पुरुषमृगश्चन्द्रमसꣳ ॥ पुरुषमृगश्चन्द्रमसोगोधाकालकादा
र्व्वाघाटस्तेव्वनस्प्पतीनाङ्कृकवाकुःसावित्रोहꣳसोव्वातस्यनाक्क्रोमकरꣳ
कुलीपयस्तेकूपारस्यह्रियैशल्यकꣳ ॥ ३५ ॥ एण्ण्यह्नः ॥ एण्ण्यह्नो
मण्डूकोमूषिकातित्तिरिस्तेसर्प्पाणाँल्लोपाशऽआश्विनःकृष्ष्णोरा
त्र्याऽऋक्षोजतूःसुषिलीकातऽइतरजनानाञ्जहकावैष्ष्णवी ॥ ३६ ॥

अन्यवापोर्द्धमासानाम् ॥ अन्यवापोर्द्धमासानामृश्योमयूरःसुप
र्णस्तेगन्धर्व्वाणामपामुद्रोमासाङ्कश्यपोरोहित्कुड्डृणाचीगोलत्तिका
तेप्प्सरसाम्मृत्त्यवेसितः ॥ ३७ ॥ व्वर्षाहूर्ऋतूनाम् ॥ व्वर्षाहूर्ऋतू
नामाखुःकशोमान्थालस्तेपितॄणाम्बलायाजगरोव्वसूनाङ्कपिञ्जलःकु
पोतऽउलूकःशशस्तेनिर्ऋत्त्यैव्वरुणायारण्योमेषः ॥ ३८ ॥ श्वित्रऽ
आदित्यानाम् ॥ श्वित्रऽआदित्त्यानामुष्ट्रोघृणीवान्वार्ध्रीनसस्तेम
त्त्याऽअरण्यायसृमरोरुरूरौद्रःक्वयिःकुटरुर्दात्त्यौहस्तेव्वाजिनाङ्का

मा॑यपि॒कः ॥ ३९ ॥ ख॒ड्गोवै॑श्वदे॒वः । श्वाकृ॒ष्णःक॒र्णोग॑र्द॒भस्त॒रक्षु॒
स्तेर॒क्ष॑सा॒मिन्द्रा॑यसूक॒रःसि॒ꣳहोमा॑रु॒तःकृ॑क॒लासः॒पिप्प॑काश॒कुनि॒
स्तेश॑र॒व्या॒यै॒विश्वे॑षान्दे॒वानां॑म्पृष॒तः ॥ ४० ॥ [१०] इतिश्रीवाजस
नेयसंहितायांचतुर्विंशोऽध्यायः ॥२४॥ ॥ श्रीवेदपुरुषायनमः ॥ अ
नुवाक्सूत्रम्॥शादन्दद्भिर्नवैकैका,हिरण्यगर्भश्चतस्र,ऽआनोदश,मा
नोमित्रो,-यदश्वस्याष्टकौ,यत्तेषडि,मानुकंद्वे,पञ्चदशसप्तचत्वारिꣳ
शत्॥ हरिःॐ॥शा॒दन्द॒द्भिः॥शा॒दन्द॒द्भिरव॑कान्द॒न्तमू॒लैर्म्मृद॒म्बस्वै॑

[ॐ शादन्दद्भिरित्यस्य वाशिष्ठ ऋषिर्वरुणोदेवता पाङ्क्तिश्छन्दः सूर्यलोक फलप्राप्ति कामः पाठे
विनियोगः॥ २५॥]

स्तेगान्दꣳष्ट्राब्भ्याꣳसरस्वत्त्याऽअग्ग्रजिह्वञ्जिह्वायाऽउत्सादमवक्क्र
न्देनतालुव्वाजꣳहनुब्भ्यामपऽआस्येनव्वृषणमाण्डाब्भ्यामादित्याँ
श्म्मश्रुभिःपन्थानम्भ्रूब्भ्यान्द्यावापृथिवीव्वर्त्तोब्भ्यांव्विद्युतङ्कनीनका
ब्भ्याꣳशुक्क्लायस्वाहाकृष्णायस्वाहापार्य्याणिपक्ष्माण्यवार्य्याऽइक्ष
वोव्वार्य्याणिपक्ष्माणिपार्य्याऽइक्षवः ॥ १ ॥ [ १ ] व्वातम्प्राणेन ॥
व्वातम्प्राणेनापानेननासिकेऽउपयाममधरेणौष्ठेनसदुत्तरेणप्प्रकाशे
सं.४० नान्तरमनूकाशेनबाह्यन्निवेष्यम्मूर्ध्नास्तनयित्नुन्निर्बाधेनाशनिम्म

स्तिष्क्केणाव्विद्युतङ्कनीनकाभ्याङ्कर्ण्णाभ्याꣳश्रोत्रꣳश्रोत्राभ्याङ्कर्ण्णौ
तेदनीमधरकण्ठेनापःशुष्ककण्ठेनचित्तम्मन्न्याभिरदितिᳲशीर्ष्णा
निर्ऋतिन्निर्ज्जर्ज्जल्प्येनशीर्ष्णासङ्क्रोशैःप्प्राणान्न्रेष्म्माणꣳस्तुपेन ॥ २ ॥
[ १ ] मशकान्केशैः ॥ मशकान्केशैरिन्द्रꣳस्वपसावहेनबृहस्प्प
तिᳲशकुनिसादेनकूर्म्माञ्छफैराक्रमणꣳस्थूराभ्यामृक्षलाभिᳲक
पिञ्जलाञ्जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जाम्बीलेनारण्ण्यमग्निमतिरु
ग्भ्याम्पूषणन्दोर्भ्यामश्विनावᳲसाभ्याꣳरुद्रᳲरोराभ्याम् ॥ ३ ॥

[ १ ] अग्नेःपक्षतिः ॥ अग्नेःपक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासोमस्यचतुर्त्थ्यदित्त्यैपञ्चमीन्द्राण्ण्यैषष्ठीमरुताᳫंसप्तमीबृहस्पतेरष्टम्म्यर्य्यम्णोनवमीधातुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्यद्द्वादशीयमस्यत्त्रयोदशी ॥ ४ ॥ [ १ ] इन्द्राग्न्योःपक्षतिः । सरस्वत्त्यैनिपक्षतिर्म्मित्त्रस्यतृतीयापाञ्चतुर्त्थीनिर्ऋत्त्यैपञ्चम्म्यग्नीषोमयोःषष्ठीसर्प्पाणाᳫंसप्तमीव्विष्णोरष्टमीपूष्णोनवमीत्वष्टुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्यद्द्वादशीयम्म्यैत्त्रयोदशीद्द्यावापृथिव्व्योर्द्दक्षिणम्पार्श्वंव्विश्वेषान्दे

वानामुत्तरम् ॥५॥ [ १ ] मरुताꣳस्कन्धाः ॥ मरुताꣳस्कन्धा
व्विश्वेषान्देवानाम्प्रथमाकीकसारुद्राणान्द्वितीयादित्त्यानान्तृती
यांव्वायोःपुच्छमग्नीषोमयोर्भासदौक्रुञ्चौश्श्रोणिब्भ्यामिन्द्राबृहस्प
तीऽऊरुब्भ्याम्मित्रावरुणावल्गाब्भ्यामाक्क्रमणꣳस्थूराब्भ्याम्बलङ्कु
ष्ठाब्भ्याम् ॥ ६ ॥ [ १ ] पूषणंव्वनिष्ठुना । न्धाहीन्त्स्थूलगुदयांस
र्प्पान्गुदाभिर्व्विह्रुतऽआन्त्रैरपोव्वस्तिनाव्वृषणमाण्डाब्भ्यांव्वाजिनꣳशे
पेनप्प्रजाꣳरेतसाचाषान्पित्तेनप्प्रदरान्पायुनाकूश्माञ्छकपिण्डैः

॥ ७ ॥ [ १ ] इन्द्र॑स्यक्क्रो॒डः ॥ इन्द्र॑स्यक्क्रो॒डोदि॑त्त्यैपाज॒स्य॒न्दि॒
शाञ्ज॒त्रवोदि॑त्त्यैभ॒सज्जी॒मूतान्हृ॒दयौप॒शेना॒न्तरि॑क्षम्पुरी॒तता॒नभ॑ऽ
उद॒र्य्यै॑णचक्क्रवा॒कौमत॑स्नाभ्या॒न्दिवं॑वृ॒क्काभ्यां॑ङ्गि॒रीन्प्ला॒शिभि॒रुपं॑
लान्प्ली॒ह्नाव्व॒ल्मीका॑न्क्लो॒मभि॑र्ग्लौ॒भिर्गु॑ल्मान्हि॒राभि॒ः स्रवं॑न्ती
र्ह्र॒दान्कु॒क्षिभ्याꣳ॑समु॒द्रमु॒दरे॑णवै॒श्वान॒रम्भस्मं॑ना ॥ ८ ॥ [ १ ]
व्विधृं॑ति॒न्नाभ्यां॑। घृतꣳ॑रसे॑ना॒पोयू॒ष्णामरी॑चीर्व्वि॒प्प्रुड्भि॑र्न्नीहा॒रमू॒ष्म
णा॑शी॒नंव्वसं॑या॒प्प्रुष्वा॒ऽअश्रुं॑भिर्ह्रादु॒नीर्दू॒षीकां॑भिर॒स्नारक्षाꣳ॑सि

चित्राण्ण्यङ्गैर्न्नक्षंत्राणिरूपेणंपृथिवीन्त्वचाजुंम्बकायस्वाहां ॥ ९ ॥
[ १ ] हिरण्ण्यगर्ब्भःसम् ॥ हिरण्ण्यगर्ब्भःसमंवर्त्तताग्ग्रेंभूतस्यं
जातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमाङ्कस्म्मैंदेवायं
हविषांव्विधेम ॥ १० ॥ यःप्प्राणतः ॥ यःप्प्राणतोनिंमिषतोमंहि
त्त्वैकंऽइद्राजाजगंतोबभूवं ॥ यऽईशेंऽअस्याद्द्विपदश्च्चतुंष्पदःकस्म्मैं
देवायंहविषांव्विधेम ॥ ११ ॥ यस्येमे । हिमवंन्तोमहित्त्वायस्यं
समुद्द्रꣳरसयांसहाहुः ॥ यस्येमाःप्प्रदिशोयस्यंबाहूकस्म्मैंदेवायं

हविषांव्विधेम ॥ १२ ॥ यऽआंत्मदाः ॥ यऽआंत्मदाबंलदाय
स्यव्विश्वंऽउपासंतेप्प्रशिषंयस्यंदेवाः ॥ यस्यंच्छायामृतंय्यस्यंमृत्त्युः
कस्मैदेवायंहविषांव्विधेम ॥ १३ ॥ [ ४ ] आनं÷ ॥ आनोंभद्राः
क्रतंवोयन्तुव्विश्वतोदंब्धासोऽअपंरीतासऽउद्भिदं÷ ॥ देवानोयथास
दमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोंदिवेदिंवे ॥ १४ ॥ देवानांम्भद्राः ॥
देवानांम्भद्रासुंमतिर्ऋजूयतान्देवानांꣳरातिरभिनोनिवंर्त्ततांम् ॥ दे
वानांꣳसक्ख्यमुपंसेदिमाव्वयन्देवानऽआयुःप्प्रतिंरन्तुजीवसें॥ १५॥

तान्पूर्व्वया । निविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अ
र्य्यमणव्वरुणꣳसोममश्विनासरस्वतीनꣳसुभगामयस्करत् ॥ १६ ॥ त
न्नः ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥ त
द्ग्रावाणꣳसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ १७ ॥
तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूम
हेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धꣳस्वस्तये ॥ १८ ॥
स्वस्तिनः ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाꣳस्वस्तिनःपूषाविश्ववेदाꣳ ॥

स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिःस्व॒स्तिनो॒बृह॒स्पति॑र्दधातु ॥१९॥ पृष॑द
श्वाम॒रुत॑ः ॥ पृष॑दश्वाम॒रुत॒ःपृश्नि॑मातरःशु॒भं॑यावा॑नोवि॒दथे॑षु॒ज
ग्मय॑ः ॥ अ॒ग्नि॒जि॒ह्वाम॑नव॒ःसूर॑चक्षसो॒विश्वे॑नोदे॒वाऽअव॒साग॑मन्नि॒ह
॥२०॥ भ॒द्रङ्कर्ण्णे॑भिः । शृणुयामदेवाभ॒द्रम्प॑श्येमा॒क्षभि॑र्यजत्राः ॥
स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभि॒र्व्यशे॑महिदे॒वहि॑तं॒यदायुः ॥२१॥ श॒त
मित् ॥ श॒तमि॒न्नुश॒रदो॒ऽअन्ति॑देवा॒यत्रा॑नश्च॒क्राज॒रसं॑न्त॒नूना॑म् ॥ पु॒
त्रासो॒यत्र॑पि॒तरो॒भव॑न्ति॒मानो॑म॒ध्यारी॑रिषता॒युर्गन्तोः॑ ॥२२॥ अदि॑

ति॒र्द्यौः ॥ अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑ति॒र्म्मा॒तासपि॑तासपु॒त्रः ॥
वि॒श्वे॑दे॒वा॒ऽअदि॑ति॒ꣳपञ्च॒जना॒ऽअदि॑ति॒र्ज्जा॒तमदि॑ति॒र्ज्जनि॑त्त्वम् ॥२३॥
[१०] मानो॑÷ ॥ मानो॑मि॒त्रो॑वरु॑णो॒ऽअर्य्य॒मायु॒रिन्द्र॑ऽऋभु॒क्षाम॒रुत॒ꣳ
परि॑क्ख्यन् ॥ यद्वा॒जिनो॑दे॒वजा॑तस्य॒सप्ते॑÷प्प्रव॒क्ष्यामो॑वि॒दथे॑वी॒र्य्या
णि ॥ २४ ॥ यन्नि॒र्ण्णिजा॑ ॥ यन्नि॒र्ण्णिजा॒रेक्ण॑सा॒प्प्रावृ॑तस्यरा॒तिङ्गृ॑भी॒
ताम्मु॒खतो॒नय॑न्ति ॥ सुप्प्रा॑ङ॒जो॒मेम्म्य॑द्वि॒श्वरू॑पऽइन्द्रापू॒ष्णोः॒प्प्रि॒
यमप्प्ये॑ति॒पाथ॑÷ ॥२५॥ एषच्छाग॑÷ । पु॒रोऽअश्वे॑नवा॒जिना॑पू॒ष्णोभा॒

गोनीयतेविश्वदेव्यः ॥ अभिप्प्रियंय्यत्त्पुरोडाशमर्व्वतात्त्वष्टेदेनꣳसौ
श्रवसायजिन्वति ॥ २६ ॥ यद्धविष्यम् ॥ यद्धविष्यमृतुशोदेवया
नन्त्रिर्म्मानुषाःपर्य्यश्वन्नयन्ति ॥ अत्त्रापूष्णःप्प्रथमोभागऽएतिय
ज्ञन्देवेभ्यःप्प्रतिवेदयन्नजः ॥ २७ ॥ होताद्ध्वर्य्युः ॥ होताद्ध्वर्य्युरा
वयाऽअग्निमिन्धोग्ग्रावग्ग्राभऽउतशꣳस्तासुविप्प्रः ॥ तेनयज्ञेनस्व
रङ्कृतेनस्विष्टेनव्वक्षणाऽआपृणद्ध्वम् ॥ २८ ॥ यूपव्व्रस्काऽउत । येयूप
वाहाश्चषालंय्येऽअश्वयूपायतक्षति ॥ येचार्व्वतेपचनꣳसम्भरन्त्यु

तोतेषा॑म॒भिगू॑र्त्तिर्न्नऽइन्न्वतु ॥२९॥ उप॒प्प्र ॥ उप॒प्प्रागा॑त्त्सु॒मन्न्मे॑धायि॒
मन्न्म॑दे॒वाना॒माशा॒ऽउप॑वी॒तपृ॑ष्ठꣳ ॥ अन्न्वे॑नं॒विप्प्रा॒ऽऋष॑योमदन्तिदे॒
वाना॑म्पु॒ष्टेच॑कृमासु॒बन्न्धु॑म् ॥३०॥यद्वा॒जिन॑÷॥ यद्वा॒जिनो॒दाम॑स॒न्न्दा
न॒मर्व्व॑तो॒याशी॑र्ष्ष॒ण्या॒रश॒नारज्जु॑रस्य ॥ यद्वा॑घास्य॒प्प्रभृ॑तमा॒स्ये॒तृण॒ꣳस
र्व्वा॒ताते॒ऽअपि॑दे॒वेष्ष्व॑स्तु ॥३१॥ [८] यदश्व॑स्य । क्र॒विषो॒मक्षि॒काश॒
यद्वा॒स्वरौ॒स्वधि॑तौरि॒प्प्तमस्ति॑ ॥ यद्धस्त॑योꣳशमि॒तुर्य्यन्न॒खेषु॒सर्व्वा॒ताते॒ऽ
अपि॑दे॒वेष्ष्व॑स्तु ॥ ३२ ॥ यदूव॑ध्यम् ॥ यदूव॑ध्यमु॒दर॑स्याप॒वाति॒यऽआ॒

मस्यक्क्रविषोगन्धोऽअस्ति ॥ सुकृतातच्छमितारः कृण्वन्तूतमेधꣳशृ
तपाकम्पचन्तु ॥३३॥ यत्ते ॥ यत्तेगात्रादग्निनापच्यमानादभिशूल
न्निहतस्यावधावति ॥ मातद्भूम्म्यामाश्रिषन्मातृणेषुदेवेभ्यस्तदुश
द्भ्योरातमस्तु॥३४॥येवाजिनम् ॥ येवाजिनम्परिपश्यन्तिपक्वंय्यऽ
ईमाहुःसुरभिर्न्निर्हरेति ॥ येचार्वतोमाꣳसभिक्षामुपासतऽउतोतेषा
मभिगूर्त्तिर्न्नऽइन्वतु ॥३५॥ यन्नीक्षणम् ॥ यन्नीक्षणम्माँस्पचन्न्याऽ
उखायायापात्राणियूष्णऽआसेचनानि ॥ ऊष्मण्यापिधानाचरू

णामङ्काःसूनाःपरिभूषन्त्यश्वम्॥३६॥मात्त्वा॥मात्त्वाग्निर्द्ध्वनयीद्धूम
गन्धिर्म्मोंखाभ्राजन्त्यभिविक्तजघ्रिः ॥ इष्टंव्वीतमभिगूर्त्तंव्वषट्कृत
न्तन्देवासःप्प्रतिगृब्भ्णन्त्यश्वम् ॥३७॥ निक्क्रमणन्निषदनम् ॥ निक्क्र
मणन्निषदनंव्विवर्त्तनंयच्चपड्वीशमर्व्वतः ॥ यच्चपपौयच्चघासिञ्जघासस
र्व्वाताते ऽअपिदेवेष्ष्वस्तु ॥ ३८ ॥ यदश्वाय॥यदश्वायव्वासऽउपस्तृण
न्त्यधीवासंय्याहिरण्ण्यान्यस्म्मै ॥ सन्दानमर्व्वन्तम्पड्वीशम्प्प्रियादेवे
ष्ष्वायामयन्ति॥३९॥[८]यत्ते। सादेमहसाशूकृतस्यपार्ष्ण्यावाकशा

याव्वातुतोदं ॥ स्रुचेवताहविषोंऽअद्धरेषुसर्व्वांतातेब्रह्मंणासूदयामि
॥ ४० ॥ चतुंस्त्रिꣳशद्वाजिनं÷ ॥ चतुंस्त्रिꣳशद्वाजिनोंदेवबंन्धोर्व्वङ्क्री
रश्वंस्यस्वधिंतिꣳसमेंति ॥ अच्छिद्रागात्रांव्वयुनांकृणोतपरुंष्परुरनु
घुष्य्याव्विशंस्त ॥४१॥ एकस्त्वष्टुं÷ ॥ एकस्त्वष्टुरश्वंस्याव्विशस्ताद्वाय
न्तारांभवतस्तथंऽऋतुः ॥ यातेगात्रांणामृतुथाकृणोमितातापिण्डांना
म्प्रजुंहोम्म्यग्नौ ॥४२॥ मात्त्वां । तपत्प्रियऽआत्त्मापियन्तम्मास्वधिं
तिस्तन्व्वऽआतिंष्ठिपत्ते ॥ मातेंगृध्नुरंविशस्तातिहायंछिद्रागात्रांण्ण्य

सिनामिथूकꣳ ॥४३॥ नवै ॥ नवाऽउंऽएतन्म्रियसेनरिंष्यसिदेवाँ२ ॥
॥४४॥ ऽइदेंषिपथिभिं÷सुगेभिं÷ ॥ हरीतेयुञ्जापृषंतीऽअभूतामुपांस्थाद्वा ॥२५॥
जीधुरिरासंभस्य ॥ ४४ ॥ सुगव्यंन्नꣳ ॥ सुगव्यंन्नोवाजीस्वश्व्यंम्पुं
सःपुत्राँ२॥ऽउतविश्वापुषꣳरयिम् ॥ अनागास्त्वन्नोऽअदितिंꣳकृणो
तुक्षत्रन्नोऽअश्वोवनताꣳहविष्मांन् ॥४५॥ [६] इमानु। कम्भुवंना
सीषधामेन्द्रंश्चविश्वेचदेवाः ॥ आदित्त्यैरिन्द्रꣳसगणोमरुद्भिरस्म ॥४४॥
ब्भ्यंम्भेषजाकंरत् ॥ यज्ञञ्चनस्तन्वञ्चप्प्रजाञ्चादित्त्यैरिन्द्रं÷सहसी

षधाति ॥४६॥ अग्ग्नेत्त्वम्॥अग्ग्नेत्त्वन्नोऽअन्तंमऽउतत्त्राताशिवोभंवा वरूथ्य÷ ॥ वसुंरग्ग्निर्व्वसुंश्श्रवाऽअच्छांनाक्षिद्द्युमत्तंमꣳरयिन्दां÷ ॥ तन्त्वांशोचिष्ठदीदिवꣳसुम्म्नायंनूनमींमहेसाखिंब्भ्यꣳ ॥ ४७ ॥ [ २ ]
इतिश्रीवाजसनेयसंहितायांपञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ अग्निश्चपंचदशो, च्चातऽएकादश, द्वौषड्विꣳशतिः ॥ हरिःॐ ॥ अग्निश्चं । पृथिवीचसन्नंतेतेमेसन्नंमतामदो वायुश्चान्तरिंक्षञ्चसन्नंतेतेमेसन्नंमतामदऽआंदित्त्यश्चद्यौश्चसन्नंतेतेमे

[ ॐ अग्निश्चेति कश्यपऋषि रिन्द्रो देवता त्रिष्टुप्छन्दो भूलोकसाधन फलप्राप्तिकाम: पाठे विनियोग: ॥२६॥ ]

सन्नमतामदऽआपश्चवरुणश्चसन्नतेतेमेसन्नमतामदः ॥ सप्तसꣳस
दोऽअष्टमीभूतसाधनी ॥ सकामाँ२॥ऽअध्वनस्कुरुसँज्ञानमस्तुमेमु
ना॥१॥यथेमाम्॥ यथेमांवाचङ्कल्याणीमावदानिजनेभ्यः ॥ ब्रह्मरा
जन्याभ्याꣳशूद्रायचार्य्यायचस्वायचारणायच ॥ प्रियोदेवानान्द
क्षिणायैदातुरिहभूयासमयम्मेकामःसमृध्यतामुपमादोनमतु ॥ २ ॥
बृहस्पतेऽअति ॥ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुम
ज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्र

म् ॥ उपयामगृहीतोसिबृहस्प्पतंयेत्त्वैषतेयोनिर्ब्बृहस्प्पतंयेत्त्वा ॥ ३॥
इन्द्रगोमंन् ॥ इन्द्रगोमंन्निहायांहिपिबासोमꣳशतक्क्रतो ॥ व्विद्यद्भि
र्ग्ग्रावंभिःसुतम् ॥ उपयामगृहीतोसीन्द्रांयत्त्वागोमंतऽएषतेयोनि
रिन्द्रांयत्त्वागोमंते ॥ ४॥ इन्द्रायांहि ॥ इन्द्रायांहिव्वृत्त्रहन्पिबासो
मꣳशतक्क्रतो ॥ गोमंद्भिर्ग्ग्रावंभिःसुतम् ॥ उपयामगृहीतोसीन्द्रांय
त्त्वागोमंतऽएषतेयोनिरिन्द्रांयत्त्वागोमंते ॥ ५॥ ऋतावांनंव्वैश्वानर
म् ॥ ऋतावांनंव्वैश्वानरमृतस्यज्ज्योतिषस्प्पातिंम् ॥ अजंस्रङ्घर्म्ममीं

महे ॥ उ॒प॒या॒मगृ॑हीतोसिव्वैश्वान॒राय॑त्त्वै॒षते॒योनि॑र्व्वैश्वान॒राय॑त्त्वा ॥६॥
व्वै॒श्वा॒न॒रस्य॑सु॒म॒तौ । स्याम॒राजा॒हिक॒म्भुव॑नानामभि॒श्रीः ॥ इ॒तो
जा॒तोव्विश्व॑मि॒दंव्वि॒च॑ष्टेव्वैश्वान॒रोय॑तते॒सूर्य्ये॑ण ॥ उ॒प॒या॒मगृ॑हीतोसि
व्वैश्वान॒राय॑त्त्वै॒षते॒योनि॑र्व्वैश्वान॒राय॑त्त्वा ॥७॥ व्वै॒श्वा॒न॒रोन॑÷ ॥ व्वै॒श्वा॒
न॒रोन॑ऽऊ॒तय॒ऽआप्प्र॒या॑तुपरा॒वत॑÷ ॥ अ॒ग्निरु॒क्थेन॒व्वाह॑सा ॥ उ॒प॒या॒
मगृ॑हीतोसिव्वैश्वान॒राय॑त्त्वै॒षते॒योनि॑र्व्वैश्वान॒राय॑त्त्वा ॥ ८ ॥ अ॒ग्निर्ऋ॑
षि॑÷ ॥ अ॒ग्निर्ऋ॑षि॒ꣳपव॑मान॒ꣳपाञ्च॑जन्यꣳपु॒रोहि॑तꣳ ॥ तमी॑महेमहा

ग॒यम् ॥ उ॒प॒या॒मगृ॑हीतोस्य॒ग्नये॑त्त्वा॒वर्च्च॑सऽए॒षते॒योनि॑र॒ग्नये॑त्त्वा॒व
र्च्च॑से ॥९॥ म॒हाँ२॥ऽइन्द्र॑÷ ॥ म॒हाँ२॥ऽइन्द्रो॒वज्र॑हस्तꣳषोड॒शीशर्म्म॑य
च्छतु ॥ हन्तु॑पा॒प्मान॒ꣳयो॒स्मान्द्वेष्टि॑ ॥ उ॒प॒या॒मगृ॑हीतोसिम॒हे॒न्द्रा
यं॑त्त्वैषते॒योनि॑र्म्महे॒न्द्राय॑त्त्वा ॥ १० ॥ तंव॑÷ ॥ तंवो॑दु॒स्ममृ॑ती॒षह॒॑
व्वसो॑र्म्मन्द॒ानमन्ध॑सꣳ ॥ अ॒भिव॒त्सन्नस्वस॑रेषु॒धे॒नव॒ऽइन्द्र॑ङ्गी॒र्भिर्न्न॑
वामहे ॥ ११ ॥ यद्वाहि॑ष्ठम्॥यद्वाहि॑ष्ठ॒न्तद॒ग्नये॑बृ॒हद॑र्च्चविभावसो ॥
महि॑षीव॒त्त्वद्र॒यिस्त्वद्वाजा॒ऽउदी॑रते ॥ १२ ॥ एहि॑॥एह्यू॒षुब्रवा॑णि॒

तेग्नेऽइत्त्थेतरागिर÷ ॥ एभिर्व्वर्द्धासऽइन्दुभिः ॥ १३ ॥ ऋतवस्ते ॥
ऋतवस्तेयज्ञंव्वितन्व्वन्तुमासारक्षन्तुतेहवि÷ ॥ संव्वत्त्सरस्तेयज्ञन्दधा
तुनःप्प्रजाञ्चपरिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगिरीणाꣳ
सङ्गमेचनदीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥ [ १५ ] उच्चाते ॥
उच्चातेजातमन्धसोदिविसद्भूम्म्याददे ॥ उग्ग्रꣳशर्म्ममहिश्श्रव÷
॥ १६ ॥ सन÷ ॥ सनऽइन्द्रायसज्ज्यवेव्वरुणायमरुद्भ्य÷ ॥ व्वरिवोवि
त्त्परिस्रव ॥ १७ ॥ एनाव्विश्श्वानि ॥ एनाव्विश्श्वान्न्यर्य्यऽआद्युम्म्नानि

मानुषाणाम् ॥ सिषासन्तोव्वनामहे ॥ १८ ॥ अनुवीरैः ॥ अनुवीरै
रनुपुष्ष्यास्म्मगोभिरन्वश्वैरनुसर्व्वैणपुष्टैः ॥ अनुद्विपदानुचतुष्ष्प
दाव्वयन्देवानोयज्ञमृतुथानयन्तु ॥१९॥ अग्नेपत्नीः ॥ अग्नेपत्नी
रिहावहदेवानामुशतीरुप ॥ त्वष्टारꣳसोमम्पीतये ॥ २० ॥ अभियज्ञ
म् ॥ अभियज्ञङ्गृणीहिनोग्नावोनेष्टꣳपिबऽऋतुना ॥ त्वꣳहिरत्नधाऽ
असि ॥ २१ ॥ द्रविणोदाःपिपीषति । जुहोतप्रचतिष्ठत ॥ नेष्ट्राहृ
तुभिरिष्ष्यत ॥ २२ ॥ तवायम् ॥ तवायꣳसोमस्त्वमेह्यर्व्वाङ्शश्वत्त

मꣳसुमनाऽअस्यपाहि ॥ अस्मिन्न्यज्ञेबर्हिष्ष्यानिषद्यादधिष्ष्वेम
जठरऽइन्दुमिन्द्र ॥ २३ ॥ अमेवनꣳ ॥ अमेवनꣳसुहवाऽआहिगन्त
ननिबर्हिषिसदतनारणिष्टन ॥ अथामन्दस्वजुजुषाणोऽअन्धसस्त्व
ष्टर्देवेभिर्ज्जनिभिꣳसुमद्गणꣳ ॥ २४ ॥ स्वादिष्ठयामदिष्ठया ॥ स्वादि
ष्ठयामदिष्ठयापवस्वसोमधारया ॥ इन्द्रायपातवेसुतः ॥ २५ ॥ रक्षोहा
विश्वचर्ष्षणिरभियोनिमयोहते ॥ द्रोणेसधस्थमासदत् ॥ २६ ॥ [११]
॥ २ ॥ इतिश्रीवाजसनेयसंहितायांषड्विंशतितमोऽध्यायः ॥ २६ ॥

[ॐ समास्त्वेति, अत्रिऋषि र्विश्वेदेवा:देवा; जगती छन्दो भुवर्लोक साधन फल प्राप्तिकाम: पाठेविनियोग:॥ २७॥ ]

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ समास्त्वादशो, ऊर्ध्वाऽअस्य,-पीवोऽअन्नाद्वादशका, वभित्त्वैकादश, चत्त्वारःपंचचत्त्वारिꣳशत्॥हरिःॐ॥ समांस्त्वा ॥ समांस्त्वाग्नऽऋतवोव्वर्द्धयन्तुसंव्वत्सराऽऋषयोयानिंसत्त्या ॥ सन्दिव्येनंदीदिहिरोचनेनाव्विश्वाऽआभांहिप्प्रदिशश्चतंस्रः ॥ १ ॥ सञ्चं ॥ सञ्चेध्यस्वांग्नेप्प्रचंबोधयैनमुच्चंतिष्ठमहतेसौभंगाय ॥ माचंरिषदुपसत्तातेऽअग्नेब्रह्माणंस्तेयशसंःसन्तुमान्यै ॥ २ ॥

सं. ४२ त्वामंग्ने ॥ त्वामंग्नेवृणतेब्राह्मणाऽइमेशिवोऽअंग्नेसंव्वरंणेभवा

नः॥ सपत्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन्॥ ३ ॥ इहै
व॥ इहैवाग्नेऽअधिधारयारयिम्मात्त्वानिक्क्रन्पूर्व्वचितोनिकारिणः॥
क्षत्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्द्धतान्तेऽअनिष्टृतः॥४॥ क्षत्रेणा
ग्ने॥ क्षत्रेणाग्नेस्वायुःसꣳरभस्वमित्रेणाग्नेमित्रधेयेयतस्व॥ सजातानां
म्मध्यमस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीह॥ ५ ॥ अतिनिहः॥
अतिनिहोऽअतिस्रिधोत्त्यचित्तिमत्त्यरातिमग्ने॥ विश्वाह्यग्नेदुरिता
सहस्वाथास्मभ्यꣳसहवीराꣳरयिन्दाः॥ ६ ॥ अनाधृष्योजात

वेदाः॥ अनाधृष्ष्योजातवेदाऽअनिष्टृतोव्विराडग्नेक्षत्रभृद्दीदिहीह ॥
व्विश्वाऽआशाꣳप्प्रमुञ्चन्न्मानुषीर्ब्भियःशिवेभिरद्यपरिपाहिनोव्वृधे
॥ ७ ॥ बृहस्प्पतेसवितः ॥ बृहस्प्पतेसवितर्ब्बोधयैनꣳसꣳशितञ्चित्त्स
न्तराꣳसꣳशिशाधि ॥ व्वर्द्धयैनम्महतेसौभगायव्विश्वऽएनमनुमद
न्तुदेवाः॥८॥ अमुत्रभूयादध॥अमुत्रभूयादधयद्यमस्यबृहस्प्पतेऽअ
भिशस्तेरमुञ्चः॥ प्रत्त्यौहतामश्विनामृत्त्युमस्म्माद्देवानामग्नेभिषजा
शचीभिः॥९॥ उद्वयम् ॥ उद्वयन्तमसस्प्परिस्वःपश्यन्तऽउत्तरम् ॥

दे॒वन्दे॑व॒त्रासू॒र्य्य॑मग॑न्म॒ज्ज्योति॑रुत्त॒मम् ॥ १० ॥ [ १० ] ऊ॒र्द्ध्वाऽअ॑
स्य॑स॒मिधो॑भवन्त्यू॒र्द्ध्वाशु॒क्राशो॒चीꣳष्य॒ग्नेः ॥ द्यु॒मत्त॑मासु॒प्प्रती॑कस्य
सू॒नोः ॥ ११ ॥ तनू॒नपा॒दसु॑रः ॥ तनू॒नपा॒दसु॑रो॒व्वि॒श्ववे॑दादे॒वोदे॒वेषु॑दे
वः ॥ प॒थोऽअ॑नक्तु॒मद्ध्वा॑घृ॒तेन॑ ॥ १२ ॥ मद्ध्वा॑य॒ज्ञम् ॥ मद्ध्वा॑य॒ज्ञन्न॑क्ष
से॒प्प्री॒णा॒नोन॒रा॒शꣳसो॑ऽअग्ने ॥ सु॒कृद्दे॒वःस॑वि॒ता॒व्वि॒श्ववा॑रः ॥ १३ ॥
अच्छा॒यम् ॥ अच्छा॒यमे॑ति॒शव॑साघृ॒तेने॑डा॒नोव्व॒ह्नि॒र्न्नम॑सा ॥ अ॒ग्निꣳ
स्रु॒चो॑ऽअद्ध्व॒रेषु॑प्प्र॒यत्त्सु ॥ १४ ॥ सय॑क्षत् ॥ सय॑क्षदस्यमहि॒मान॑म॒ग्नेः

सऽईम्मन्द्रासुप्रयसे÷ ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥ १५ ॥ द्वारोदेवीः ॥ द्वारोदेवीरन्वस्याविश्वेव्रताददन्तेऽअग्नेः ॥ उरुव्यचसोधाम्नापत्त्यमानाः ॥ १६ ॥ तेऽअस्य ॥ तेऽअस्ययोषणेदिव्येनयोनाऽउषासानक्ता ॥ इमंयज्ञमवतामध्वरन्न÷ ॥ १७ ॥ दैव्याहोतारा ॥ दैव्याहोताराऽऊर्ध्वमध्वरन्नोग्नेर्जिह्वामभिगृणीतम् ॥ कृणुतन्नःस्विष्टिम् ॥ १८ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥ १९ ॥ तन्न÷ ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टासुवी

ऽर्षम् ॥ रा॒यस्पोषं॒विष्यं॑तु॒नाभि॑म॒स्मे ॥ २० ॥ वनं॑स्प॒तेवं॑ ॥ वनं॑
स्प॒तेवं॑सृ॒जा॒ररा॑ण॒स्त्मनां॑दे॒वेषु॑॥अ॒ग्निर्ह॒व्यꣳ शं॑मि॒तासूं॑दयाति॥२१॥
अग्ने॒स्वाहा॑ । कृणुहिजातवेद॒ऽइन्द्रा॑यह॒व्यम् ॥ विश्वे॑दे॒वाह॒विरि॒दञ्जु॑
षन्ताम् ॥ २२ ॥ [ १२ ] पीवो॑ऽअन्नारयि॒वृधं॑ः । सुमे॒धाःश्वे॒तःसि
षक्तिनि॒युतां॑मभि॒श्रीः ॥ तेवा॒यवे॒समं॑नसो॒वितं॑स्थु॒र्विश्वे॒न्नरं॑ःस्वप
त्यानिं॑चक्रुः ॥ २३ ॥ रा॒येनु॒ । यञ्ज॒ज्ञतू॒रोदं॑सी॒मेरा॒येदे॒वीधि॒षणां॑धाति
दे॒वम् ॥ अधं॑वा॒युन्नि॒युतं॑ःसश्च॒तस्वा॒ऽउतश्वे॒तं॑वसु॑धितिन्नि॒रेके ॥ २४ ॥

आपोह ॥ आपोहयद्बृहतीर्व्विश्वमायन्गर्भन्दधानाजनयन्तीरग्नि
म्॥ ततोदेवानाँसमवर्त्ततासुरेकᳵकस्मैदेवायहविषाविधेम॥२५॥
यश्चित्॥ यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम्॥
योदेवेष्वधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम ॥२६॥ प्र
याभिः॥ प्रयाभिर्य्यासिदाश्वाँसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे॥
निनोरयिꣳसुभोजसंय्युवस्वनिवीरङ्गव्यमश्व्यञ्चराधः ॥ २७ ॥
आनः ॥ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहि

यज्ञम्॥व्वायोऽअस्म्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः
॥२८॥ नियुत्त्वान्वायो ॥ नियुत्त्वान्वायवागह्ययꣳशुक्रोऽअयामि
ते ॥ गन्तासिसुन्वतोगृहम् ॥ २९ ॥ व्वायोशुक्रः ॥ व्वायोशुक्रोऽअया
मितेमद्ध्वोऽअग्रन्दिविँष्टिषु ॥ आयाहिसोमपीतयेस्प्पार्होदेवनियुत्त्व
ता ॥ ३० ॥ व्वायुरग्ग्रेगाः ॥ व्वायुरग्ग्रेगायज्ञप्प्रीःसाकङ्गन्मनसायज्ञ
म् ॥ शिवोनियुद्भिःशिवाभिः ॥ ३१ ॥ व्वायोये । तेसहस्स्रिणोरथासस्
स्तेभिरागहि॥ नियुत्त्वान्त्सोमपीतये ॥३२॥ एकयाच । दशभिश्चस्व

भूतेद्धाभ्यांमिष्टयेंव्विꣳशतीचं ॥ तिसृभिंश्च्वहंसेत्रिꣳशतांचनियु
द्भिर्व्वायविहताव्विमुंञ्च ॥ ३३ ॥ तवंव्वायो ॥ तवंव्वायवृतस्पतेत्त्वष्टुंर्ज्जा
मातरद्भुत ॥ अवाꣳस्यावृंणीमहे ॥ ३४ ॥ [ १२ ] अभित्त्वां । शूरनोनु
मोदुग्ग्धाऽइवधेनवः ॥ ईशांनमस्यजगतꣳस्वर्द्दृशमीशांनमिन्द्रत
स्तथुषः ॥ ३५ ॥ नत्त्वावांन् ॥ नत्त्वावाँ २ ॥ ऽअन्न्योदिव्व्योनपार्थिंवोन
जातोनजंनिष्ष्यते ॥ अश्श्वायन्तौमघवन्निन्द्रव्वाजिनोंगव्यन्तंस्त्वाह
वामहे ॥ ३६ ॥ त्त्वामित् ॥ त्त्वामिद्धिहवांमहेसातौव्वाजंस्यकारवः ॥

त्वांवृ॒त्रेष्वि॑न्द्र॒सत्त्प॑ति॒न्नर॒स्त्वाङ्काष्ठा॑स्व॒र्व्व॑तꣳ ॥३७॥ सत्त्वम् ॥ सत्त्व
न्न॑श्चित्रव्वज्ज्रहस्तधृष्ष्णुया म॒हस्त॑वा॒नोऽअद्रिवꣳ ॥ गामश्श्व॑ꣳर॒त्थ्य॒
मिन्द्र॒सङ्कि॑रस॒त्राव्वाज॒न्नजि॒ग्ग्युषे॑ ॥ ३८ ॥ कया॑नꣳ ॥ कया॑नश्श्चि॒त्रऽ
आभु॑वदू॒तीस॒दावृ॑ध॒ꣳसखा॑ ॥ कया॒शचिष्ठयावृता ॥३९॥ कस्त्वा॑ । स॒
त्त्योम॒दा॑ना॒म्मꣳहि॑ष्ठोमत्त्स॒दन्ध॑सꣳ ॥ दृढाचि॑दा॒रुजेव्वसु॑ ॥ ४० ॥ अ॒
भीषुण॑÷ ॥ अ॒भीषु॒णꣳसखी॑नामवि॒ताज॑रितॄ॒णाम् ॥ श॒तम्भ॑वास्यू॒त
ये॑ ॥ ४१ ॥ य॒ज्ञाय॑ज्ञावꣳ ॥ य॒ज्ञाय॑ज्ञावोऽअ॒ग्नये॑गि॒रागि॑राच॒दक्ष॑से ॥

प्रप्रंवयममृतञ्जातवेदसम्प्रियम्मित्रन्नशंꣳसिषम् ॥४२॥ पाहिनः ॥
पाहिनोऽअग्नऽएकंयापाह्युतद्वितीयंया ॥ पाहिगीर्भिस्तिसृभिंरू
र्ज्जाम्म्पतेपाहिचंतसृभिर्व्वसो ॥४३॥ ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातꣳस
हिनायमंस्म्मयुर्द्दाशेमहव्यदांतये ॥ भुवद्वाजेष्ष्ववितांभुवंद्वृधऽउत
त्रातातनूनाम् ॥४४॥ संव्वत्त्सरोसि । परिवत्त्सरोसीदावत्त्सरोसीद्वत्त्स
रोसिव्वत्त्सरोसि ॥ उषसंस्तेकल्पन्तामहोरात्रास्तेंकल्पन्तामर्द्धमासा
स्तेंकल्पन्ताम्मासांस्तेकल्पन्तामृतवंस्तेकल्पन्ताꣳसंव्वत्त्सरस्तेंक

लप्पताम् ॥ प्रेत्त्याऽएत्त्यैसञ्जाञ्जप्प्रंचेसारय ॥ सुपुर्ण्णञ्चिदंसितयांदेवतं
याङ्गिरस्वद्ध्रुवश्सींद ॥ ४५ ॥ [ ११ ] इतिश्रीवाजसनेयसंहितायांसप्त
विꣳशोऽध्यायः ॥ २७ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥
होतायक्षदेकादश, देवंबर्हिर्द्वादश, पुनरप्प्येवं, चत्त्वारःषट्चत्त्वारिꣳ
शत् ॥ हरिःॐ ॥ होतांयक्षत् ॥ होतांयक्षत्त्सुमिधेन्द्रंमिडस्पदेनाभां
पृथिव्व्याऽअधिं ॥ दिवोव्वर्ष्म्मंन्त्सामिंध्ध्यतऽओजिंष्ठश्चर्षणीसहांव्वे
त्त्वाज्ज्यंस्यहोतर्य्यंजं ॥ १ ॥ होतांयक्षत्त्तनूनपांतमूतिभिं꣡ ॥

[ॐ होता यक्षदिति ब्रह्मा ऋषि वामदेवो देवता जगती छन्दः स्वर्लोकसाधनफलप्राप्तिकामः पाठे विनियोगः।
॥२८॥

होता॑यक्ष॒त्तनू॒नपा॑तमू॒तिभि॒र्जेता॑र॒मप॑राजितम्॥ इन्द्र॑न्दे॒वꣳस्व॒र्व्विद॑
म्प॒थिभि॒र्म्मधु॑मत्तमै॒र्न्नरा॒शꣳसे॑न॒तेज॑सा॒व्वेत्त्वाज्य॑स्य॒होत॒र्य्यज॑॥२॥
होता॑यक्ष॒दि॒डा॑भि॒रिन्द्र॑म्॥ होता॑यक्ष॒दि॒डा॑भि॒रिन्द्र॑मीडि॒तमा॒जुह्वा॑
न॒मम॑र्त्त्यम्॥दे॒वोदे॒वैःसवी॑र्य्यो॒व्वज्र॑हस्तꣳपुर॒न्द॒रोव्वेत्त्वाज्य॑स्य॒होत॒र्य्य
ज॑॥३॥ होता॑यक्षद्ब॒र्हिषीन्द्र॑म्॥ होता॑यक्षद्ब॒र्हिषीन्द्र॑न्निष॒द्वर॑व्वृ॑ष॒भन्न
र्य्या॑पसम्॥ व्वसु॑भीरु॒द्रैरा॑दि॒त्त्यैःस॒युग्भि॑र्ब॒र्हिरास॑द॒द्वेत्त्वाज्य॑स्य॒होत॒
र्य्यज॑॥४॥ होता॑यक्ष॒दोजो॒न॥ होता॑यक्ष॒दोजो॒नव्वी॒र्य्यꣳसह॒ोद्वार॒ऽइ

न्द्रंमवर्द्धयन् ॥ सुप्प्रायणाऽअस्म्मिन्न्यज्ञेविश्श्रंयन्तामृतावृधोद्द्वारऽ
इन्द्रांयमीढुषेव्व्यन्त्वाज्ज्यंस्यहोतर्य्यंज ॥५॥ होतांयक्षद्दुषेऽइन्द्रंस्य ।
धेनूसुदुघेंमातरांमही ॥ सवातरौनतेजंसाव्वत्त्समिन्द्रंमवर्द्धतांव्वीता
माज्ज्यंस्यहोतर्य्यंज ॥ ६ ॥ होतांयक्षद्दैव्व्याहोतांरा । भिषजासखां
याहविषेन्द्रंम्भिषज्ज्यतꣳ ॥ कवीदेवौप्प्रचेंतसाविन्द्रांयधत्तऽइन्द्रि
यंव्वीतामाज्ज्यंस्यहोतर्य्यंज ॥ ७ ॥ होतांयक्षत्तिस्स्रोदेवीः ॥ हो
तांयक्षत्तिस्स्रोदेवीर्न्नभेषजन्त्रयंस्त्रिधातंवोपसऽइडासरंस्वतीभारंतीम्

ही: ॥ इन्द्रपत्नीर्हविष्म्मतीर्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ८ ॥ होता
यक्षत्त्वष्टारमिन्द्रम् ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳसुयज
ङ्घृतश्रियम् ॥ पुरुरूपꣳसुरेतसम्मघोनमिन्द्रायत्त्वष्टादधदिन्द्रिया
णिव्वेत्त्वाज्ज्यस्यहोतर्य्यज ॥ ९ ॥ होतायक्षद्वनस्प्पतिꣳशमितारम् ॥
होतायक्षद्वनस्प्पतिꣳशमितारꣳशतक्क्रतुन्धियोजोष्टारमिन्द्रियम् ॥
मद्ध्वासमञ्जन्पथिभिः सुगेभिः स्वदातियज्ञम्मधुनाघृतेनव्वेत्त्वाज्ज्य
स्यहोतर्य्यज ॥ १० ॥ होतायक्षदिन्द्रꣳस्वाहा ॥ होतायक्षदिन्द्रꣳ

स्वाहाऽऽज्यंस्यस्वाहामेदंसःस्वाहांस्तोकानाꣳस्वाहास्वाहांकृतीनाꣳ
स्वाहांहव्यसूंक्तीनाम्॥ स्वाहांदेवाऽआंज्यपाजुंषाणाऽइन्द्रऽआज्यं
स्यह्व्यन्तुहोतर्य्यज ॥११॥ [११] देवम्बर्हिरिन्द्रंम्॥ देवम्बर्हिरिन्द्रꣳ
सुदेवन्देवैर्व्वीरवंत्स्तीर्णंव्वेद्यामवर्द्धयत् ॥ वस्तोर्व्वृतम्प्राक्तोर्भृंतꣳ
रायाबर्हिष्मतोत्त्यंगाद्वसुवनेंव्वसुधेयंस्यव्वेतुयजं ॥१२॥ देवीर्द्वारः॥
देवीर्द्वारऽइन्द्रꣳसङ्घातेवीड्वीर्य्यामंन्नवर्द्धयन्॥ आवत्त्सेनतरुंणेनकु
मारेणंचमीवतापार्व्वाणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेंव्वसुधेयंस्यव्यन्तु

यज ॥ १३ ॥ देवीऽउषासानक्ता ॥ देवीऽउषासानक्तेन्द्रँयज्ञेप्प्रयत्त्य
ह्वेताम् ॥ दुदैवीर्व्विशःप्प्रायासिष्टाꣳसुप्प्रीतेव्वसुधितेव्वसुवनेव्वसुधेयस्य
वीतांयज ॥ १४ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रमवर्द्ध
ताम् ॥ अयाव्यन्याघाद्वेषाꣳस्यान्यावक्षद्वसुवार्याणियजमानाय
शिक्षितेव्वसुवनेव्वसुधेयस्यवीतांयज ॥ १५ ॥ देवीऽऊर्ज्जाहुती ॥ दे
वीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम् ॥ इषमूर्ज्जमन्यावक्षत्स
ग्धिꣳसपीतिमन्यानवेनपूर्व्वन्दयमानेपुराणेननवमधातामूर्ज्जमूर्ज्जा

हु॑तीऽऊ॒र्ज्जय॑मा॒नेव्वसु॒व्वार्य्या॑णि॒यज॑मानायशिक्षि॒तेव्व॑सु॒वने॑व्वसु॒धेय॑
स्यव्वी॒तांऽयज ॥ १६ ॥ दे॒वादैव्व्यां ॥ दे॒वादैव्व्या॒होता॑रादे॒वमिन्द्र॑मवर्द्ध
ताम् ॥ ह॒ताघ॑शꣳसा॒वाभा॑र्ष्टांव्वसु॒व्वार्य्या॑णि॒यज॑मानायशिक्षि॒तौव्व॑सु॒
व॒ने॑व्वसु॒धेय॑स्यव्वी॒तांऽयज॑ ॥ १७ ॥ दे॒वीस्ति॒स्रः ॥ दे॒वीस्ति॒स्रस्ति॒स्रोदे॒
वीः॒पति॒मिन्द्र॑मवर्द्धयन् ॥ अस्पृ॑क्ष॒द्भार॑ती॒दिव॑ꣳरु॒द्रैर्य्य॒ज्ञꣳसर॑स्व॒ती
डा॒व्वसु॑मतीगृ॒हान्व॑सु॒वने॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ १८ ॥ दे॒वऽइन्द्रः॑ ॥
दे॒वऽइन्द्रो॒नरा॒शꣳसं॑स्त्रिव॒रू॒थस्त्रि॒ब॑न्धु॒रोदे॒वमिन्द्र॑मवर्द्धयत् ॥ श॒ते

नंशितिपृष्ठानामाहितꣳसहस्रेणप्प्रवर्त्ततेमित्रावरुणेदंस्यहोत्रमर्हतोबृहस्पतिस्तोत्रमश्विनाध्वर्यवंव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ १९ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हिरण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्ग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमिन्द्रेणासन्नमन्याबर्हीꣳष्यभ्यभूद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २१ ॥ देवोऽअग्निः ॥ देवोऽ

अग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्विष्टमद्य
करोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २२ ॥ अग्निमद्य । होतारमवृणी
तायंस्यजमानꣳपचन्त्पक्तीꣳपचन्त्पुरोडाशम्बध्नन्निन्द्रायच्छागम् ॥
सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदिन्द्रायच्छागेन ॥ अघत्तम्मेद
स्तःप्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ [1]त्वामद्यऽऋषे ॥ २३ ॥
[ १२ ] होतायक्षत्त्समिधानम्महत् ॥ होतायक्षत्त्समिधानम्महद्य

---

१. अ. २१, मं. ६१—त्वामद्यऽऋषऽ आ० ॥ १ ॥ इति प्रतीकः ॥

श॒ꣳसुस॑मिद्धं॒व्वरे॑ण्यम॒ग्निमिन्द्रं॑व्वयो॒धस॑म् ॥ गा॒य॒त्रीञ्छन्द॑ऽइन्द्रि॒य
न्त्र्यवि॒ङ्गां॑व्वयो॒दध॒द्वे॒त्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥२४॥ होता॑यक्ष॒त्तनू॒नपा॑त
मु॒द्भि॒द॑म् ॥ होता॑यक्ष॒त्तनू॒नपा॑तमु॒द्भि॒दं॒यङ्गर्भ॒मदि॑तिर्द्द॒धे॒शुचि॒मि
न्द्रं॑व्वयो॒धस॑म् ॥ उ॒ष्णिह॒ञ्छन्द॑ऽइन्द्रि॒यन्दि॑त्त्य॒वाह॒ङ्गाँ॑व्वयो॒दध॒द्वे॒
त्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥२५॥ होता॑यक्षदी॒डेन्य॑मीडि॒तम् ॥ होता॑यक्षदी॒
डेन्य॑मीडि॒तंव्वृ॒त्र॒हन्त॑म॒मिडा॑भि॒रीड्य॒ꣳसह॒ꣳसोम॒मिन्द्रं॑व्वयो॒धस॑म् ॥
अ॒नु॒ष्टुभ॒ञ्छन्द॑ऽइन्द्रि॒यम्प॒ञ्चा॑वि॒ङ्गां॑व्वयो॒दध॒द्वे॒त्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑

॥ २६ ॥ होतांयक्षत्त्सुबर्हिषंम्म्पूषण्णवन्तंम् ॥ होतांयक्षत्त्सुबर्हिषं
म्म्पूषण्णवन्तममंर्त्त्यꣳसीदंन्तम्म्बर्हिषिंप्प्रियेमृतेन्द्रंव्वयोधसंम् ॥ बृह
तीञ्छन्दंऽइन्द्रियन्त्रिंवत्त्सङ्गांव्वयोदधद्वेत्त्वाज्ज्यंस्यहोतर्य्यजं ॥२७॥
होतांयक्षद्व्यचंस्वतीꣳसुप्प्रायणाः ॥ होतांयक्षद्व्यचंस्वतीꣳसुप्प्राय
णाऽऋतावृधोद्वारोंदेवीर्हिरण्ण्ययीर्ब्रह्माणमिन्द्रंव्वयोधसंम् ॥ पङ्क्ति
ञ्छन्दंऽइहेन्द्रियन्तुंर्य्यंवाहङ्गांव्वयोदधद्व्यन्त्वाज्ज्यंस्यहोतर्य्यजं
॥२८॥होतांयक्षत्त्सुपेशंसासुशिल्प्पे । बृहतीऽउभेनक्क्तोषासानदंर्श्श

तेव्विश्श्व॒मिन्द्र॑व्वयो॒धस॑म् ॥ त्रिष्टु॒भ॒ञ्छन्द॑ऽइ॒हेन्द्रि॒य॑म्प॑ष्ठ॒वाह॒ङ्गाव्वयो॒
दध॑द्वी॒तामाज्य॑स्य॒होत॒र्य्यज॑ ॥२९॥ होता॑यक्ष॒त्प्रचे॑तसादे॒वाना॑म् ॥
होता॑यक्ष॒त्प्रचे॑तसादे॒वाना॑मुत्त॒म॑य्यशो॒होता॑रा॒दैव्या॑क॒वीस॒युजेन्द्र॑व्व
यो॒धस॑म् ॥ जग॑ति॒ञ्छन्द॑ऽइन्द्रि॒यम॑न॒ड्वाह॒ङ्गा॑व्वयो॒दध॑द्वी॒तामाज्य॑
स्य॒होत॒र्य्यज॑ ॥ ३० ॥ होता॑यक्ष॒त्पेश॑स्वतीस्ति॒स्रः ॥ होता॑यक्ष॒त्पे
श॑स्वतीस्ति॒स्रोदे॒वीर्हि॑र॒ण्ययी॒र्भ्भार॑तीर्बृ॒ह॒तीर्म्म॒हीःपति॒मिन्द्र॑व्वयो॒ध
स॑म् ॥ व्वि॒राज॒ञ्छन्द॑ऽइ॒हेन्द्रि॒यन्धे॒नुङ्गान्नव्वयो॒दध॒द्व्यन्त्वाज्य॑स्य॒हो

तु॒र्य्यज॑ ॥ ३१ ॥ होता॑यक्षत्त्सु॒रेत॑स॒न्त्वष्टा॑रम् ॥ होता॑यक्षत्त्सु॒रेत॑स॒
न्त्वष्टा॑रम्म्पुष्टि॒वर्द्ध॑नꣳरू॒पाणि॒बिभ्र॑त॒म्म्पृथ॒क्पुष्टि॒मिन्द्र॑व्वयो॒धस॑म्॥
द्वि॒पद॒ञ्छन्द॑ऽइन्द्रि॒यमु॒क्षाण॒ङ्गान्नव्वयो॒द॒ध॒द्वे॒त्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑
॥३२॥ होता॑यक्ष॒द्व॒न॒स्प्पति॑ꣳशमि॒तार॑म् ॥ होता॑यक्ष॒द्व॒न॒स्प्पति॑ꣳश
मि॒तार॑ꣳश॒तक्र॑तु॒ꣳहिर॑ण्ण्यपर्ण्णमु॒क्थिन॑ꣳरश॒नाम्बिभ्र॑तव्व॒शिम्भ
ग॒मिन्द्र॑व्वयो॒धस॑म् ॥ क॒कुभ॒ञ्छन्द॑ऽइ॒हेन्द्रि॒यव्व॒शाव्वे॒हत॒ङ्गाव्वयो॒द॒ध॒
द्वे॒त्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३३ ॥ होता॑यक्ष॒त्स्वाहा॑कृतीर॒ग्निम् ॥

होता॑यक्ष॒त्स्वाहा॑कृतीर॒ग्निङ्गृ॒हप॑ति॒म्पृथ॒ग्ग्वरु॑णम्भेष॒जङ्क॒विङ्क्ष॒त्रमि
न्द्रं॑व्वयो॒धस॑म्॥अति॑च्छन्दस॒ञ्छन्द॑ऽइन्द्रि॒यम्बृ॒हदृ॑ष॒भङ्गां॑व्वयो॒दध॒द्व्य
न्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥३४॥ [११] दे॒वम्ब॒र्हिः ॥ दे॒वम्ब॒र्हिर्व्व॑यो॒धस॑
न्दे॒वमिन्द्र॑मवर्द्धयत् ॥ गा॒य॒त्र्याच्छन्द॑सेन्द्रि॒यञ्चक्षु॒रिन्द्रे॒व्वयो॒दध॑द्व
सु॒वने॑व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ३५ ॥ दे॒वीर्द्वार॑ः ॥ दे॒वीर्द्वारो॑व्वयो॒धस॒ꣳ
शुचि॒मिन्द्र॑मवर्द्धयन् ॥ उ॒ष्णिणहा॒च्छन्द॑सेन्द्रि॒यम्प्रा॒णमिन्द्रे॒व्वयो॒द
ध॑द्वसु॒वने॑व्वसु॒धेय॑स्यव्यन्तु॒यज॑ ॥ ३६ ॥ दे॒वीऽउ॒षासा॒नक्ता॑ । दे॒वामि

न्द्रंव्वयो॒धसंन्दे॒वीदे॒वमंवर्द्धताम् ॥ अ॒नुष्टुभा॒च्छन्दंसेन्द्रि॒यम्म्बल॒मि
न्द्रे॒व्वयो॒दधंद्वसुवनैंव्वसुधेयंस्यव्वीता॒ंऽयजं॥३७॥दे॒वीजोष्ट्रीं ॥ दे॒वीजो
ष्ट्रीव्वसुंधितीदे॒वमिन्द्रंव्वयो॒धसंन्दे॒वीदे॒वमंवर्द्धताम् ॥ बृह॒त्याच्छन्दं
सेन्द्रि॒यꣳश्रोत्र॒मिन्द्रे॒व्वयो॒दधंद्वसुवनैंव्वसुधेयंस्यव्वीता॒ंऽयजं ॥ ३८ ॥
दे॒वीऽऊ॒र्ज्जाहुंती ॥ दे॒वीऽऊ॒र्ज्जाहुंती॒दु॒घेंसु॒दु॒घे॒पय॒सेन्द्रंम्व्वयो॒धसंन्दे॒वी
दे॒वमंवर्द्धताम् ॥ प॒ङ्क्त्याच्छन्दंसेन्द्रि॒यꣳशु॒क्रमिन्द्रे॒व्वयो॒दधंद्वसुवनैंव्व
सुधेयंस्यव्वीता॒ंऽयजं ॥ ३९ ॥ दे॒वादैव्यां ॥ दे॒वादैव्या॒होतांरादे॒वमिन्द्रं

व्वयो॒धसं॒न्दे॒वौदे॒वमं॑वर्द्धताम् ॥ त्रि॒ष्टुभा॒च्छन्दं॒सेन्द्रि॒यन्त्विषि॒मिन्द्रे॒व्व
यो॒दधं॒द्वसु॒वनैं॒व्वसु॒धेयं॑स्यव्वीतां॒३यजं ॥ ४० ॥ दे॒वीस्ति॒स्रः ॥ दे॒वीस्ति॒स्र
स्ति॒स्रोदे॒वीर्व्वयो॒धस॒म्पति॒मिन्द्र॑मवर्द्धयन् ॥ जग॑त्या॒च्छन्दं॒सेन्द्रि॒यꣳ
शूष॒मिन्द्रे॒व्वयो॒दधं॒द्वसु॒वनैं॒व्वसु॒धेयं॑स्यव्यन्तु॒यजं ॥ ४१ ॥ दे॒वोनरा॒
शꣳसं॒÷ ॥ दे॒वोनरा॒शꣳसोदे॒वमिन्द्रं॒व्वयो॒धसं॒न्दे॒वोदे॒वमं॑वर्द्धयत् ॥ वि॒
राजा॒च्छन्दं॒सेन्द्रि॒यꣳरू॒पमिन्द्रे॒व्वयो॒दधं॒द्वसु॒वनैं॒व्वसु॒धेयं॑स्यव्वेतु॒यजं
॥ ४२ ॥ दे॒वोव्वन॒स्पति॑÷ ॥ दे॒वोव्वन॒स्पति॑र्दे॒वमिन्द्रं॒व्वयो॒धसं॒न्दे॒

वोदे॒वम॑वर्द्धयत् ॥ द्वि॒प॑दा॒च्छन्द॑सेन्द्रि॒यम्भग॒मिन्द्रे॒व्वयो॒दध॑द्द्वसु॒वने॑
व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ४३ ॥ दे॒वम्ब॒र्हिः ॥ दे॒वम्ब॒र्हिर्व्वारि॑तीनान्दे॒व
मिन्द्रं॑व्वयो॒धस॑न्दे॒वन्दे॒वम॑वर्द्धयत् ॥ क॒कुभा॒च्छन्द॑सेन्द्रि॒यंय्यश॒ऽइ
न्द्रे॒व्वयो॒दध॑द्द्वसु॒वनै॑व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ४४ ॥ दे॒वोऽअ॒ग्निः । स्वि
ष्टकृ॒द्दे॒व॑मिन्द्रं॑व्वयो॒धस॑न्दे॒वोदे॒वम॑वर्द्धयत् ॥ अति॑च्छन्दसा॒च्छन्द॑से
न्द्रि॒यङ्क्ष॒त्रमिन्द्रे॒व्वयो॒दध॑द्द्वसु॒वनै॑व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ४५ ॥ अ॒ग्नि
म॒द्य । होता॑रमवृणीता॒यंय्यज॑मान॒ᳶपच॒न्पक्ती॒ᳶपच॑न्पुरो॒डाश॑म्ब॒

ध्नन्निन्द्रांयव्वयोधसेच्छागंम् ॥ सूपस्थाऽअद्यदेवोव्वनस्प्पतिरभव
दिन्द्रांयव्वयोधसेच्छागेन ॥ अघत्तम्मेदस्तश्प्प्रतिंपचताग्ग्रंभीदवी
वृधत्त्पुरोडाशेन ॥ त्त्वामद्यऽऋषे ॥ ४६ ॥ [१२] ॥ ४ ॥ इतिश्रीवाज
सनेयसंहितायांअष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीवेदपुरुषायनमः ॥

अनुवाक्सूत्रम् ॥ समिद्धोऽअग्ग्नेकादश, यदक्रन्दस्त्रयोदश, समिद्धो
ऽअद्यद्वादश, केतुंकृण्वँश्चतुर्व्विंᳬशति, श्चत्वारःषष्टिः ॥ हरिः ॐ ॥ समि

---

१. अ. २१ ॥ मं. ६१ ॥ त्वामद्यऽऋषऽ० १ ॥ इति प्रतीकः ॥

[ॐ समिद्धोऽ अज्जनिति याज्ञवल्क्य ऋषि बाल्मीकि देवता जगती छन्दो महर्लोकसाधन फल प्राप्तिका-
र्थ: पाठे विनियोग:॥ २९॥]

द्धोऽअ॒ञ्जन् ॥ समि॑द्धोऽअ॒ञ्जन्कृद॑रम्म॒ती॒नाङ्घृ॒तम॑ग्ग्ने॒मधु॑म॒त्त्पिन्व॑मा
नः ॥ वा॒जीव्वह॑न्वा॒जिन॑ञ्जातवेदोदे॒वाना॑व्वक्षिप्प्रि॒यमास॒धस्त्थ॑म्
॥ १ ॥ घृ॒तेना॒ञ्जन् ॥ घृ॒तेना॒ञ्जन्त्सम्प॒थोदे॑व॒याना॑न्प्रजा॒नन्वा॒ज्यप्प्ये॑
तुदे॒वान् ॥ अनु॑त्त्वासप्तेप्प्र॒दिश॑ः सचन्ताꣳस्व॒धाम॒स्मैयज॑मानाय
धेहि ॥ २ ॥ ईड्य॑श्च ॥ ईड्य॒श्चासि॒व्वन्द्य॑श्चव्वाजिन्ना॒शुश्चासि॒मेध्य॑श्चस
प्ते ॥ अ॒ग्निष्ट्वा॑न्दे॒वैर्व्वसु॑भिःस॒जोषा॑ः प्प्री॒तंव्व॒ह्नि॑व्वहतुजा॒तवे॑दाः ॥ ३ ॥
स्ती॒र्ण्णम्ब॒र्हिः । सुष्टरी॑माजुषा॒णोरुपृ॒थुप्प्रथ॑मानम्पृथि॒व्याम् ॥ दे॒वेभि॑

स्युक्तमदितिःसजोषाःस्योनङ्कृण्वानासुवितेदधातु॥४॥एताऽउवः।
सुभगाविश्वरूपाविपक्षोभिःश्रयमाणाऽउदातैः ॥ ऋष्वाःसतीःक
वषःशुम्भमानाद्वारोदेवीःसुप्प्रायणाभवन्तु ॥ ५ ॥ अन्तरामित्रावरु
णा ॥ अन्तरामित्रावरुणाचरन्तीमुखंय्यज्ञानामभिसंव्विदाने ॥ उषा
सावाꣳसुहिरण्ण्येसुशिल्प्पेऽऋतस्ययोनाविहसादयामि ॥ ६ ॥ प्रथ
मावाम् ॥ प्रथमावाꣳसरथिनासुवर्ण्णादेवौपश्यन्तौभुवनानिवि
श्वा ॥ अपिप्प्रयञ्चोदनावाम्मिमानाहोताराज्ज्योतिःप्प्रदिशादिश

न्तां ॥७॥ आदित्त्यैर्न्नो÷ ॥ आदित्त्यैर्न्नोभारंतीव्वष्टुयज्ञꣳसरंस्वतीसह
रुद्रैर्न्नऽआवीत् ॥ इडोपंहूताव्वसुंभिꣳसजोषांयज्ञन्नोदेवीरमृतेंषुधत्त
॥८॥ त्त्वष्टांव्वीरम्॥ त्त्वष्टांव्वीरन्देवकांमञ्जजानत्त्वष्टुरर्व्वाजायतऽआशु
रश्श्वं÷ ॥ त्त्वष्टेदंव्विश्श्वम्भुवंनञ्जजानबहोःकर्त्तारंमिहयंक्षिहोतꣳ ॥९॥
अश्श्वोंघृतेनं ॥ अश्श्वोंघृतेनत्त्मन्न्यासमंक्तऽउपंदेवाँ २॥ऽऋतुशःपा
थंऽएतु ॥ व्वनस्प्पतिर्देवलोकम्प्रंजानन्नग्निनांहव्यास्वंदितानिव्वक्षत्
॥१०॥प्रजापंतेस्तपंसा। व्वावृधानःसद्योजातोदंधिषेयज्ञमंग्ने॥स्वाहां

कृतेनह॒विषा॑पुरोगा॒या॒हिसा॒ध्याह॒विर॑दन्तुदे॒वाः ॥ ११ ॥ [११] य॒दक्र॑न्दः । प्प्र॒थ॒मञ्जाय॑मानऽउ॒द्यन्त्स॑मु॒द्राद्दु॒तवा॒पुरी॑षात् ॥ श्ये॒नस्य॑प॒क्षाह॑रि॒णस्य॑बा॒हूऽउ॑प॒स्तुत्त्य॒म्महि॑जा॒तन्ते॑ऽअर्व्वन् ॥ १२ ॥ य॒मेन॑द॒त्तम् ॥ य॒मेन॑द॒त्तन्त्रि॒तऽए॑नमायु॒नगिन्द्र॑ऽएणम्प्रथ॒मोऽअद्ध्य॑तिष्ठत् ॥ ग॒न्ध॒र्व्वोऽअ॑स्यर॒शना॒म॑गृभ्णा॒त्सूरा॒दश्वं॑व॒सवो॒निर॑तष्ट ॥ १३ ॥ असि॑य॒मः ॥ असि॑य॒मोऽअस्या॑दि॒त्त्योऽअ॑र्व्व॒न्नसि॑त्रि॒तोगुह्ये॑नव्र॒तेन॑ ॥ असि॒सोमे॑नस॒मया॒विपृ॑क्तऽआ॒हुस्ते॒त्रीणि॑दि॒विबन्ध॑नानि ॥ १४ ॥ त्रीणि॑ते ॥ त्री

णि॑तऽआहुर्द्दि॒विबन्ध॑नानि॒त्रीण्य॒प्प्सुत्रीण्य॒न्तःस॑मु॒द्रे॥ उ॒तेव॑मे॒व्वरु॑ण
श्छन्त्स्यर्व्व॒न्यत्रा॑तऽआ॒हुःप॑र॒मञ्ज॒नित्र॑म् ॥ १५ ॥ इ॒माते॑व्वाजिन् ॥
इ॒माते॑व्वाजिन्न॒वमार्ज्ज॑नानी॒माश॒फाना॑ꣳसनि॒तुर्न्नि॒धाना॑ ॥ अत्रा॑तेभ॒
द्रार॑श॒नाऽअ॑पश्यमृ॒तस्य॒याऽअ॑भि॒रक्ष॑न्तिगो॒पाः ॥ १६ ॥ आ॒त्मान॑
न्ते॒ ॥ आ॒त्मान॑न्ते॒मन॑सा॒राद॑जाना॒म॒वोदि॒वाप॒तय॑न्तम्पत॒ङ्गम् ॥ शि
रो॑ऽअपश्यम्प॒थिभि॑÷सु॒गेभि॑ररे॒णुभि॒र्ज्जेह॑मानम्पत॒त्रि ॥ १७॥ अत्रा॑
ते । रू॒पमु॑त्त॒मम॑पश्य॒ञ्जिगी॑षमाणमि॒षऽआ॒प॒देगोः ॥ य॒दाते॒मर्त्तो॒ऽ

अनु भोग॒मान॒डादि॒द्ग्रासि॑ष्ठ॒ऽओष॑धीरजीगꣳ ॥ १८ ॥ अनु॑त्वा ॥ अ
नु॑त्वा॒रथो॒ऽअनु॒मर्य्यो॑ऽअर्व॒न्ननु॒गावो॒ऽनु॒भग॑ः क॒नीना॑म् ॥ अनु॒व्राता॑
स॒स्तव॑स॒ख्यमी॑यु॒रनु॑दे॒वाम॑मिरे॒वी॒र्य्य॑न्ते ॥ १९ ॥ हिर॑ण्यशृ॒ङ्गो
य॑ः ॥ हिर॑ण्यशृ॒ङ्गो॒यो॑ऽअस्य॒पादा॒मनो॑जवा॒ऽअव॑र॒ऽइन्द्र॑ऽआसीत् ॥
दे॒वाऽइद॑स्यहवि॒रद्य॑माय॒न्योऽअर्व॑न्तम्प्रथ॒मोऽअ॒ध्यति॑ष्ठत् ॥ २० ॥ ई॒
र्म्मान्ता॑स॒ꣳसिलि॑कमध्यमासꣳ ॥ ई॒र्म्मान्ता॑स॒ꣳसिलि॑कमध्यमास॒ꣳसꣳ
शूर॑णासोदि॒व्यासो॒ऽअत्या॑ꣳ ॥ ह॒ꣳसाऽइ॑वश्रेणि॒शोय॑तन्ते॒यदाक्षि॑

षु॒र्हिँध्यमज्म॑म॒श्व्वाँ॑ ॥ २१ ॥ तव॒शरी॑रम् ॥ तव॒शरी॑रम्म्पतयि॒ष्ष्ण्व
र्व्वन्तव॑चि॒त्तंव्वात॑ऽइव॒ध्रजी॑मान् ॥ तव॒शृङ्गा॑णि॒व्विष्ठि॑तापुरु॒त्त्रार॑ण्ण्येषु॒
जर्ब्भु॑राणाचरन्ति ॥ २२ ॥ उप॒प्प्र ॥ उप॒प्प्रागा॒च्छस॑नंव्वा॒ज्ज्यर्व्वा
देव॒द्द्रीचा॒मन॑सा॒दीध्ध्या॑नः ॥ अ॒जःपु॒रोनी॑यते॒नाभि॑र॒स्यानु॑प॒श्चात्क॒व
यो॑यन्ति॒रे॒भाः ॥ २३ ॥ उप॒प्प्र ॥ उप॒प्प्रागा॑त्त्पर॒मंय्यत्त्स॒धस्त्थ॒
मर्व्वाँ॒२॥ऽअच्छा॑पि॒तरम्म्मा॒तरंञ्च ॥ अ॒द्याद॒वाञ्जुष्ट॑तमो॒हिग॒म्म्याऽ
अथाशा॑स्ते॒दा॒शुषे॒व्वार्य्या॑णि ॥ २४ ॥ [ १३ ] समि॑द्धोऽअ॒द्य ।

मनु॑षोदुरो॒णेदे॒वोदे॒वान्य॑जासिजातवेदः ॥ आच॒वह॑मित्रमहश्चिकि॒
त्वान्त्वन्दू॒तःक॒विर॑सि॒प्प्रचे॑ताः ॥ २५ ॥ तनू॑नपात्त्प॒थः ॥ तनू॑नपा
त्त्प॒थऽऋ॒तस्य॒याना॒न्मध्वा॑सम॒ञ्जन्त्स्व॑दयासुजिह्व ॥ मन्मा॑निधी॒भि
रु॒तय॒ज्ञमृ॒न्धन्दे॑व॒त्राच॑कृणुह्यध्व॒रन्नः॑ ॥ २६ ॥ नरा॒शꣳस॑स्यमहि॒
मान॑म् ॥ नरा॒शꣳस॑स्यमहि॒मान॑मेषा॒मुप॑स्तोषामयज॒तस्य॑य॒ज्ञैः ॥
येसुक्रत॑व॒ःशुच॑योधिय॒न्धाःस्वद॑न्तिदे॒वाऽउ॒भया॑निह॒व्या ॥ २७ ॥
आ॒जुह्वा॑न॒ऽईड्यः॑ ॥ आ॒जुह्वा॑न॒ऽईड्यो॒वन्द्य॒श्चाया॑ह्यग्ने॒वसु॑भिꣳस॒

जोषाᳫं ॥ त्त्वन्देवानामसियह्वहोतासऽएतान्यक्षीषितोयजीयान्
॥ २८ ॥ प्राचीनम्बर्हिः । प्प्रदिशापृथिव्याव्वस्तोरस्याव्वृज्ज्यतेऽअग्ग्रेऽ
अन्हाम् ॥ व्युप्प्रथतेव्वितरंव्वरीयोदेवेब्भ्योऽअदितयेस्योनम् ॥ २९ ॥
व्यचस्वतीरुर्व्विया । व्विश्श्रयन्ताम्पतिब्भ्योनजनयःशुम्भमानाः ॥ दे
वीर्द्वारोबृहतीर्व्विश्श्वमिन्वादेवेब्भ्योभवतसुप्प्रायणाः ॥ ३० ॥ आसु
ष्ष्वयन्ती । यजतेऽउपाकेऽउषासानक्तासदतान्नियोनौ ॥ दिव्येयोषे
णेबृहतीसुरुक्क्मेऽअधिश्श्रियंᳬशुक्क्रपिशन्दधाने ॥ ३१ ॥ दैव्याहोता

रा। प्प्रथ॒मासु॒वाचा॒मिमा॑नाय॒ज्ञम्मनु॑षो॒यज॑ध्यै ॥ प्र॒चो॒दय॑न्तावि॒द
थे॑षुका॒रूप्प्रा॒चीन॒ञ्ज्योति॑ः प्प्र॒दि॒शा॑दि॒शन्ता॑ ॥ ३२ ॥ आन॑ः ॥
आनो॑य॒ज्ञम्भार॑ती॒तूय॑मे॒त्त्विडा॑मनु॒ष्ष्वदि॒हचे॒तय॑न्ती ॥ ति॒स्रोदे॒वी
र्ब॒र्हि॑रेदꣳस्यो॒नꣳसर॑स्वती॒स्वप॑सꣳसदन्तु ॥ ३३ ॥ यऽइ॒मे । द्यावा॑
पृथि॒वीजनि॑त्रीरू॒पैरपि॑ꣳश॒द्भुव॑नानि॒विश्वा॑ ॥ तम॒द्यहो॑तरिषि॒तोय
जी॑यान्दे॒वन्त्वष्टा॑रमि॒हय॑क्षिवि॒द्वान् ॥ ३४ ॥ उ॒पाव॑सृज॒त्मन्न्या॑ ।
सम॒ञ्जन्दे॒वाना॒म्पाथ॑ऽऋतु॒थाह॒वीꣳषि॑ ॥ व॒नस्प्पति॑ः शमि॒तादे॒वोऽ

अ॒ग्निःस्वद॑न्तुह॒व्यम्मधु॑नाघृ॒तेन॑ ॥ ३५ ॥ स॒द्योजा॒तः ॥ स॒द्यो
जा॒तोव्य॑मिमीतय॒ज्ञम॒ग्निर्दे॒वाना॑मभवत्पुरो॒गाः ॥ अ॒स्यहोतुः॑प्प्र॒
दि॒श्यृ॒तस्य॑वा॒चिस्वाहा॑कृतꣳह॒विर॑दन्तुदे॒वाः ॥ ३६ ॥ ॥ [ १२ ]
के॒तुङ्कृ॒ण्वन् ॥ के॒तुङ्कृ॒ण्वन्न॑के॒तवे॒पेशो॑मर्य्याँऽअपे॒शसे॑ ॥ सम॒ुषद्भि॑रजा
यथाꣳ ॥ ३७॥ जी॒मूत॑स्येवभवति ॥ जी॒मूत॑स्येवभवति॒प्प्रती॑कं॒य्यद्व॒
र्म्मीयाति॑स॒मदा॑मु॒पस्थे॑ ॥ अना॑विद्धयात॒न्वा॒जय॒त्वꣳस॒त्वा॒वर्म्म॑णो
महि॒मापि॑पर्त्तु ॥ ३८॥ धन्व॑ना॒गाः ॥ धन्व॑ना॒गाधन्व॑ना॒जिञ्ज॑येम॒ध

न्वंनातीव्राःसमदोंजयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्वंनास
र्वाः÷प्प्रदिशोंजयेम ॥ ३९ ॥ वक्ष्यन्तीवेत् ॥ वक्ष्यन्तीवेदागंनीगन्ति
कर्ण्णम्प्प्रियꣳसखायम्प्परिषस्वजाना ॥ योषेवशिङ्क्तेवितताधिधन्व
ञ्ज्याऽइयꣳसमंनेपारयंन्ती ॥ ४० ॥ तेऽआचरंन्ती ॥ तेऽआचरंन्तीस
मंनेवयोषांमातेवंपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्विध्यताꣳसंविदा
नेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीनाम्पिता । बहु
रंस्यपुत्रश्चिश्चाकृणोतिसमंनावगत्यं ॥ इषुधिःसङ्काःपृतनाश्चसर्वाः÷

पृ॒ष्ठेनि॒न॑द्धोजयति॒प्प्रसू॑तः ॥ ४२ ॥ रथे॒तिष्ठ॑न् ॥ रथे॒तिष्ठ॑न्नयतिव्वा॒जि
न॑ः पु॒रोयत्र॑यत्रका॒मय॑तेसुषार॒थिः ॥ अ॒भीशू॑नाम्महि॒मान॑म्पनायत॒
मन॑ः प॒श्चादनु॑यच्छन्तिर॒श्मय॑ः ॥ ४३ ॥ ती॒व्रान्घोषा॑न् ॥ ती॒व्रा
न्घोषा॑न्कृण्वते॒वृष॑पाण॒योश्वा॒रथे॑भिः स॒हव्वा॒जय॑न्तः ॥ अ॒व॒क्राम॑
न्त॒ः प्प्रप॑दैर॒मित्रा॑न्क्षि॒णन्ति॒शत्रू॑ँ१ ॥ रन॑पव्ययन्तः ॥ ४४ ॥ र॒थ॒वाह॑
णꣳ ह॒विः ॥ र॒थ॒वाह॑णꣳ ह॒विर॑स्य॒नाम॒यत्रायु॑ध॒न्निहि॑तमस्य॒वर्म्म॑ ॥ त
त्रा॒रथ॒मुप॑श॒ग्ग्मꣳ स॑देमव्वि॒श्वाहा॑व्व॒यꣳ सु॑मन॒स्यमा॑नाः ॥४५॥ स्वा॒दु

षꣳसदं÷पितरं÷ ॥ स्वादुषꣳसदं÷पितरोंव्वयोधाःकृच्छ्रेश्रितꣳशक्तीव
न्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राꣳसतोवीराऽउरवोंव्व्रातसा
हाः ॥ ४६ ॥ ब्राह्मणासꣳपितरꣳ ॥ ब्राह्मणासꣳपितरꣳसोम्म्यासꣳ
शिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषानं÷पातुदुरितादृतावृधोरक्षामा
किर्न्नोऽअघशꣳसऽईशत ॥ ४७ ॥ सुपर्ण्णंव्वस्ते । मृगोऽअस्यादन्तो
गोभिꣳसन्नद्धापततिप्प्रसूता ॥ यत्रानरꣳसञ्चविचद्द्रवन्तितत्रास्म
भ्यमिषवꣳशर्म्मयꣳसन् ॥ ४८ ॥ ऋजीतेपरि । वृङ्ग्धिनोऽश्माभवतुन

स्तनूः ॥ सोमोऽअधिब्ब्रवीतुनोदितिःशर्म्मयच्छतु ॥ ४९ ॥ आजङ्घ
न्ति ॥ आजङ्घन्तिसान्वेषाञ्जघनाँ २॥ऽउपजिग्घ्नते ॥ अश्वाजनिप्प्र
चेतसोश्वान्त्समत्सुचोदय ॥ ५० ॥ अहिरिवभोगैः । पर्य्येतिबाहु
ञ्ज्यायाहेतिम्प्परिबाधमानः ॥ हस्तग्घ्नोविश्वावयुनानिविद्द्वान्पुमा
न्पुमांꣳसम्प्परिपातुविश्वतः ॥५१॥ वनस्प्पतेवीड्वङ्गः॥ वनस्प्पतेवी
ड्वङ्गोहिभूयाऽअस्म्मत्सखाप्प्रतरणःसुवीरः ॥ गोभिःसन्नद्धोऽअसि
वीडयस्वास्त्थातातेजयतुजेत्त्वानि ॥ ५२ ॥ दिवःपृथिव्याः ॥ दिवः

पृ॑थि॒व्याः॑प॒र्य्योज॒ऽउद्भृ॑तं॒व्वन॒स्पति॑भ्य॒ःपर्य्याभृ॑त॒ꣳसहः॑ ॥ अ॒पामो॒
ज्मान॒म्परि॒गोभि॒रावृ॑त॒मिन्द्र॑स्य॒व्वज्र॑ꣳह॒विषा॒रथय्ँयज ॥५३॥ इ
न्द्र॑स्य॒व्वज्रः॑॥ इन्द्र॑स्य॒व्वज्रो॑म॒रुता॒मनी॑कम्मि॒त्रस्य॒गर्भो॒व्वरु॑णस्य॒ना
भिः॑ ॥ सेमान्नो॑ह॒व्यदा॑तिञ्जुषा॒णोदे॒व॑रथ॒प्प्रति॑ह॒व्यागृ॑भाय ॥ ५४ ॥
उप॑श्श्वासय । पृ॒थि॒वीमु॒तद्याम्पु॑रु॒त्राते॑मनु॒तांव्विष्ठि॑त॒ञ्जग॑त् ॥ सदु॑न्दुभे
स॒जूरिन्द्रे॑णदे॒वैर्दू॒राद्दवी॑यो॒ऽअप॑सेध॒शत्रू॑न् ॥ ५५ ॥ आक्क्र॑न्दय ॥ आ
क्क्र॑न्दय॒बल॒मोजो॑न॒ऽआधा॒निष्ट॑नि॒हिदु॒रिताबाध॑मानः ॥ अप॑प्प्रोथदु

न्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिव्वीडयस्व ॥५६॥ आमूः ॥ आमू
रजप्प्रत्त्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्व्वावदीति ॥ समश्श्वपर्ण्णाश्चरन्ति
नोनरोस्म्माकमिन्द्ररथिनोजयन्तु ॥ ५७॥ आग्नेयःकृष्ण्णग्ग्रीवः ।
सारस्वतीमेषीबब्भ्रुःसौम्म्यःपौष्ण्णःश्यामःशितिपृष्ठोबार्हस्प्पत्त्यः
शिल्प्पोव्वैश्श्वदेवऽऐन्द्रोरुणोमारुतःकल्म्माषऽऐन्द्राग्नःसंꣳहितोधो
रामःसावित्त्रोव्वारुणःकृष्ण्णऽएकशितिपात्त्पेत्त्वः ॥ ५८ ॥ अग्नये
नीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावित्त्रौपौष्ण्णौ

रंजतनांभीव्वैश्वदेवौपिशङ्गौंतूपरौमांरुतःकल्म्माषऽआग्नेयःकृष्ण्णो
जःसांरस्वतीमेषीव्वांरुणःपेत्त्वः॥५९॥ अग्नयेगायत्त्रायं। त्त्रिवृतेराथं
न्तरायाष्टाकंपालऽइन्द्रांयत्त्रैष्टुंभायपञ्चदशायबार्हतायैकांदशकपा
लोव्विश्वेंब्भ्योदेवेब्भ्योजागंतेब्भ्यःसप्तदशेब्भ्योव्वैरूपेब्भ्योद्द्वादंश
कपालोमित्त्रावरुंणाब्भ्यामानुंष्टुभाब्भ्यामेकविंशाब्भ्यांव्वैराजाब्भ्यां
म्पयस्याबृहस्प्पतंयेपाङ्क्तांयत्त्रिणवायंशाक्वरायंचरुःसंवित्त्रऽऔष्णिण
हायत्त्रयस्त्त्रिंशायंरैवतायद्द्वादंशकपालःप्प्राजापत्त्यश्चरुरदित्त्यैव्वि

उ. अ. ॥३०॥

ष्ण्णु॑पत्न्यैच॒रु॒रग्नये॑वैश्वान॒राय॒द्वाद॑शकपा॒लोनु॑मत्त्याऽअ॒ष्टाक॑पालꣳ
॥ ६० ॥ [ २४ ] ॥ ४ ॥ इतिश्रीवाजसनेयसंहितायांएकोनात्रिं
शोऽध्यायः ॥ २९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ दे
वसवितःषट्,तपसेकौलालꣳषोडश,द्वौद्वाविꣳशतिः ॥ हरिःॐ ॥
देव॑सवितꣳ ॥ देव॑सवि॒तꣳप्प्रसु॑वय॒ज्ञंप्प्रसु॑वय॒ज्ञप॑ति॒म्भगा॑य ॥ दि॒
व्योग॑न्ध॒र्व्वःके॑त॒पूःकेत॑न्नꣳपुनातुव्वा॒चस्प्पति॒र्व्वाच॑न्नꣳस्वदतु ॥ १ ॥ त
त्त्स॑वितु॒ः ॥ तत्त्स॑वितु॒र्व्वरे॑ण्य॒म्भर्ग्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योन॑ः

[ॐ देवसवितꣳ, इत्यस्य नारद ऋषिर्ब्रह्मा देवता सुतलं छन्दः, जनोलोक साधनफल प्राप्ति कामः
पाठे विनियोगः॥ ३०॥]

प्प्रचोदयात् ॥२॥ व्विश्वानिदेव । सवितर्दुरितानिपरासुव ॥ यद्भद्रन्त
न्नऽआसुव ॥ ३ ॥ व्विभक्तारꣳहवामहे ॥ व्विभक्तारꣳहवामहेव्वसो
श्चित्रस्यराधसः ॥ सवितारन्नृचक्षसम् ॥ ४ ॥ ब्रह्मणेब्राह्मणम् ॥ ब्र
ह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योव्वैश्यन्तपसेशूद्रन्तमसेतस्कर
न्नारकायव्वीरहणम्पाप्मनेक्लीबमाक्रयायाऽअयोगूङ्कामायपुँश्चलूम
तिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गीतायशैलूष
सं. ४६ न्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभꣳहसायकारिमानन्दा

यस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्य्यायतक्षाणम् ॥ ६ ॥
[ ६ ] तपसेकौलालम् ॥ तपसेकौलालम्मायायैकर्म्मारꣳरूपा
यमणिकारꣳशुभेवपꣳशरव्यायाऽइषुकारꣳहेत्यैधनुष्कारङ्कर्म्मणे
ज्याकारन्दिष्टायरज्जुसर्ज्जम्मृत्यवेमृगयुमन्तकायश्वनिनम् ॥ ७ ॥
नदीभ्यःपौञ्जिष्ठम् ॥ नदीभ्यःपौञ्जिष्ठमृक्षीकाभ्योनैषादम्पुरु
षव्याग्घ्रायदुर्म्मदङ्गन्धर्व्वाप्प्सरोभ्योव्रात्यम्प्रयुग्भ्यऽउन्मत्तꣳसर्प्प
देवजनेभ्योप्प्रतिपदमयेभ्यःकितवमीर्य्यतायाऽअकितवम्पिशाचे

ब्भ्योबिदलकारींय्यातुधानेब्भ्यःकण्टकीकारीम् ॥ ८ ॥ सन्धये
जारम् ॥ सन्धयेजारङ्गेहायोपपतिमार्त्त्यैपरिवित्तन्निर्ऋत्यैपरिविवि
दानमराध्याऽएदिधिषुःपतिन्निष्कृत्यैपेशस्कारीꣳसञ्ज्ञानायस्मर
कारीम्प्रकामोद्यायोपसदंव्वर्ण्णायानुरुधम्बलायोपदाम् ॥ ९ ॥ उ
त्सादेब्भ्यःकुब्जम् ॥ उत्सादेब्भ्यःकुब्जम्प्रमुदेव्वामनन्द्वार्ब्भ्यःस्रा
मꣳस्वप्नायान्धमधर्म्मायबधिरम्पवित्रायभिषजम्प्रज्ञानायनक्षत्रद
र्शमाशिक्षायैप्प्रश्निनमुपशिक्षायाऽअभिप्प्रश्निनम्मर्यादायैप्प्र

श्नविवाकम् ॥ १० ॥ अर्म्मेब्भ्योहस्तिपम् ॥ अर्म्मेब्भ्योहस्ति
पञ्जवायाश्श्वपम्पुष्ट्यैगोपालंवीर्य्यायाविपालन्तेजसेजपालमिरायैकी
नाशङ्कीलालायसुराकारम्भद्रायगृहपꣳश्रेयसेवित्तधमाद्ध्यक्ष्यायानु
क्षत्तारम् ॥ ११ ॥ भायैदार्व्वाहारम् ॥ भायैदार्व्वाहारम्प्रभायाऽ
अग्न्येधम्ब्रध्नस्यविष्टपायाभिषेक्तारंव्वर्षिष्ठायनाकायपरिवेष्टारन्देवलो
कायपेशितारम्मनुष्ष्यलोकायप्प्रकरितारꣳसर्व्वेब्भ्योलोकेब्भ्यऽउप
सेक्तारमवऽऋत्यैव्वधायोपमन्थितारम्मेधायव्वासꣳपल्पूलीम्प्रकामा

यंरजयित्रीम् ॥ १२ ॥ ऋतयेस्तेनहृदयम् ॥ ऋतयेस्तेनहृदयंव्वैरह
त्यायपिशुनंव्विविक्त्यैक्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचर
म्भूम्नेपरिष्कन्दम्प्रियायप्प्रियवादिनमरिष्ट्याऽअश्वसादꣳस्वर्ग्गाय
लोकायभागदुघंव्वर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्यवेयस्ता
पम् ॥ मन्यवेयस्तापङ्क्रोधायनिसरंय्योगाययोक्तारꣳशोकायाभिस
र्त्तारङ्क्षेमायव्विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंव्वपुषेमानस्कृतꣳ
शीलायाञ्जनीकारीन्निऋत्यैकोशकारींय्यमायासूम् ॥ १४॥ यमायं

यमसूम्॥ यमायंयमसूमथर्व्वभ्योवंतोकाꣳसंव्वत्सरायंपर्य्यायिणीम्प
रिवत्सरायाविंजातामिदावत्सरायातीत्वरीमिद्वत्सरायांतिष्कद्वरीं
व्वत्सरायव्विजर्ज्जराꣳसंव्वत्सरायपलिक्नीमृभुभ्योजिनसन्धꣳसाध्ये
भ्यंश्चर्म्मम्नम् ॥ १५ ॥ सरोभ्योधैवरम् ॥ सरोभ्योधैवरमुप
स्त्थावराभ्योदाशंव्वैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्कलम्पाराय
मार्गारमवारायकैवर्त्तन्तीर्थेभ्यऽआन्दंव्विषमेभ्योमैनालꣳस्वने
भ्यःपर्णकङ्गुहाभ्यःकिरातꣳसानुभ्योजम्भकम्पर्व्वतेभ्यःकिम्पू

रूपम् ॥ १६ ॥ बीभत्त्सायैपौल्क्कसम् ॥ बीभत्त्सायैपौल्क्कसंव्वर्ण्णाय
हिरण्यकारन्तुलायैव्वाणिजम्पश्चादोषायंग्ग्लाविनंव्विश्वेभ्योभूते
भ्यः सिद्ध्मलम्भूत्यैजागरणमभूत्यैस्वपनमार्त्त्यैजनवादिनंव्यृ
द्ध्याऽअपगल्भꣳसꣳशरायंप्प्रच्छिदम् ॥ १७ ॥ अक्षराजायकित
वम् ॥ अक्षराजायकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्प्पिनन्द्वापरा
याधिकल्प्पिनमास्कन्दायसभास्त्थाणुम्मृत्यवेगोव्यच्छमन्तकाय
गोघातङ्क्षुधेयोगांव्विकृन्तन्तम्भिक्षमाणऽउपतिष्ठतिदुष्कृतायचरका

चाऽर्य्यम्पाप्मनेसैलगम् ॥ १८ ॥ प्रतिश्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रु
त्कायाऽअर्त्तनङ्घोषायभषमन्तायबहुवादिनमनन्तायमूकंशब्दा
याडम्बराघातम्महसेव्वीणावादङ्क्रोशायतूणवध्ध्ममवरस्परायशङ्ख
ध्ध्मंव्वनायव्वनपमन्यतोरण्यायदावपम् ॥ १९ ॥ नर्म्मायपुँश्चलूम् ॥
नर्म्मायपुँश्चलूँहसायकारिंय्यादसेशाबल्याङ्ग्रामण्यङ्गणकमभि
क्रोशकन्तान्महसेव्वीणावादम्पाणिघ्नन्तूणवध्ध्मन्तान्नृत्तायानन्दा
यतलवम् ॥२०॥ अग्नयेपीवानम् ॥ अग्नयेपीवानम्पृथिव्यैपीठसर्प्पि

णं॑व्वा॒यवे॑चाण्डा॒लम॒न्तरि॑क्षायव्वꣳशन॒र्त्तिनं॑न्दि॒वेख॑ल॒तिꣳसूर्य्या॑यह
र्य्य॒क्षन्नक्ष॑त्रेभ्यःकिर्म्मि॒रञ्चन्द्र॒म॑सेकि॒लास॒मह्ने॑शु॒क्लम्पि॑ङ्गा॒क्षꣳरा
त्र्यै॑कृष्णम्पि॑ङ्गा॒क्षम् ॥ २१ ॥ अथै॒तान् ॥ अथै॒तान॒ष्टौ॑व्विरूपा॒ना
ल॑भ॒तेति॑दीर्ग्घ॒ञ्चाति॑ह्रस्व॒ञ्चाति॑स्थूल॒ञ्चाति॑कृश॒ञ्चाति॑शु॒क्ल॒ञ्चाति॑कृ
ष्ण॒ञ्चाति॑कुल्व॒ञ्चाति॑लोमशञ्च ॥ अशू॑द्रा॒ऽअब्रा॑ह्मणा॒स्तेप्रा॑जाप॒
त्याः ॥ मा॒ग॒धःपुँ॑श्च॒लीकि॑त॒वःक्ली॒बोशू॑द्रा॒ऽअब्रा॑ह्मणा॒स्तेप्रा॑जाप॒
त्याः ॥ २२ ॥ [ १६ ] इतिश्रीवाजसनेयसंहितायांत्रिंशत्तमोऽध्या

[ॐ सहस्रशीर्षापुरुषꣳ, रत्यस्याऽनुवाकस्य नारायणऋषिस्त्रिष्टुप्छन्दः, विष्णुर्देवता तपोलोक-
साधन फल प्राप्तिकामः पाठे विनियोगः॥३४॥

यः ॥ ३० ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ सहस्रशीर्षाषोड
शा, ऋचः संभृतः षट्, द्वौद्वाविꣳशतिः ॥ हरिःॐ ॥ सहस्रंशीर्षापुरुंषꣳ ।
सहस्राक्षःसहस्रंपात् ॥ सभूमिꣳसर्व्वतंस्पृत्वात्त्यंतिष्ठद्दशाङ्गुलम्
॥ १ ॥ पुरुंषऽएव ॥ पुरुंषएवेदꣳसर्व्वँऽयद्भूतंऽयच्चंभाव्यम् ॥ उतामृंत
त्वस्येशांनोयदन्नेंनातिरोहंति ॥ २ ॥ एतावांनस्य । महिमातोज्ज्यायाँ
श्चपूरुंषꣳ ॥ पादोंस्यव्विश्वांभूतानिंत्रिपादंस्यामृतंन्दिवि ॥ ३ ॥ त्रिपादू
र्द्ध्वः ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुंषꣳपादोंस्येहाभंवत्पुनंः ॥ ततोव्विष्वङ्

व्य॒क्क्रामत्साशनानश॒नेऽअ॒भि ॥ ४ ॥ ततो॑व्वि॒राट् ॥ ततो॑व्वि॒राड॑जा
यतव्वि॒राजो॒ऽअधि॒पूरु॑षꣳ ॥ सजा॒तोऽअत्य॑रिच्यतप॒श्चाद्भूमि॒मथो॑पु
रः ॥ ५ ॥ तस्मा॑द्य॒ज्ञात् ॥ तस्मा॑द्य॒ज्ञात्त्स॑र्व्व॑हु॒त॒ꣳसम्भृ॑तम्पृषदा॒ज्य
म् ॥ प॒शूँस्ताँश्च॑क्रेव्वाय॒व्व्या॑नार॒ण्याग्ग्रा॒म्म्याश्च॒ये ॥ ६ ॥ तस्म्मा॑द्य॒
ज्ञात् ॥ तस्म्मा॑द्य॒ज्ञात्त्स॑र्व्व॒हु॒तऽऋच॒ꣳसामा॑निजज्ञिरे ॥ छन्दा॑ꣳसि
जज्ञिरे॒तस्म्मा॒द्यजु॒स्तस्म्मा॑दजायत ॥ ७ ॥ तस्म्मा॒दश्श्वा॑÷ ॥ तस्म्मा॒
दश्श्वा॑ऽअजायन्त॒येकेचो॑भ॒याद॑तꣳ ॥ गावो॑हजज्ञिरे॒तस्म्मा॒त्तस्म्मा॑

ज्जाताऽअंजावयंः ॥ ८ ॥ तंऽयज्ञम् ॥ तंऽयज्ञम्बर्हिषिप्प्रौक्षन्न्पुरुष
ञ्जातऽमंग्ग्रतः ॥ तेनंदेवाऽअंयजन्तसाद्ध्याऽऋषंयश्श्चये ॥ ९ ॥ यत्त्पु
रुंषम् ॥ यत्त्पुरुंषंव्व्यदंधुःकतिधाव्व्यंकल्प्पयन् ॥ मुखङ्किमंस्यासी
त्किम्बाहूकिमूरूपादांऽउच्च्येते ॥ १० ॥ ब्राह्मणोस्य ॥ ब्राह्मणो
स्यमुखंमासीद्बाहूरांजन्न्यःकृतः ॥ ऊरूतदंस्ययद्वैश्यंःपद्भ्याᳫंशू
द्रोऽअंजायत ॥ ११ ॥ चन्द्रमामनंसः ॥ चन्द्रमामनंसोजातश्श्च
क्षोःसूर्य्योंऽअजायत ॥ श्रोत्रांद्वायुश्श्चंप्प्राणश्श्चमुखांदग्निरंजायत

॥ १२ ॥ नाब्भ्या॑ऽआसीत् ॥ नाब्भ्या॑ऽआसी॒दन्तरि॑क्षꣳशी॒र्ष्ण्णो॑
द्यौःसम॑वर्त्तत ॥ प॒द्ध्याम्भूमि॒र्द्दिश॒ꣳश्रोत्त्रा॒त्तथा॑लो॒काँ२॥ऽअ॑कल्पय
न् ॥ १३ ॥ यत्पुरु॑षेण । ह॒विषा॑दे॒वाय॒ज्ञमत॑न्वत ॥ व्व॒स॒न्तो॒स्यासी॒दा
ज्ज्य॑ङ्ग्री॒ष्म्मऽइ॒ध्मःश॒रद्ध॒विः ॥१४॥ स॒प्तास्या॑सन् ॥ स॒प्तास्या॑सन्परि॒
धय॒स्त्रिःस॒प्तस॒मिध॑÷कृ॒ताः ॥ दे॒वायद्य॒ज्ञन्त॑न्वा॒नाऽअब॑ध्न॒न्पुरु॑षम्प॒
शुम् ॥ १५ ॥ य॒ज्ञेन॑य॒ज्ञम् ॥ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒धर्म्मा॑
णिप्प्रथ॒मान्न्या॑सन् ॥ तेह॒नाक॑म्महि॒मान॑÷सचन्त॒यत्त्र॒पूर्व्वे॑सा॒द्ध्याःस

न्ति॑दे॒वाः ॥ १६ ॥ [ १६ ] अ॒द्भ्यःसम्भृ॑तः । पृ॒थि॒व्यैरसा॑च्चवि॒श्वक॑र्म्म
णः॒सम॑वर्त्त॒ताग्रे॑ । तस्य॒त्वष्टा॑वि॒दधद्रू॒पमे॑ति॒तन्मर्त्य॑स्यदे॒व॒त्वमा॒जा
न॒मग्रे॑ ॥ १७॥ वेदा॒हम् ॥ वेदा॒हमे॒तम्पु॒रु॑षम्म॒हान्तं॑मादि॒त्यव॑र्ण्ण॒न्त
मं॑सःपु॒रस्ता॑त् ॥ तमे॒ववि॑दि॒त्वाति॑मृ॒त्युमे॑ति॒नान्यःपन्था॑वि॒द्य॒तेयं॑ना
य ॥१८॥ प्र॒जाप॑तिश्चरति ॥ प्र॒जाप॑तिश्चरति॒गर्भे॑ऽअ॒न्तरजा॑यमानो
बहुधावि॒जाय॑ते ॥ तस्य॒योनि॒म्परि॑पश्यन्ति॒धीरा॒स्तस्मि॑न्हतस्थु॒र्भु
व॑नानि॒विश्वा॑ ॥१९॥ योदे॒वेभ्य॑ः ॥ योदे॒वेभ्य॑ऽआ॒तप॑ति॒योदे॒वाना॑

म्पुरोहितꣳ ॥ पूर्व्वौँयोदेवेभ्योंजातोनमौंरुचायब्राह्मंये ॥ २० ॥ रु
चम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयंन्तोदेवाऽअग्ग्रेतदंब्रुवन् ॥ यस्त्वैव
म्ब्रांह्मणोव्विद्यात्तस्यंदेवाऽअंसन्वशें ॥२१॥ श्रीश्चं ॥ श्रीश्चंतेलक्ष्मी
श्चपत्न्यांवहोरात्रेपार्श्वेंनक्षंत्राणिरूपमाश्विनौव्यात्तंम् ॥ इष्णान्निषा
णामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण ॥ २२ ॥ [ ६ ] ॥ २ ॥ इतिश्री
वाजसनेयसंहितायामेकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ तदेवसप्त,व्वेनस्तन्नव,द्वौषोडश ॥ हरिःॐ ॥

[ॐ तदेवाग्निरित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो रुद्रो देवता अश्वमेधयज्ञफलप्राप्तिकामः पाठे-
विनियोगः॥ ३२॥]

तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशुक्रन्तद्ब्र
ह्मताऽआपःसप्प्रजापतिः ॥ १ ॥ सर्व्वेनिमेषाः ॥ सर्व्वेनिमेषाजज्ञिरे
विद्युतःपुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमद्ध्येपरिजग्ग्रभत् ॥ २ ॥
नतस्य । प्प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिरण्ण्यगब्भऽइत्ये
षमामाहिꣳसीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोह । देवः
प्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगब्भेऽअन्तः ॥ सऽएवजातःसज

---

१ हिरण्यगर्भःसं०चत्वारि० ४ १ मामाहिꣳसीत्.१ १यस्मान्न.१ १ इंद्रश्च. १ ॥ इति प्रतीकानि ॥
अ.२५मंत्र१०।११।१२।१३। अ.१२मं.१०२ अ.८मं.३६ मं. ३७

नि॒ष्यमा॑णꣳप्प्र॒त्यङ्ज॒ना॑स्तिष्ठतिस॒र्व्वतो॑मुखः ॥ ४ ॥ यस्म्मा॑ज्जा॒तम् ॥
यस्म्मा॑ज्जा॒तन्नपु॒राकिञ्च॒नैव॒यऽआ॑ब॒भूव॒भुव॑ना॒नि॒व्विश्वा॑ ॥ प्र॒जाप॑
तिꣳप्प्र॒जया॑सꣳररा॒णस्त्री॑णि॒ज्ज्योती॑ꣳषिसचते॒सषो॑ड॒शी ॥ ५ ॥ येन॒
द्यौः ॥ येन॒द्यौरु॒ग्ग्रापृ॑थि॒वीच॑दृ॒ढायेन॒स्व॒स्तभि॒तंयेन॒नाक॑ः ॥ सोऽ
अ॒न्तरि॑क्षे॒रज॑सोव्वि॒मान॒ꣳकस्म्मै॑दे॒वाय॑ह॒विषा॑व्विधेम ॥ ६ ॥ यङ्क्रन्द॑
सी ॥ यङ्क्रन्द॑सी॒ऽअव॑सातस्तभा॒नेऽअ॒ब्भ्यैक्षे॑ता॒म्मन॑सा॒रेज॑माने ॥

यत्राधि॒सू॒रऽउदि॑तोव्वि॒भाति॒कस्मै॑दे॒वाय॑ह॒विषा॑व्विधेम ॥ आ[1]पो॑ह॒य
द्बृ॑ह॒तीर्[1]यश्चि॒दाप॑÷ ॥७॥ [७] व्वे॒नस्तत् ॥ व्वे॒नस्तत्प॑श्य॒न्निहि॑तङ्गु॒
हा॒सद्यत्र॒व्विश्व॒म्भव॒त्येक॑नीडम् ॥ तस्मि॑न्नि॒दꣳसञ्च॒व्विचै॑ति॒सर्व॒ꣳ
सऽओत॒ꣳप्रोत॑श्च॒व्वि॒भूः॒प्र॒जासु ॥ ८ ॥ प्रतत् ॥ प्रतद्वो॑चेद॒मृत॒न्नु॒व्वि॒
द्वान्ग॑न्ध॒र्व्वो॑धाम॒व्विभृ॑तङ्गु॒हा॒सत् ॥ त्रीणि॑प॒दा॒नि॒निहि॑ता॒गुहा॑स्य॒य
स्तानि॒व्वेद॒सपि॒तुः॒पि॒तास॑त् ॥९॥ सन॑÷ ॥ सनो॒बन्धु॑र्ज्जनि॒तास॒व्वि॑धा॒ता

---

१ आपोंह. १ १ यश्चित्. १ इति प्रतीकानि ॥

अ. २८ मं. २५ मं. २६

धामा॑नि॒व्वेद॒भुव॑नानि॒व्विश्वा॑ ॥ यत्र॑दे॒वाऽअ॒मृत॑मानशा॒नास्तृ॒तीये॒धा
म॑न्न॒ध्यैरै॑यन्त ॥१०॥ प॒रीत्य॑भू॒तानि॑ । प॒रीत्य॑लो॒कान्प॒रीत्य॒सर्व्वा॑÷प्र॒
दि॒शो॒दि॒श॑श्च ॥ उ॒प॒स्थाय॑प्प्रथम॒जामृ॒तस्या॒त्मना॒त्मान॑म॒भिसंव्वि॑वे
श ॥ ११ ॥ परि॒द्यावा॑पृथि॒वी । स॒द्यऽइ॒त्वापरि॑लो॒कान्परि॒दिश॒ᳶपरि॒
स्व॒÷ ॥ ऋ॒तस्य॒तन्तुं॑व्वित॑तंव्वि॒चृत्य॒तद॑पश्य॒त्तद॑भव॒त्तदा॑सीत् ॥ १२ ॥
सद॑स॒स्प्पति॑म् ॥ सद॑स॒स्प्पति॒मद्भु॑तम्प्रि॒यमिन्द्र॑स्य॒काम्म्य॑म् ॥ स॒नि
म्मे॒धाम॑यासिष॒ꣳस्वाहा॑ ॥ १३ ॥ याम्मे॒धाम् ॥ याम्मे॒धान्दे॑वग॒णाः

पितरश्चोपासते ॥ तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मे ॥ मेधाम्मेव्वरुणोददातुमेधामग्निःप्प्रजापतिः ॥ मेधामिन्द्रश्चव्वायुश्चमेधान्धाताददातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इदम्मेब्रह्मचक्षत्रञ्चोभेश्रियमश्नुताम् ॥ मयिदेवादधतुश्रियमुत्तमान्तस्यैतेस्वाहा ॥ १६ ॥ [ ९ ] ॥ २ ॥ इतिश्रीवाजसनेयसंहितायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ अस्याजरासःसप्तदश, पश्चित्द्वादश, व्विभ्राट्चतुर्दश, प्रवावृजऽएकाद

[ॐ अस्याजरास;इति गौतम ऋषिरग्निर्देवता गायत्री छन्दः, ब्रह्म लोक साधन फलप्राप्तिकामः
पाठे विनियोगः ॥३७॥]

श,प्रवायुंपञ्चदश,प्रवीरयापञ्चदश,ऽआनस्त्रयोदश,सप्तसप्तनवतिः ॥
हरिःॐ॥अस्याजरांसः॥ अस्याजरांसोदमामरित्रांऽअर्च्चद्धूमासोऽअ
ग्नयं÷पावकाः ॥ श्वितीचयं÷श्वात्रासोंभुरण्यवोंवनर्षदोंवायवोन
सोमाः ॥ १ ॥ हरंयोधूमकेंतवः ॥ हरंयोधूमकेंतवोवातंजूताऽउपद्य
विं॥यतंन्तेवृथंगग्नयं÷॥२॥यजांनः॥यजांनोमित्रावरुंणायजांदे
वाँर॥ऽऋतम्बृहत्॥ अग्नेयक्षिस्वन्दमंम् ॥ ३ ॥ युक्ष्वाहि। देंवहू
तंमाँर॥ऽअश्वाँर॥ऽअग्नेरथीरिंव॥ निहोतांपूर्व्यःसंदः॥ ४ ॥ द्वविरू

पे । चरतꣳस्वर्थेँऽअन्यान्याँव्वत्समुपधापयेते ॥ हरिरन्न्यस्याम्भवति
स्वधावाँ२ छुक्कोऽअन्न्यस्यान्ददृशेसुवर्च्चाः ॥ ५ ॥ शतम् ॥ १७०० ॥
अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्वीड्यः ॥
यमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेविशे ॥ ६ ॥ त्रीणि
शता । त्रीसहस्राण्यग्निन्त्रिꣳशच्चदेवानवचासपर्य्यन् ॥ औक्षन्घृतै
रस्तृणन्बर्हिरस्माऽआदिद्धोतारन्न्यसादयन्त ॥७॥ मूर्द्धानन्दिवः ॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽआजातमग्निम् ॥ कविꣳ

संम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥ अग्नि
वृत्राणि । जङ्घनद्द्रविणस्युर्व्विपन्यया ॥ समिद्धꣳशुक्रऽआहुतꣳ ॥ ९ ॥
व्विश्वेभिꣳसोम्म्यम् ॥ व्विश्वेभिꣳसोम्म्यम्मद्ध्वग्नऽइन्द्रेणव्वायुना ॥ पि
बामित्रस्यधामभिꣳ ॥ १० ॥ आयत् ॥ आयदिषेनृपतिन्तेजऽआ
नट्शुचिरेतोनिषिक्तन्द्यौरभीके ॥ अग्निःशर्द्धमनवद्यंयुवानꣳस्वा
द्ध्यञ्जनयत्सूदयच्च ॥ ११ ॥ अग्नेशर्द्ध । महतेसौभगायतवद्युम्म्नान्यु
त्तमानिसन्तु ॥ सञ्जास्पत्यꣳसुयममाकृणुष्वशत्रूयतामभितिष्ठा

महाꣳसि ॥ १२ ॥ त्वाꣳहि । मन्द्रतममर्क्कशोकैर्व्ववृमहेमहिनःश्श्रो
ष्यग्ने ॥ इन्द्रन्त्वाशवसादेवतांव्वायुम्पृणन्तिराधसानृतमाः ॥ १३ ॥
त्वेऽअग्ने । स्वाहुतप्प्रियासः सन्तुसूरयः ॥ सन्तारोयेमघवानोजना
नामूर्व्वान्दयन्तगोनाम् ॥ १४ ॥ श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णव्व
ह्निभिर्द्देवैरग्नेसयावभिः ॥ आसीदन्तुबर्हिषिमित्त्रोऽअर्य्यमाप्प्रात
र्य्यावाणोऽअध्वरम् ॥ १५ ॥ व्विश्श्वेषामदितिः ॥ व्विश्श्वेषामदितिर्य्यज्ञि
यानांव्विश्श्वेषामतिथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानामवऽआवृणानः

सु॑मृडी॒कोभ॑वतुजा॒तवे॑दाः ॥ १६ ॥ म॒होऽअ॒ग्नेः । स॑मिधा॒नस्य॒शर्म्म॒
ण्ण्यना॑गामि॒त्रेव्वरु॑णेस्व॒स्तये॑ ॥ श्रेष्ठे॑स्यामसवि॒तुःसवी॑मनि॒तद्दे॒वाना॒म
वो॑ऽअ॒द्द्यावृ॑णीमहे ॥ १७ ॥ [ १७ ] आप॑श्चित् ॥ आप॑श्चि॒त्त्पिप्प्युस्त॒
र्य्यो॑नगावो॒नक्ष॑न्नृ॒तञ्ज॑रि॒तार॑स्तऽइन्द्र ॥ या॒हिव्वा॒युर्न्ननि॒युतो॑नो॒ऽअ
च्छा॒त्त्वꣳहिधी॒भिर्द्दय॑से॒व्विवाजा॑न् ॥ १८ ॥ गाव॒ऽउप॑ ॥ गाव॒ऽउपा॑व
ताव॒तम्म॒हीय॒ज्ञस्य॑र॒प्प्सुदा॑ ॥ उ॒भाकर्ण्णा॑हिर॒ण्ण्यया॑ ॥ १९ ॥ यद॒द्य ।
सूर॒ऽउदि॒तेना॑गामि॒त्रोऽअ॑र्य्य॒मा ॥ सु॒वाति॑सवि॒ताभग॑ः ॥ २० ॥ आ

सं. ४८

सुतेसिञ्चताश्रियꣳरोदंस्योराभिश्रियंम् ॥ रसादंधीतव्वृषभम् ॥ [१]तम्प्र
त्कथायंव्वेनः ॥ २१ ॥ आतिष्ठंन्तम्परिं ॥ आतिष्ठंन्तम्परिविश्वेंऽअ
भूषञ्छ्रियोव्वसांनश्चरतिस्वरोंचिः ॥ महत्तद्वृष्णोऽअसुंरस्यनामा
विश्वरूपोऽअमृतांनितस्थौ ॥ २२ ॥ प्रवं÷ ॥ प्रवौमहेमन्दंमाना
यान्धसोर्च्चाँव्विश्वानंरायव्विश्वाभुवे ॥ इन्द्रंस्ययस्यसुमंखꣳसहोमहि
श्रवौंनृम्मणञ्चरोदंसीसपर्य्यतं÷ ॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिध्मऽ

---

१ तम्प्रत्क्थां. १ १ अयंव्वेनः. १ इति प्रतीकानि ॥
अ. ७ मं १२ अ. ७ मं. १६

ऐषा॒म्भूरिं॑शु॒स्तम्पृ॒थुःस्वरुं÷ ॥ सेषा॒मिन्द्रो॒सुवा॒सखा॑ ॥२४॥इन्द्रेहिं ॥
इन्द्रेहि॒मत्स्यन्धंसो॒विश्वेंभिःसोम॒पर्व्वंभिः ॥ म॒हाँ२॥ऽअंभि॒ष्टिरोजं
सा॥ २५ ॥ इन्द्रौंवृ॒त्रम् ॥ इन्द्रौंवृ॒त्रमंवृणो॒च्छर्द्धंनीति॒ःप्रमा॒यिनांम
मिना॒द्वर्प्पंणीतिः ॥ अह॒न्व्यू॒ꣳसमु॒शधु॒ग्ग्वनेंष्वा॒विर्द्धंनांऽअकृणो
द्रा॒म्म्याणांम् ॥ २६ ॥ कुत॒स्त्वम् ॥ कुत॒स्त्वामिंन्द्र॒माहिंन॒ःसन्नेकौंया
सिसत्पते॒किन्तंऽइ॒त्था ॥ सम्पृंच्छसेसमरा॒णःशुं॒भा॒नैर्व्वों॒चेस्तन्नोंहरि

वो॒यत्ते॑ऽअ॒स्मे ॥ १म॒हाँ२॥ऽइन्द्रो॒यऽओज॑साक॒दाच॒नस्त॒रीर॑सिक॒दा
च॒नप्प्रयु॑च्छसि ॥ २७॥ आतत् ॥ आतत्ते॑ऽइन्द्रा॒यव॑÷पनन्ता॒भियऽ
ऊ॒र्व्वंङ्गोम॑न्ता॒न्तितृ॑त्सान् ॥ स॒कृत्स्वंस्येपु॑रु॒पुत्राम्म॒हीꣳस॒हस्र॑धारा
म्बृहतीन्दु॒दु॑क्षन् ॥२८॥ इ॒मान्ते॑ ॥ इ॒मान्तो॒धि॒यम्प्रभ॑रेम॒होम॒हीम॒स्य
स्तो॒त्रेधि॒षणा॒यत्ते॑ऽआ॒नजे ॥ तमु॑त्त्स॒वेच॑प्प्रस॒वेच॑सासा॒हिमिन्द्र॑न्दे॒वा
स॒ꣳशव॑सामद॒न्ननु॑ ॥२९॥ [१२] वि॒ब्भ्राड्बृ॒हत् ॥ वि॒ब्भ्राड्बृ॒हत्पि॑बतु॒सो॒

---

१ म॒हाँ२॥ऽइन्द्रो॒य. अ. ७ मं. ४०

१ क॒दाच॒न. अ. ८ मं. २

१ क॒दाच॒नप्र. ॥ अ. ८ मं. ३

इति प्रतीकानि ॥

म्म्यम्मह्यायुर्द्दधंद्यज्ञपंतावविंह्रुतम् ॥ व्वातंजूतोयोऽअंभिरक्षंतित्म
नांप्रजाःपुंपोषपुरुधाव्विरांजति ॥ ३० ॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेंद
सन्देवंव्वंहन्तिकेतवः ॥ दृशेव्विश्वांयसूर्य्यंम् ॥ ३१ ॥ येनांपावक ॥
येनांपावकचक्षंसाभुरण्ण्यन्तञ्जनाँ २ ॥ ऽअनुं ॥ त्वंव्वंरुणपश्यंसि ॥ ३२ ॥
दैव्व्यांवद्ध्वर्य्यू ॥ दैव्व्यांवद्ध्वर्य्यूऽआगंतꣳरथेंनसूर्य्यंत्त्वचा ॥ मद्ध्वांय
ज्ञꣳसमंञ्जाथे ॥ तम्प्रत्क्कथायंव्वेनश्चित्रन्देवानांम् ॥ ३३ ॥ आनः ॥

---

१ तंप्रत्क्कथा. १
अ. ७ मं. १२

१ अयंव्वेनः० १
अ. ७ मं. १६

१ चित्रन्देवानाम्. १
अ. १३ मं. ४६ ॥

इति प्रतीकानि ॥

आनऽइडाभिर्व्विदथेसुशस्तिव्विश्वानरꣳसवितादेवऽएतु ॥ अपियथा
सुवानोमत्त्सथानोव्विश्वञ्जगदभिपित्वेमनीषा ॥ ३४ ॥ यदद्य । कच्च
वृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ३५ ॥ तरणिर्व्विश्व
दर्शतꣳ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ व्विश्वमाभासि
रोचनम् ॥ ३६ ॥ तत्त्सूर्य्यस्य । देवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्व्वि
ततꣳसञ्जभार ॥ यदेदयुक्तहरितःसधस्त्थादाद्रात्रीव्वासस्तनुतेसि
मस्मै ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरू

पङ्क्त॑णुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुश॑दस्यपाज॑ः कृष्णमन्यद्धरितꣳ
सम्भ॑रान्ति ॥ ३८ ॥ बण्महान् ॥ बण्महाँ २ ॥ ऽअ॑सिसूर्य्यबडा॑दित्यमहाँ
२ ॥ ऽअ॑सि ॥ महस्तेसतोम॑हिमापनस्यतेद्धादेवमहाँ २ ॥ ऽअ॑सि ॥ ३९ ॥
बट्सूर्य ॥ बट्सूर्य्यश्रवसामहाँ २ ॥ ऽअ॑सिसत्रादेवमहाँ २ ॥ ऽअ॑सि ॥ म
न्हादेवाना॑मसुर्य्यः पुरोहि॑तोविभुज्योतिरदा॑भ्यम् ॥ ४० ॥ श्राय॑
न्तऽइवसूर्य॑म् ॥ श्राय॑न्तऽइवसूर्यँविश्वेदिन्द्र॑स्यभक्षत ॥ वसू॑नि
जातेजन॑मानऽओज॑साप्रति॑भागन्नदी॑धिम ॥ ४१ ॥ अद्यादेवाꣳ ॥

अ॒द्यादे॑वा॒ऽउदि॑ता॒सूर्य॑स्य॒निरꣳह॑सꣳपिपृ॒तानिर॑व॒द्यात् ॥ तन्नो॑मि॒
त्रोव्वरु॑णोमामहन्ता॒मदि॑ति॒ꣳसिन्धु॑÷पृथि॒वीऽउ॒तद्यौः ॥ ४२ ॥ आ
कृ॒ष्ण्णेन॑ ॥ आकृ॒ष्ण्णेन॒रज॑सा॒व्वर्त्त॑मानोनि॒वे॒शय॑न्न॒मृत॒म्मर्त्त्यं॑ञ्च ॥ हि॒
रण्ण्यये॑नसवि॒तारथे॒नादे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ ४३ ॥ [ १४ ]
प्रवा॑वृजे । सुप्प्र॒याब॒र्हिरे॑षा॒मावि॒श्प्पती॑व॒बीरि॑टऽइयाते ॥ व्वि॒शाम॒
क्तोरु॒षस॑÷पू॒र्व्वहू॑तौव्वा॒युःपू॒षास्व॒स्तये॑नि॒युत्वा॑न् ॥ ४४ ॥ इन्द्र॒
वा॒यूबृह॒स्प्पति॑म् ॥ इन्द्र॒वा॒यूबृह॒स्प्पति॑म्मि॒त्राग्निम्पू॒षण॒म्भग॑म् ॥

आदित्यान्मारुंतङ्गणम् ॥४५॥ व्वरुंणꣳप्प्राविता । भुंवन्मित्रोव्विश्वां
भिरूतिभिं÷ ॥ करंतान्नꣳसुराधंसꣳ ॥ ४६ ॥ अधिंनꣳ ॥ अधिंनऽ
इन्द्रैषांव्विष्ण्णोंसजात्यानाम् ॥ इतामरुंतोऽअश्विंना ॥ [1]तंम्प्रत्क्कथा
यंव्वेनोयेदेंवासऽआनऽइडांभिर्व्विश्वेंभिꣳसोम्म्यम्मद्धोमांसश्चर्षणीधृ
तꣳ ॥ ४७ ॥ अग्नऽइन्द्रं ॥ अग्नऽइन्द्रव्वरुंणमित्रदेवाꣳशर्द्धꣳप्प्रयंन्त

---

१ तंम्प्रत्क्कथा. १ अयंव्वेनः. १ येदेंवासः. १ आनऽइडांभिः. १ व्विश्वेंभिꣳसोम्म्यम्. १ ओमांसश्चर्षणीधृतः. १. ॥ इति प्रतीकानि ॥
अ. ७ मं. १२ अ. ७ मं. १६ अ. ७ मं १९ अ. ३३ मं. ३४ अ. ३३ मं. १० अ. ७ मं. ३३

मारुंतोतव्विंष्णो॥ उभानासंत्यारुद्रोऽअधग्नाःपूषाभगःसरंस्वतीजु
षन्त॥४८॥इन्द्राग्नीमित्रावरुंणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः
पृथिवीन्द्याम्मरुतःपर्व्वंताँ२॥ऽअपः ॥ हुवेव्विष्णुंम्पूषणम्ब्रह्मंणस्प्प
तिम्भगन्नुशꣳसꣳसवितारंमूतयें ॥ ४९ ॥ अस्म्मेरुद्राः ॥ अस्म्मे
रुद्रामेहनापर्व्वंतासोवृत्रहत्येभरंहूतौसजोषांꣳ ॥ यःशꣳसंतेस्तुवते
धायिपज्ज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्माँ२॥ऽअंवन्तुदेवाः॥५०॥ अर्व्वाञ्चोऽ
अद्य ॥ अर्व्वाञ्चोऽअद्याभंवतायजत्राऽआवोहार्द्दिभयंमानोव्ययेय

म् ॥ त्राद्ध्वन्नोदेवानिजुरोवृकस्यत्राद्ध्वङ्कर्त्तादवपदोयजत्राः ॥ ५१ ॥
व्विश्वेऽअद्य । मरुतोव्विश्वऽऊतीव्विश्वेभवन्त्वग्नयःसमिद्धाः ॥ व्विश्वे
नोदेवाऽअवसागमन्तुव्विश्वमस्तुद्रविणंव्वाजोऽअस्म्मे ॥ ५२ ॥ व्विश्वे
देवाः । शृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्नि
जिह्वाऽउतवायजत्राऽआसद्यास्म्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥ देवे
ब्भ्योहि । प्प्रथमंय्यज्ञियेब्भ्योमृतत्त्वꣳसुवसिभागमुत्तमम् ॥ आ
दिद्दामानꣳसवितर्व्व्यूर्णुषेनूचीनाजीवितामानुषेब्भ्यः ॥५४॥ [११]

प्रवायुम् ॥ प्रवायुमच्छाबृहतीमनीषाबृहद्द्रयिंविश्ववारꣳरथप्प्राम् ॥
द्युतद्यामानियुतᳵपत्यमानᳵकविःकविमियक्षसिप्प्रयुज्यो ॥ ५५ ॥
इन्द्रवायूऽइमे । सुताऽउपप्प्रयोभिरागतम् ॥ इन्दवोवामुशन्तिहि
॥ ५६ ॥ मित्रꣳहुवे । पूतदक्षंवरुणञ्चरिशादसम् ॥ धियङ्घृताचीꣳ
साधन्ता ॥ ५७ ॥ दस्रायुवाकवᳵ । सुतानासत्यावृक्तबर्हिषᳵ ॥ आ
यातꣳरुद्रवर्त्तनी ॥ [1]तम्प्रत्क्कथायंवेनः ॥ ५८ ॥ विदद्यदी ॥ विदद्यदीस

---

[1] तंप्रत्क्कथा. अ. ७ मं. १२ [1] अयंवेनः. अ. ७ मं १६ ॥ इतिप्रतीकः ॥

रमांरुगणमद्धेर्म्मंहिपार्थ÷पूर्व्यँ६ःसद्ध्यक्कं ॥ अग्ग्रंन्नयत्त्सुपद्धक्षंराणा
मच्छारवंम्प्रथमाजांनतीगांत् ॥ ५९ ॥ नहिस्प्पशंम् ॥ नहिस्प्पशम
विदन्नन्न्यमस्म्माद्वैश्वानरात्त्पुंरऽएतारंमग्ग्नेः ॥ एमेंनमवृधन्नमृताऽ
अमंर्त्त्यंवैश्वानरंक्षैत्रंजित्त्यायदेवाः ॥६०॥ उग्ग्राव्विंघनिनां ॥ उग्ग्रा
व्विंघनिनामृधंऽइन्द्राग्नीहंवामहे ॥ तानोंमृडातऽईदृशें ॥ ६१ ॥ उ
पांस्म्मै । गायतानरंःपवंमानायेन्दंवे ॥ अभिदेवाँ२॥ऽइयंक्षते ॥६२॥
येत्त्वां । हिहत्त्यैमघवन्नवंर्द्धन्न्येशांम्बरेहंरिवोयेगाविंष्टौ ॥ येत्त्वांनूनमं

नुमदन्तिव्विप्राःपिबेन्द्रसोमꣳसगणोमरुद्भिः ॥ ६३ ॥ जनिष्ठाऽउ
ग्रः ।सहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अवर्द्धन्निन्द्रम्मरु
तश्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा ॥ ६४ ॥ आतु ॥ आतूनऽइन्द्रवृ
त्रहन्नस्माकमर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमि
न्द्र ॥ त्वमिन्द्रप्प्रतूर्त्तिष्ष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाज
निताव्विश्वतूरसित्वन्तूर्य्यतरुष्यतः ॥६६॥ अनुते ॥ अनुतेशुष्ष्मन्
न्तुरयन्तमीयतुःक्षोणीशिशुन्नमातरा ॥ व्विश्वास्तेस्पृधःश्नथयन्तम

न्यवे॑वृ॒त्रंय्यदि॑न्द्र॒तूर्व्व॑सि ॥ ६७ ॥ य॒ज्ञोदे॒वाना॑म् ॥ य॒ज्ञोदे॒वाना॒म्प्र
त्ये॑तिसु॒म्नमादि॑त्यासो॒भव॑तामृड॒यन्त॑÷ ॥ आवो॒र्व्वाची॑सुम॒तिर्व्व॑वृ
त्याद॒ꣳहो॑श्चि॒द्याव्व॑रिवो॒वित्त॑रास॑त् ॥ ६८ ॥ अद॑ब्धेभिःसवितः । पा
यु॒भि॒ष्ट्वꣳशि॒वेभि॑र॒द्यपरि॑पाहिनो॒गय॑म् ॥ हिर॑ण्यजिह्वःसुवि॒ताय॒न
व्य॑से॒रक्षा॒माकि॑र्न्नोऽअ॒घशं॑सऽईशत ॥ ६९ ॥ [ १५ ] प्रवी॒रया । शु
चयो॒दद्रि॒रेवामध्व॒र्य्युभि॒र्म्मधु॑मन्तःसु॒तास॑÷ ॥ वहं॑वायोनि॒युतो॑या॒
ह्यच्छा॒पिबा॑सु॒तस्यान्ध॑सो॒मदा॑य ॥ ७० ॥ गाव॒ऽउप॑ ॥ गाव॒ऽउपा॑व

तावतम्महीयज्ञस्यंरप्प्सुदां ॥ उभाकर्ण्णाहिरण्ययां ॥ ७१ ॥ काव्व्यं
योराजानेषु ॥ काव्व्ययोराजानेषुक्क्रत्त्वादक्षंस्यदुरोणे ॥ रिशादंसास
धस्त्थऽआ ॥७२॥ दैव्व्यांवद्ध्वर्य्यू ॥ दैव्व्यांवद्ध्वर्य्यूऽआगंतꣳरथेनसूर्य्य
त्त्वचा ॥ मद्ध्वांयज्ञꣳसमञ्जाथे ॥ तम्प्रत्नथायंव्वेनः ॥७३॥ तिरश्चीनो
व्विततः ॥ तिरश्चीनोव्विततोरश्मिरेषामधःस्विदासी३दुपरिस्विदा
सी३त् ॥ रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः पर

---

१ तंप्रत्नथा. १ अयंवेनः. १ ॥ इति प्रतीकानि ॥
अ. ७ मं. १२ अ. ७ मं. १६

स्तांत् ॥७४॥ आरोदंसी ॥ आरोदंसीऽअपृणदास्वंर्म्महज्जातंय्यदेंनम्
पसोऽअधांरयन् ॥ सोऽअंध्वरायपरिंणीयतेकविरत्त्योनव्वाजंसातये
चनोंहितः ॥७५॥ उक्त्थेभिंर्वृत्रहन्तंमा ॥ उक्त्थेभिंर्वृत्रहन्तंमायामं
न्दानाचिदागिरा ॥ आङ्गूषैराविवांसतः ॥ ७६ ॥ उपंनः । सूनवो
गिरं÷शृण्वन्त्वमृतंस्ययें ॥ सुमृडीकाभंवन्तुनः ॥ ७७ ॥ ब्रह्मांणि
मे । मतयःशꣳसुतासःशुष्म्मंऽइयर्त्तिप्प्रभृंतोमेऽअद्रिं÷ ॥ आशां
सतेप्प्रतिंहर्य्यन्त्युक्त्थेमाहरींवहतस्तानोऽअच्छं ॥ ७८ ॥ अनुंत्तमा

तें । मघवन्नकिर्न्नुनत्त्वावाँ२॥ऽअस्तिदेवताव्विदानꣳ॥ नजायमानोन
शंतेनजातोयानिकरिष्ष्याकृणुहिप्प्रवृद्ध ॥ ७९ ॥ तदित् ॥ तदिदा
सभुवनेषुज्ज्येष्ठंय्यतोजज्ञऽउग्रस्त्वेषनृम्म्णꣳ ॥ सद्योजज्ञानोनिरि
णातिशत्रूननुयंव्विश्श्वेमदन्त्यूमाः ॥ ८० ॥ इमाऽउंत्त्वा । पुरूवसोगि
रोव्वर्द्धन्तुयाममं ॥ पावकवर्ण्णाꣳशुचयोव्विपश्श्चितोभिस्तोमैरनूषत
॥ ८१ ॥ यस्यायम् ॥ यस्यायंव्विश्श्वऽआर्य्योदासं÷शेवधिपाऽअरिः ॥
तिरश्श्चिदर्य्यैरुशमेपवीरवितुब्भ्येत्त्सोऽअंज्ज्यतेरयिः ॥ ८२ ॥ अयꣳ

सहस्र॑म् ॥ अयꣳसहस्रमृषि॑भिःसह॑स्कृतःसमुद्रऽइ॑वपप्रथे ॥ सत्यः
सोऽअ॑स्यमहिमागृ॑णेशवो॑यज्ञेषु॑विप्रराज्ये॑ ॥ ८३ ॥ अद॑ब्धेभिःस
वितः । पायुभिष्ट्वꣳशिवेभि॑रद्यपरि॑पाहिनोगय॑म् ॥ हिर॑ण्यजिह्वः
सुवितायनव्य॑सेरक्षामाकि॑र्नो॑ऽअघशꣳसऽईशत ॥ ८४ ॥ [ १५ ]
आनं÷ ॥ आनो॑यज्ञन्दि॑विस्पृश॑वायो॑याहिसुमन्म॑भिः ॥ अन्तःप
वित्र॑ऽउपरि॑श्रीणानोयꣳशुक्रोऽअ॑यामिते ॥ ८५ ॥ इन्द्रवायूसु॑स
न्दृशा॑ । सुहवेहह॑वामहे ॥ यथानःसर्व॑ऽइज्जनो॑नमीवःसङ्गमे॑सुमनाऽ

अस॑त् ॥८६॥ ऋध॑गि॒त्त्था । सम॑र्त्त्यैं÷शश॒मे दे॒वता॑तये ॥ सोनू॒नम्मि॒
त्रावरु॑णाव॒भिष्ट॑यऽआच॒क्रे ह॒व्यदा॑तये ॥ ८७ ॥ आया॑तम् ॥ आया॑
त॒मुप॑भूषत॒म्मद्ध्वं॑÷पिबतमश्विना ॥ दु॒ग्धम्पयो॑वृषणाजेन्न्यावसू॒मा
नो॑मर्द्धि॑ष्ट्टमाग॑तम् ॥ ८८ ॥ प्रैतु॑ ॥ प्रैतु॒ब्ब्रह्म॑ण॒स्प्पति॒ः प्रदे॒व्येतु॒सूनृ
ता॑ ॥ अच्छा॑वी॒रन्नर्य्यं॑पङ्क्तिरा॑धसन्दे॒वाय॒ज्ञन्नं॑यन्तुनः ॥ ८९ ॥ च॒न्द्र
मा॑ऽअ॒प्प्सु ॥ च॒न्द्रमा॑ऽअ॒प्प्स्व॒न्तरासु॑प॒र्ण्णो धाव॑ते दि॒वि ॥ र॒यिम्पि॒श
ङ्गम्बहु॒लम्पु॑रु॒स्पृह॒ꣳ हरि॑रेति॒कनि॑क्रदत् ॥९०॥ दे॒वन्दे॑वं॑व्वः ॥ दे॒वन्दे॑वं॒

व्वोवंसेदेवन्देवमभिष्टये ॥ देवन्देवꣳहुवेमव्वाजंसातयेगृणन्तोंदेव्या
धिया ॥ ९१ ॥ दिविपृष्टः ॥ दिविपृष्टोऽअंरोचताग्निर्व्वैश्वानरोबृहन् ॥
क्ष्मयांवृधानऽओजंसाचनोंहितोज्ज्योतिंषाबाधतेतमंः ॥९२॥ इन्द्रा
ग्नीऽअपात् ॥ इन्द्राग्नीऽअपादियम्पूर्व्वागांत्पद्वतींभ्भ्यः ॥ हित्वीशि
रोंजिह्वयाव्वावंदच्चरंत्त्रिꣳशत्पदान्न्यंक्रमीत् ॥९३॥ देवासोहि । ष्म्मा
मनंवेसमंन्न्यवोव्विश्श्वेसाकꣳसरांतयः ॥ तेनोंऽअद्यतेऽअंपरन्तुचेतु
नोभवन्तुव्वरिवोविदंः ॥ ९४ ॥ अपांधमत् ॥ अपांधमदभिशंस्ती

रशास्तिहाथेन्द्रोद्युम्न्याभवत् ॥ देवास्तऽइन्द्रसक्ख्याययेमिरेबृह
द्भानोमरुद्गण ॥९५॥ प्रव÷ ॥ प्रवऽइन्द्रायबृहतेमरुतोब्रह्मार्च्चत ॥
वृत्रꣳहनतिवृत्रहाशतक्क्रतुर्व्वज्ज्रेणशतपर्व्वणा ॥ ९६ ॥ अस्येत् ॥ अ
स्येदिन्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यव्विष्ण्णवि ॥ अद्यातमस्यम
हिमानमायवोनुष्टुवन्तिपूर्व्वथा ॥ इमाऽउत्त्वायस्यायमयꣳसहस्र
मूर्द्धऽऊषुण÷ ॥ ९७ ॥ [ १३ ] इतिश्रीवाजसनेयसंहितायांत्रयस्त्रिं

---

| | | | | |
|---|---|---|---|---|
| १ इमाऽउत्वा. | १ यस्यायम्. | १ अयꣳसहस्रम्. | १ ॥ ऊर्द्ध्वऽऊषुणः० | १ ॥ इतिप्रतीकानि ॥ |
| अ. ३३ मं. ८१ | मं. ८२ | मं. ८३ | अ. ११ मं. ४२ | |

ॐ यज्जाग्रत:, इत्यस्य विश्वामित्रऋषि: सूर्यो देवता, अनुष्टुप्छन्द:, गङ्गादिसकलसरित्सु निमज्जन-
फलप्राप्तिकाम: पाठे विनियोग:॥ ३४॥

शोऽध्यायः ॥ ३३ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ य
ज्जाग्रतोदश, पञ्चनद्योदश, सोमोधेनुन्दश, ऽआकृष्ण्णेनदश, पूषन्तव
दश, नतदष्टौ, षडष्टपञ्चाशत् ॥ हरिःॐ ॥ यज्जाग्ग्रंतꣳ ॥ यज्जाग्ग्रंतो
दूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्त
न्मेमनः शिवसङ्कल्पमस्तु ॥१॥ येनकर्म्माणि ॥ येनकर्म्माण्यपसो
मनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराꣳ ॥ यदपूर्व्वँय्यक्षमन्तःप्प्रजा
नान्तन्मेमनः शिवसङ्कल्पमस्तु ॥२॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुत

चेतो॒धृति॑श्च॒यज्ज्योति॑र॒न्तर॒मृत॑म्प्र॒जासु॑ ॥ यस्म्मा॒न्नऽऋ॒तेकिञ्च॒न
कर्म्म॑क्रि॒यते॒तन्मे॒मन॑÷शि॒वस॑ङ्कल्प्पमस्तु ॥३॥ येने॒दम् ॥ येने॒दम्भूत
म्भुव॑नम्भवि॒ष्यत्त्परि॑गृहीतम॒मृते॑न॒सर्व्व॑म् ॥ येन॑य॒ज्ञस्ता॒यते॑स॒प्तहो॑
ता॒तन्मे॒मन॑÷शि॒वस॑ङ्कल्प्पमस्तु ॥४॥ यस्म्मि॒न्नृच॑÷ ॥ यस्म्मि॒न्नृच॒ꣳ
सा॒मय॒जूꣳ॑षि॒यस्म्मि॒न्प्रति॑ष्ठितारथना॒भावि॑वा॒राः ॥ यस्मिँ॑श्चि॒त्तꣳ
सर्व्व॒मोत॑म्प्र॒जाना॒न्तन्मे॒मन॑÷शि॒वस॑ङ्कल्प्पमस्तु ॥५॥ सु॒षा॒रथिरश्वा॑
